रूपानयनपद्धतिः

उत्तरार्धम्

महिषमङ्गलशङ्करविरचिता

ROOPANAYANA PADHATHI

(II[nd] PART)

MAHISHA MANGALAM SANKARAN NAMBOOTHIRI

Edited by : Dr. C.L. Cicily

रूपानयनपद्धतिः

(उत्तरार्धम्)

महिषमङ्गलशङ्करविरचिता

प्रो.एन्.आर्.कण्णन् महाभागानां प्रस्तावनया समलंकृता

रूपानयनपद्धतिः

महिषमङ्गलशङ्करविरचिता

(उत्तरार्धम्)

डा.सि.एल्. सिसिली

रीडर्

राष्ट्रियसंस्कृतसंस्थानम् विश्वविद्यालयः

गुरुवायूर् परिसरः, पुरनाट्टुकरा

तृश्शूर् - केरळम्

रूपानयनपद्धतिः

महिषमङ्गलशङ्करप्रणीतम्

Roopanayana Paddathi

(Sanskrit)

Edited by

Dr. C.L.Cicily
Reader (Vyakarana) &
H.O.D (Res& Publications)
Rashtriya Sanskrit Sansthan
Deemed University
Guruvayur Campus
Puranattukara.
Thrissur dt.Kerala-680551

Type setting:

Sika DTP & Graphic Designing
Punkunnam, Thrissur - 680002

Printed at:

Ebenezer Press (P) Ltd,
Thrissur, Kerala

Published by

Dr.C.L.Cicily

Cover Design:

Greenline Computers, Thrissur

Year of Publication: 2004

Copies: 500

Price: Rs. 110/-

प्रस्तावना

एन्.आर्.कण्णन्
प्राचार्यः
राष्ट्रियसंस्कृतसंस्थानम् मानितविश्वविद्यालयः
गुरुवायूर् परिसरः

19.06.2004

श्री गुरुपवनेशः अव्यात्

अथेदानीं समेषां विदुषां महतो हर्षस्य विषयः यत्किल ज्योतिश्शास्त्राद्यनेकशास्त्रमर्मज्ञैः पण्डितप्रकाण्डैः श्री शङ्करन् नम्पूतिरिमहोदयैरनुगृहीतं 'रूपानयनपद्धति' ग्रन्थरत्नं संमुद्र्य प्रकाशनेनास्मन्नयनसुलभतामाप्नोति।

तत्र श्री शङ्करन् नम्पूतिरिमहोदयैः स्वकीयविवरणसहिततया विरचितः रूपानयनपद्धत्याख्यः ग्रन्थः पद्यमयः सूत्रवत् व्याकरणसिद्धान्तसंमतसकलशब्दधात्वादिप्रक्रियाप्रतिपादकः अक्लेशेन प्रक्रियावगतौ नितान्तमुत्कृष्टो दरीदृश्यते।

अस्मिन् ग्रन्थे पूर्वार्धे उत्तरार्धे च सिद्धान्तकौमुद्यादिग्रन्थोक्तरीत्यैव अच् सन्ध्यादि प्रकरणादारभ्य सम्पूर्णतया प्रक्रिया सुष्टु प्रत्यपादि। परं तु प्रथमभागस्य (पूर्वार्धस्य) यथावस्थितमातृकायाः अनुपलब्धेः आदौ उत्तरार्धमात्रं प्रकाश्यते। यावदुपलब्धं तावदुपकारकमिति मत्वा तत्तत्प्रकरणस्य विषयस्य भिन्नत्वात् व्युत्क्रमेण प्रकाशेऽपि अतीवानौचित्याभावात् प्रथमं सम्यगुपलब्धभागस्य मुद्रणं क्रियत इति संतोषस्य विषयः।

प्रतिशास्त्रं प्रक्रियाभागः (प्रमेयभागः) परिष्कारभागाश्चेति द्वेधा विषयविचारः तत्तद्ग्रन्थकर्तृभिः विद्वद्भिः तत्र तत्र समाकलितो दृश्यत इति नास्ति संशयलेशावसरः तत्तत् शास्त्रमर्मज्ञानाम्। प्रक्रियामात्रस्य सरलशैल्या प्रतिपादनात् ग्रन्थान्तरविलक्षणतया रूपानयनपद्धतिरिति अस्य ग्रन्थस्य नाम अन्वर्थं चकास्ति।

यथा - अथ झे झोन्तत्यन्तो हल्मात्रस्य चेदयं
अकार उच्चारणार्थस्तकारादुत्तरस्त्वसौ।
तत्रस्यात् पूर्वपरयोः पररूपमतो गुणे
अकारस्योत्तमे दीर्घः ततो दीर्घो च भवति सः।। इति।

विशिष्य व्याकरणशास्त्रस्य पदशास्त्रत्वेन प्रसिद्धेः प्रक्रियाज्ञानमन्तरा यथावस्थितपरिष्कारज्ञानस्यासंभवाच्च शास्त्राध्ययनप्रयोजनं प्रक्रियाज्ञानमन्तरा न सेत्स्यतीति सर्वानुभवसिद्धं वरीवर्ति। सम्पूर्णप्रक्रियातत्वजिज्ञासूनां विदुषाम् अनुसन्धातृणां च कृते अनायासेन प्रक्रियाज्ञानार्थमयं ग्रन्थः विशिष्टं स्थानं निर्वहति।

एतद्ग्रन्थसंपादिकायाः डा.सिसिलीमहोदयायाः ग्रन्थलेखन-शास्त्रप्रवचन पठनादिकर्मणि संस्कृतसेवायां च सर्वदा अभिरुचिः उत्साहश्च एधतामित्याशंसापूर्वकं विविधमङ्गलानि भवन्त्विति श्री गुरुपवनपुरेशं प्रार्थये।

कृतज्ञतानिवेदनम्

अस्य ग्रन्थस्य प्रकाशनविषये प्रोत्साहनं साहाय्यं च आचरितेभ्यो सर्वेभ्यो धन्यवादा उदीर्यन्ते।

बहुषु कार्येषु सत्स्वपि ग्रन्थामिममवलोक्य प्रस्तावनालेखनेन मां अनुगृहीतवतां प्रकृतग्रन्थप्रकाशनविषये समुचितमार्गप्रदर्शनवतां न्यायाद्यनेकशास्त्रनिष्णातानां मानितविश्वविद्यालयत्वेनसंवृत्तस्य राष्ट्रियसंस्कृतसंस्थानीय गुरुवायूर् परिसरस्य प्राचार्यमहोदयानां डा. एन्. आर् कण्णन् महोदयानां सविधे प्रथमं कृतज्ञतानिवेदनपूर्वकं प्रणामाः समर्प्यन्ते।

ग्रन्थसम्पादने केरलविश्वविद्यालयस्य ग्रन्थलिखितग्रन्थशालायाः अधिकृतः साहाय्यं दत्तवन्तः। तान् कृतज्ञतापूर्वकं स्मरामि।

अस्य ग्रन्थस्य प्रकाशनकर्मणि अनल्पोपकारं कृतवत्याः डा .एस्.राधा महोदयायाः सकाशे हार्दिकं कार्तज्ञ्यं प्रकटीकरोमि।

एतद्विद्यापीठपुस्तकालयादपि प्रचुरतरेण साहाय्यं लब्धं, तेभ्यः चिरकालं हृदयेन कृतज्ञतां वितरामि।

मुद्रणादिकर्मणि साहाय्यमाचरितवद्भ्यः मुद्रणालयाधिकारिभ्यः श्री.कृष्णकुमारमहाभागेभ्यं विशेषतः धन्ववादान् व्याहरामि।

यद्यत्रावधानतः अनवधानतः प्रकारान्तरेण वा दोषाः संवृत्ताः तान् क्षमन्तां गुणौकपक्षपातिनो विद्वांसः इति प्रार्थये।

डा.सि.एल्.सिसिली

आमुखम्

संस्कृतवाङ्मये केरलीयानां योगदानं महत्तरं वर्तते। तेषु प्रमुखमेकं स्थानमलङ्करोति महिषमङ्गलं शङ्करन् नम्पूतिरिः। महिषमङ्गलमिति गृहनाम। तत्र शङ्करन् नामधेयाः प्रसिद्ध ज्यौतिषिकः ६६६ तमे कोल्लाब्दे पुरुवने वल्लीग्रामे लब्धजन्मवान् इति विदुषामभिप्रायः । तत्र युक्तिस्तावत् शङ्करन् नम्पूतिरिणां सर्वेषु ज्योतिषग्रन्थेषु गुरूणां वाषमावेलिपोट्टि महोदयानां नमस्कारात्मकः प्रयोगः दृश्यते। अस्य 'रूपानयनपद्धति'रिति व्याकरणग्रन्थे -

'ग्रामे पुरुवने वल्लीग्रामे महिषमङ्गले।
जातोऽयं हंसतुल्येऽह्नि जातो यः शङ्कराह्वयः।।
गणिते यतमानेन तेन व्याकरणध्वनि।
पदप्रचारहीनेनाप्येष बालकृते कृता।।
सदोषा पद्धतिश्चेद्गमनं नहि शोभनम्।
तस्मद्विशोधनीयेयं विद्वद्भिर्वीतमत्सरैः ।। इति श्लोके जातोऽयं -हंसतुल्येह्नि इति प्रयोगः जन्मदिनसूचकत्वेन गणयति कटपयादि संख्यागणनेन। अत्रोक्तः वल्लीग्रामः। अस्य मुहूर्तशास्त्रप्रतिपादनात्मकः 'भाषासंग्रह' इति ग्रन्थः ७१५ तमे कोल्लाम्बवर्षे कृत इति तस्मिन्नेव ग्रन्थे परामृष्टः।

शङ्करन् नम्पूतिरिविरचिताः अनेके ग्रन्थाः वर्तन्ते। ते प्रायेण ज्योतिश्शास्त्रप्रतिपादकाः। कालदीपकं बालशङ्करम्, कालादीपकं भाषापद्यानि, मुहूर्तपदवीबालशङ्करम्, लघुभास्करीयं बालशङ्करम्, गणितसारम्, चन्द्रगणितक्रमम्, पञ्चबोधम्, पञ्चबोधार्थदर्पणम्, अयनचलनादि गणितम्, भाषासंग्रहम्, प्रश्नसारम्, जातकक्रमम्, जातकसारम्, करणसारञ्च तेषूपलब्धानि ते प्रायेण ज्योतिश्शास्त्रप्रतिपादकाः । 'रूपानयनपद्धति'रिति व्याकरणग्रन्थश्च

तैः विरचिताः। ग्रन्थस्यास्य परामर्शः केरलीयसाहित्यचरित्रे केरलीयसंस्कृतसाहित्यचरित्रे च वर्तते। के.कुञ्जुण्णिराजा महोदयेन contribution of Kerala to Sanskrit literature नाम ग्रन्थे ग्रन्थमिदमधिकृत्य उल्लिखितम्। दौर्भाग्यवशात् इदानीमप्यप्रकाशितोऽयं ग्रन्थः। अस्य हस्तलिखितग्रन्थः तिरुवनन्तपुरे हस्तलिखितग्रन्थशालायां वर्तते। मुद्रणार्थम् आधारग्रन्थत्वेन ते सम्पादिताः। बहूनि पुटानि अव्यक्तानि वर्तन्ते। तानि 'काशिकावृत्तिः', 'सिद्धान्तकौमुदी', 'पर्यायपदावली', 'धातुवृत्तिः' प्रभृतीनाधारीकृत्य साधितानि।

रूपानयनपद्धतिरिति नाम्नैव बोध्यते अस्य प्रतिपाद्यविषयः। रूपावतारवत् सुबन्ततिङन्तशब्दानां प्रयोगसाधनमभिलक्ष्य कृतोऽयं ग्रन्थः। सूत्रं सूत्रार्थं च न साक्षाद् विवृणोत्यत्र। शब्दानां प्रक्रियासाधनार्थं सूत्राणां समावेशः कृतः। तत्तद् लक्ष्यविषयकाणि सूत्राण्येकत्र संगृह्य व्याख्यातानि च वर्तन्ते।

गद्यवत् पद्येऽपि शास्त्रतत्वानि विशदीक्रियन्ते। सारल्येन विशदीकरणे ग्रन्थकर्तृणां नैपुण्यं अत्र द्रष्टुं शक्यते । प्रतिपादनशैली सरला हृद्या च। तद्यथा-

"शब्विकरणेषु धातुषु प्रथमं तिङ् विभक्तिर्योज्यते।
धातोरुक्तिर्यथापाठं पुनर्धातुस्तदर्थयोः।
विभज्यकथनं धातुर्धातुसंज्ञानुबन्धलुक् ।।
पश्चात् केवलधातूक्तिर्धातुसंस्कार एव च।
धातुभ्योऽथ लकाराः स्युस्तेषामप्यनुबन्धलुक्।।
धातोः परे लकाराः स्युर्लकाराणां तिबादयः।
मध्ये धातुविभक्त्योश्च प्रत्ययाः स्युः शबादयः" ।। इति।

राजन् शब्दस्य राजा, राजानौ, राजान इत्यत्र पदानयनमार्गं दृश्यताम् -

"सर्वनामादिदीर्घश्च हल्ङ्यादिश्च नलोपता
नलोपो ङि सम्बुद्धयोरित्यत्र प्रतिषिध्यते।
अजादौ तु भसंज्ञायामल्लोपः श्चुत्वमेव च

हलादौ पदसंज्ञायां नलोपश्च विधीयते।
नलोपोऽसिद्धवद्भावात्सुपि चेति न दीर्घता
अत्र चासिद्धवद्भावो न लोपः सुप्स्वरादिना
भवेद्विभाषा ङिश्योरित्यल्लोपस्य विकल्पता।"

राजनस् 'सर्वनामस्थानेचासंबुद्धौ' इति दीर्घः, 'हल्ङ्यादिना' सुलोपः। सम्बुद्धौ - नलोपे प्राप्ते 'नङि सम्बुद्ध्योः' इति नलोपो न भवति। राज्ञः इत्यत्र 'यचि भमि'ति भसंज्ञायां 'अल्लोपोन' इति जकाराकारस्य लोपः 'स्तोश्चुनाश्चु'रिति श्चुत्वं ञकारः राज्ञः। असर्वनामस्थानेऽजादौ भसंज्ञा राज्ञभ्यामि हलादौ 'स्वादिष्वसर्वनामस्थान' इति पदसंज्ञा। 'नलोपः प्रातिपादिकान्तस्ये'ति नकारलोपः इति गद्ये विस्तृतविवरणञ्च वर्तते।

अस्य अपरं वैशिष्ट्यं वर्तते शैलीगतं वैलक्षण्यम्। प्रकरणारंभे 'रूपावतार'वत् प्रकरणस्थापनशैली दृश्यते। प्रकरणस्थापनशैली नाम प्रकरणसंस्थापनात् सूत्रोपस्थानात् वा पूर्वं तद्विषये शङ्का, प्रश्नो वा क्रियते। अनन्तरं विषयः उच्यते। यथा विभक्त्यर्थप्रकरणारम्भे का नाम विभक्तिः ? सु औजसित्यादि प्रथमेत्येवमादयः। सम्प्रदानकारकावतरणस्य प्रारम्भे किम् सम्प्रदानम्? तथा के पुनः स्त्रीप्रत्ययाः ? एतादृशशैली विषयाणां सम्यगवबोधाय भवति।

धातुवृत्तिः, काशिकावृत्तिः पर्यायपदावली इत्यादिग्रन्थानां सारांशं स्वीकृत्य विषयाः प्रतिपादिताः। विभक्त्यर्थप्रकरणे क्रियानिमित्तं यत् तत् कारकमुदीरितम् इति कारकलक्षणं पर्यायपदावलीम् अनुसृत्य कृतम्। तत्र तत्र पर्यायपदावलीतः पद्यानि उद्धरति च। तद्यथा -

ज्ञेयः स कर्ता कर्मादिकारकाणामधीश्वरः।
स्वतन्त्रो योजको हेतुरिति कर्त्रा भवेत् त्रिधा।

पर्यायपदावलीस्थ श्लोकान् उद्धृत्य लकाराणामर्थं विवृणोति। तद्यथा -

'त्रयो लकाराः भूतार्थाः त्रयो भाव्यर्थवाचकाः एको अत्र
वर्तमानार्थे आशीर्विद्यादिषु द्वयम्।' इत्यादि।

'एकाच उपदेशेऽनुदात्तात्' इति सूत्रे के पुनरुपदेश एकाजनुदात्ताः इति प्रकरणमुपस्थाप्य धातुवृत्तिम् उद्धृत्य अनिटः धातवः प्रदर्शिताः। तदवसरे प्रक्रियामृतञ्च उद्धरति।

मन् धातोः यङ् प्रक्रियायां मन् य, नुमागमः, अनुबन्धयोर्लोपः अत्र झल्परत्वाभावेऽपि नकारस्यानुस्वारो भवति। तथा च वृत्तौ - 'नुमित्येतदनुस्वारोपलक्षणार्थं द्रष्टव्यम्, स्थानिना आदेशो लक्ष्यते, तेन यंयम्यत यादावझल् परेदप्यनुस्वारो भवति' इति विशदयति वृत्तिकारम् उद्धृत्य।

सुप्तिङन्तप्रक्रियायां सामान्यकार्याणि उपपाद्य शब्दवशात् गणवशात् या धातुवशाद् यः विशेषः सोपि निर्दिष्टः। तद्यथा -

इकारान्त कविरिति पदे औ प्रत्यये 'प्रथमयोः पूर्वसवर्ण' इति पूर्वसवर्णदीर्घः, जसि 'जसिचेति' गुणः, सम्बुद्धौ 'ह्रस्वस्यगुणः' इतीकारस्येकारः, 'एङ् ह्रस्वात् सम्बुद्धे' रिति सुलोपः। अम्, 'अमिपूर्वः' पूर्वरूपम्। कवि टा इति स्थिते शेषोख्यसखि इति घिसंज्ञायां 'आङोनास्त्रिया' मिति नादेशः कविना। ङे प्रत्यये घर्ङिति इति इकास्य एकारः अयादेशः कवये। ङसि ङसोः 'ङसिङसोश्चेति' पूर्वरूपत्वम्। रुत्वविसर्गौ कवेः, कवि ओस् कव्योः। आमि 'ह्रस्वनद्यापो नुट्' नामीति दीर्घः। कवीनां, कवि इ 'अच्च घेः' ङेरौकारः 'वृद्धिरेचि' इति वृद्धिः। कवौ, 'आदेशप्रत्यययोः' इति षत्वम् कविषु। प्रक्रियेयं एवं संगृह्य कृता-

दीर्घो गुणाः स्युर्जसि च सम्बुद्धौ ह्रस्वस्व घेर्ङिति।
आङो नात्वं ङसिङसोः प्रोक्तं ङेरौत्वमच्च घेः।। इति।

इकारान्तसखिशब्दस्य विशेषकार्यस्तु अनङादेशः। अनङादेशे सु इति जाते 'सुडनपुंसकस्येति' सर्वनामसंज्ञा आदि प्रक्रियाक्रमः ग्रन्थकारोक्तरीत्या यथा -

'अनङ् सौ सर्वनामादि हल्ङ्यादिश्च नलोपता।
णिद्वत् सख्युस्वो वृद्धिः ख्यत्यादित्युमौच्च ङेः।' इति
एवं त्रि शब्दो बहुवाची स्यात् प्रक्रिया कविशब्दवत्।

त्रिशब्दस्य त्रयादेशो भवेदमि परे सति।

सन्नन्तप्रक्रियायाम् एकमुदाहरणं पश्यताम् -

इषि कर्म तु यो धातुरिषिणैव सकर्तृकः।
इच्छार्थे प्रत्ययस्तस्मात् सन्विकल्पाद्विधीयते।। धातुवशाद् विशेषोपि अत्र सूपपादितम्।

तद्यथा -

'अभ्यासाद्वा कवर्गः स्याच्चिनोतेः सनि लिट्यपि।
सनिग्रहगुहोश्चेति प्रतिषेध इटो भवेत्।'

एवं स्वकीयपद्धत्या व्याकरणविषयाणां सुगमबोधकत्वं सम्पादितम् ग्रन्थकारेण।

ग्रन्थस्वरूपम्

पूर्वार्धमुत्तरार्धमिति भागद्वयमस्त्यस्य। पूर्वार्धे तुक् सन्धिः, अच् सन्धिः, हल् सन्धिः, विसर्गसन्धिः, स्वादिसन्धिः, अजन्तहलन्तशब्दाः, स्त्रीप्रत्ययविभक्त्यर्थसमासाश्च अन्तर्भवन्ति। 'सृष्टिस्थित्यादिकर्तारं श्रीरुद्रं पार्वतीमपि। नत्वा गणेशं चाख्यास्ये रूपानयनपद्धतिम्।।' इति मङ्गलश्लोकेन ग्रन्थः प्रारभ्यते। माहेश्वरसूत्राणां नामतः निर्देशानन्तरं प्रत्याहारान् प्रतिपाद्य तुक्सन्धेः प्रारम्भः तुक्सन्धिः प्रकृतिसन्धिः, अच् सन्धिः, हल् सन्धिः, विसर्गसन्धिः, स्वादिसन्धिः इति षोढा सन्धिः विभज्यते। तुक्सन्धेः हल् सन्धौ अनन्तर्भावात् पृथक् कृतम्। प्रकृतिभावोऽपि सन्धित्वेन उररीकृतः अतः प्रकरणमिदं पृथक्तया विन्यस्तम्।

अथ अजन्तपुल्लिङ्गप्रकरणम्। प्रकरणेऽस्मिन् वृक्ष सर्व, पूर्वपरावरदक्षिणोत्तरापराधर स्व अन्तर् प्रथम द्वितीय तृतीय सोमप कविः पति सखि द्वि त्रि कति, ग्रामणीः सुधीः कारु क्रोष्टा खलपू प्रतिभू पितृ नृ गौः सुरा ग्लौ इति, स्त्रीलिङ्गप्रकरणे - जाया, जरा, द्वितीया, तृतीया, रुचिः, द्वि, त्रि भवती, भवन्ती, दीव्यन्ती, लक्ष्मी, स्त्री, श्री, तनु, जम्बू, भ्रू, माता, गो, रै, नौ,

नपुंसकलिङ्गे - कुण्डम्, कतर, एकतरा, सोमप, सुचि, वारि, अस्थि, द्वि, त्रि, शुचि, त्रपु, मृदु, खलपू, उपगु, चित्रगु, अतिरै शब्दाः निष्पादिताः।

हलन्तपुल्लिङ्गप्रकरणे- गोधुक्, (गोदुह्) श्वलिह्, मित्रद्रुह्, अनड्वान्, सुद्यौ, चतुर, प्रशान्, इदम्, राजन्, पूषन्, ब्रह्मन्, युवन्, मघवन्, अर्वन्, पञ्चन्, अष्टन्, करिन्, पथिन्, तत्ववुध्, भिषज्, जन्मभाज्, यङ्, सम्राट्, देवेज्, वेदवित्, द्विपाद्, तद्, यद्, एतद्, अग्निमथ्, सुवाच्, प्राच्, प्रत्यच्, उदीच्, सम्यग्, मरुत्, महत्, बृहत्, भवत्, ददत्, दधत्, जक्ष्, विश्, दृश्, तादृश्, रत्नमुष्, दुर्वचस्, श्रेयस्, उशनस्, विद्वस्, पुंस्, अदस्, हलन्त स्त्रीलिङ्गप्रकरणे - उपानह्, गिर्, धुर्वी, पुर्, चतुर्, किम्, इदम्, सीमन्, (भान्तः), कुकुभ्, समिध्, ऋत्विण्, दृषद्, तन्, वाच्, विद्युत्, अप्, दृश्, अदस्, नपुंसकलिङ्गे - वार्, चतुर्, किम्, इदम्, सामन्, अहन्, पञ्चन्, असृज्, तद्, प्रच्, शकृत्, ददत्, भवत्, पयस्, अदस्, शब्दाः सर्वासु विभक्तिषु प्रतिपादिताः।

युष्मदस्मदोः अलिङ्गत्वात् त्रिष्वपि लिङ्गेषु समानं रूपम्। अतः हलन्तपुलिङ्गप्रकरणे न निर्दिष्टः।

स्त्रीप्रत्ययाः- टाप् ङीप् ङीष् ङीनादि प्रत्ययाः अष्टाध्यायीक्रमे एव निरूपिताः।

विभक्त्यर्थाः- क्रियानिमित्तं यत् कारकमिति कारकलक्षणमपि निर्दिष्टम्। पाणिनिना एतन्न निर्दिष्टम्। कारकप्रकरणे कारकाणामवान्तरभेदानां विस्तृतविवरणम् अत्र द्रष्टुं शक्यते। तद्यथा-

'अथवा कर्म सप्तविधम् - ईप्सितकर्म, अनीप्सित कर्म, नैवेप्सितानीप्सित, कर्तृकर्म, अभिहितकर्म, अनभिहितकर्म, अकथितकर्मे'ति। पर्यायपदावलीतः बहूनि पद्यानि अत्र उद्धृतानि।

समासप्रकरणे - समासलक्षणं, समासभेदाश्च अत्र निरूपिता। किन्तु हस्तलिखितेऽस्मिन् ग्रन्थे प्रकरणस्यास्य अनुपलब्धत्वात् पूर्वाधर्मपूर्णतया वर्तते। तिरुवनन्तपुरे विश्वविद्यालयस्य ग्रन्थशालायां विद्यमाने तालपत्रे समासप्रकरणमपि

वर्तते। तदपि संयोज्य पूर्वार्धस्य प्रकाशनमपि विनाविलम्बेन भविष्यति । तेनैव कारणेन केवल उत्तरार्धस्य प्रकाशनं साम्प्रतं करिष्ये।

उत्तरार्धम्

उत्तरार्धं धातुप्रत्ययपञ्चिका इत्यभिधीयते। दशगणेषु पठिताः धातवः, अनुमानितपाठाः धातवः, सनादिप्रत्ययान्ता धातवः, नामधातवः, सुप् धातवः इति धातूनां पञ्चप्रकारकत्वात् पञ्चिका इत्याख्यायते।

उत्तरार्धस्य विषयानुक्रमणिका -

पूर्वं दश लकाराः प्रदर्श्यन्ते। ते यथालक्षणं धातोर्विधीयन्ते। विकरणप्रत्ययभेदेन धातवः दशविधाः कथमिति च। तेषु शब्विकरणः लुग्विकरण, श्यन्विकरण, इति क्रमः स्वीकृतः। तत्र प्रक्रियायां प्रथमं धातोः परस्य लकारस्य स्थाने तिङ्विभक्तिर्योज्यते।

लट् लङ् लोट् लिङ् चेत्येते चत्वारः सार्वधातुकम्। आशीर्लिङ् लिट्लुङ्लृट्लृङ् इत्येते षडार्धधातुकम् इति लकारान् द्वेधा विभज्य अस्मिन्नेव क्रमे प्रक्रिया उदीरिता। धातवः शब्विकरणः, लुग्विकरणः, श्लुविकरणः, श्यन् विकरणः, श्नम् विकरणः, श विकरणः, श्नाविकरणः, श्नुविकरणः, उविकरणः, णिच् विकरणश्च प्रत्ययान्विताः प्रदर्श्यन्ते।

लकारप्रक्रिया

भू एध् अद शीङ् ब्रूञ् हु धाञ् दिव् षुञ् तुद् रुध् भुज् युज् तन् मन् कृञ् चुरादिधातूनां सामान्यतया लटि प्रक्रियाम् उक्त्वा धातुवशाद् यो विशेषः सोपि निर्दिष्टः तद्यथा लट् प्रक्रियायाम् विभक्तियोजनामार्गः -

'अथ झेझोन्त इहान्तो हल्मात्रस्य चेदयं
अकारउच्चारणार्थस्तकारादुत्तरस्त्वसो
तत्रस्यात् पूर्वपरयोः पररूपमतो गुणे
अकारस्योत्तमे दीर्घस्ततो दीर्घोयञीति सः' ।

१.अद् - 'अदेर्लटि भवेच्चत्र्वं खरिचेतीहु पञ्चसु' इत्यादि अद् धातोःप्रथमपुरुषबहुवचनमुत्तमं च विनान्येषु पञ्चसु दकारस्य खरि चेति चर्त्वं, अत्ति अत्त इत्यादि।

२. ब्रू - 'अचिश्नु इत्यादिनोवङ् स्यात् थास से षत्वमेव च' (ब्रुवते ब्रूषेः इत्यत्र)।

३.जुहु - 'पित्सु त्रिषु स्यादङ्गस्यसार्वधात्वादिना गुणः।
अङ्गस्याभ्यस्तसंज्ञायानुभेऽभ्यस्तमित्यतः।।
अदभ्यस्तादुत्तरस्य झकारस्य भवेत् पुनः।
हुश्नुवोरिति यण् चापि तत्र स्यात् स्य षः पुनः।।'

जुहुति गुणः, जुहोति। जुहुझि इत्यत्र 'उभे अभ्यस्तम्' इति अभ्यस्यसंज्ञायां 'अदभ्यस्तादि'ति अभ्यासादङ्गादुत्तरस्य हल्मात्रस्य झस्यादित्ययमादेशः,' हुश्नुवो सार्वधातुके' इति हकारउकारस्य यणादेशो वकारः जुह्वति।

लङ् प्रक्रिया

'विभक्तियोजनामार्गो लङि तावत् प्रदर्श्यते।
झोन्तश्चातो गुणे पश्चादितश्चेकारलुक् त्रिषु'

जुहु - 'अतश्च तिप्सिपोरेर्लुक् पित्सुत्रिषु गुणो भवेत् सार्वधात्वादिना झेर्जुस् सिजभ्यस्तविदीति सः जुसि चेति गुणश्चात्र तत्र चामि परेऽपि।'

सुनु, 'सुनुचिन्वोः' पित्सुकार्यः सार्वधात्वादिनागुणः झेर्जुसो हुश्नुवोर्यण् चाथेतश्चत्रिष्विलोपता। एवं सर्वेषु लकारेषु कर्तरि कर्मणि भावे च प्रक्रिया प्रदर्शिताः। इति सार्वधातुकपरिच्छेदः।

आर्धधातुकपरिच्छेदे -

लिट् प्रक्रियायां विभक्तियोजनामार्गः सामान्यतया यथा -

धातु सेट् भवेद्यथान्यायं वलादीनामिडागमः ।
लिटि धातोर्द्विचनं तत्पूर्वोऽभाससंज्ञकः।।
द्विर्वचस्थानिवद्भावात् यदि द्विर्वचनेऽचि
तत् हलादिश्च तथा ह्रस्वश्चाभ्यासे चर्च जश् पुनः।।

अस्माद्यत्र विशेषो यस्तत्र सोऽपि विधीयते। थलि विशेषो यः स एवात्र प्रदर्श्यते।

'भारद्वाजनियमादनिट्त्वं थलि वै मृङः।
नहिः चिनोति क्रीणति जुहोति पचिधाञ्भुञ ।।
विभाषितेः सप्त सुस्त्रयस्त्रिंशत्यमी थलि ।'

एवं लकारेषु प्रक्रिया प्रदर्शिता। अन्ते सनाद्यन्तन्ययः। तत्र सन् यङ् यङ्लुक् णिच् प्रत्ययान्वितानां धातूनां प्रक्रियाक्रमः प्रतिपादितः। तद्यथा -

'इषिकर्मतु यो धातुरिषिणैव सकर्तृकः।
इच्छार्थे प्रत्ययस्तस्मात् सन्विकल्पात् विधीयते।'

धातुवशाद् यः विशेषः सोऽपि अत्र सूपपादितम्। तद्यथा -

'अभ्यासाद्वा कवर्गः सच्चिनोतेः सनि लिट्यपि'
'तनोतेर्विभाषेति झलादौ सनि दीर्घता'
'सनिग्रहगुहोश्चेति प्रतिषेध इटो भवेत्।'
'पौनपुन्यं भृशार्थो वा क्रियासमभिहारकः
तयोर्हलादेरेकाचो धातोर्याङ् प्रत्ययो भवेत्।
सन्यङोरिति सूत्रोक्तं कार्यं द्विर्वचनं पुनः।
इको गुणोऽभ्यासस्य स्यात् परे च यङि यङ्लुकि।।'

यङि कृते 'अतोऽभ्यासस्य वुञ्चादेर्यङि नीगामो भवेत्' 'स्वपिस्यामिव्येञां यङीति स्यात् प्रसारणम्' इत्यादयः विशेषकार्याः।

डा.सि.एल्. सिसिली

विषयानुक्रमणिका

	विषयः	पृष्टसंख्या
अध्यायः १		
	उपोद्घातः	१
अध्यायः २	विकरणप्रत्ययः	
	शब्विकरणम्	५
	लुग्विकरणम्	१२
	श्लुविकरणम्	१३
	श्यन्विकरणम्	१५
	श्नुविकरणम्	१६
	शविकरणम्	१६
	श्नम् विकरणम्	१७
	उविकरणम्	१८
	श्नाविकरणम्	१९
	णिज्विकरणम्	२०
अध्यायः ३	सार्वधातुकपरिच्छेदः	
	लट् प्रक्रिया	२१
	लङ् प्रक्रिया	३३
	लोट् प्रक्रिया	४२
	विधिलिङ् प्रक्रिया	५४
	सार्वधातुके भावकर्मकप्रक्रिया .... (यक् परिच्छेदः)	५९

अध्यायः ४ आर्धधातुकपरिच्छेदः

आशीर्लिङ् ६३
लिट् ८०
लुङ् १०७
लुट् १३१
लृङ् १३७
लृट् १४३
आर्धधातुके चिण्वद् परिच्छेदः..... १४६
आशिर्लिङ् १४७
लिट् १४९
लुङ्............................... १५०
लुट्............................... १५२
लृङ्............................... १५३
लृट्............................... १५३

अध्यायः ५ सनाद्यन्तनयः

सन् १५४
यङ् १६९
यङ् लुक् १७६
णिच् १७६

मातृकाग्रन्थानां विवरणम्.................. १८३

सर्वेश्वराय नमः

रूपानयनपद्धतिः

।। अथोत्तरार्धम् ।।

सृष्टि स्थित्यादिकर्त्तारं श्रीरुद्रं पार्वतीमपि ।
नत्वा गणेशं चाख्यास्ये रूपानयनपद्धतिम् ।।
ग्रामे पुरुवने वल्लीशैले महिषमङ्गले ।
जातोऽयं हंसतुल्येऽह्नि जातो यः शङ्कराह्वयः ।।
गणिते यतमानेन तेन व्याकरणाध्वनि ।
पदप्रचारहीनेनाप्येषा बालकृते कृता ।।
सदोषा स्यात् पद्धतिश्चेद् गमनं न हि शोभनम् ।
तस्माद्विशोधनीयेयं विद्वद्भिर्वीतमत्सरैः ।।
प्रणम्य शिरसा देवीं बालानां हितकारिणीम् ।
यथासारं प्रवक्ष्यामि धातुप्रत्ययपञ्जिकाम् ।।

अथ तिङ्विभक्तिर्यथासम्भवं क्रियावाचिभ्यो धातुभ्यः परस्य लकारस्य स्थाने सङ्क्षेपेणोपदिश्यते । का च 'तिङ्विभक्तिः 'तिप्तसझिसिप्थस्थमिब्वस्मस्तातां झथासाथां ध्वमिड्वहिमहिङ्'इति। पकार टकारङकाराः सर्वेऽनुबन्धाः कार्यार्थाः पकारो 'अनुदात्तौ सुप्पिताव़ि'ति विशेषणार्थः, टकार 'इटोऽदि' ति विशेषणार्थः ङ्कारस्तिङिति प्रत्याहारग्रहणार्थः । पूर्वे नव परस्मैपदम् 'लः परस्मैपदम्' १-४-९९ । लादेशाः परस्मैपदसंज्ञा भवन्ति परे नवात्मनेपदम् 'तङानावात्मनेपदम्' तङिति प्रत्याहारो नवानां वचनानाम् आन इति शानच्कानचोर्गहणम् तङानावात्मनेपदम् १-४-१००-पूर्वेण परस्मैपदसंज्ञायां प्राप्तायां

तङानयोरात्मनेपदसंज्ञानेन विधीयते कश्च लकारः लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लृङ्. लुङि. ति दश लकाराः । अकारादयष्टकारङ्कारौ चानुबन्धाः कार्यार्थाः एते च दश लकारा यथालक्षणं धातोर्विधीयन्ते धातवः पुनरर्थवशाद् द्विविधा भवन्ति । सकर्मका अकर्मकाश्चेति, तत्र सकर्मका ये धातवस्ते कर्मापेक्षां क्रियामाहुः तद्यथा कटं करोति ग्रामं गच्छति ओदनं पचतीत्यादि अकर्मका ये धातवस्ते कर्मनिरपेक्षां क्रियामाहुः तद्यथा आस्ते शेते तिष्ठतीत्यादयः ते पुनः सर्वे दशविधा भवन्ति विकरणप्रत्ययभेदेन कथम् शब्विकरणा भ्वादयः लुग्विकरणा अदादयः श्लुविकरणा जुहोत्यादयः श्यन्विकरणादिवादयः श्नुविकरणाः स्वादयः शविकरणस्तुदादयः श्नम्विकरणा रुधादयः उविकरणास्तनादयः श्नाविकरणाःक्र्यादयः स्वार्थण्यन्ताश्चुरादय इति। ते पुनः सर्वे तिङ्विभक्तिवशात्रिविधा भवन्ति परस्मैपदिन आत्मनेपदिन उभयपदिनश्चेति कदाचिल्लक्षणान्तरेण परस्मैपदिनोप्यात्मनेपदमनुभवन्ति आत्मनेपदिनोऽपि परस्मैपदमनुभवन्ति ।

भूसत्तायाम् एध वृद्धौ डुपचष्पाके टुणदि समृद्धौ, ध्वन्सु गतौ च, व्येञ् संवरणे इति भूवदयः ।

अदभक्षणे शीङ् स्वप्ने ब्रूञ् व्यक्तायां वाची, हुदानादानयोः ओहाङ्गतौ, डुधाञ् दानधारणयोः, दिवु क्रीडाविजिगीषाव्यवहारद्युतिषु षूङ्प्राणिप्रसवे, णह बन्धने, षुञ् अभिषवे, अशू व्याप्तौ चिञ् चयन, तुद व्यथने मृङ्प्राणत्यागे मुच्लृ मोक्षणे, रुधिर आवरणे भुज पालनाभ्यवहारयोः युजिर् योग, तनु विस्तारे मनु अवबोधने डुकृञ् करणे, डुक्रीञ् द्रव्यविनिमये वृङ् सम्भक्तौ ग्रह उपादाने, चुर स्तेये पाल रक्षणे अर्च पूजायां, इति त्रयस्त्रिंशद्धातवः ।।

'त्रयो लकारा भूतार्थस्त्रयो भाव्यर्थवाचकाः ।
एकोऽत्र वर्त्तमानार्थे आशीर्विध्यादिषु द्वयम् ।।' (१)

भूतमात्रं लुङोऽर्थः स्याद् भाविमात्रं लृटो भवेत् ।
अनद्यतनभूते लङ् भाव्यनद्यतने लुटः ।।
पदप्रयोका चादृष्टो भूतानद्यतनो लिटः ।
क्रियान्तरातिपत्तौ तु भाव्यनद्यतनो लृङः ।।
वर्त्तमानो लटोऽर्थः स्यादाशीर्विध्यादिवाचकौ ।
लिङ्लोटौ लेट्प्रयोगस्तु वेदेष्वेव यथाक्रमम् ।।
अद्याभूत् सारथिः कृष्णो भविष्यति जयोऽद्य नः ।
भूतेऽहन्यभवत् क्लेशो जयः श्वो भविता मम ।।
भूतेऽहनि जयस्तस्य बभूव किल पापिनः ।
श्वो न चेच्छरणायातो नाभविष्यत् सुयोधनः ।।
धर्मराजो भवत्यत्र भवेत् सेनास्य सन्निधौ ।
जयो भवतु नः कृष्णः भूयादित्याशिषं वद ।।

तत्र प्रथमं शब्विकरणेषु भूवादिषु धातुषु प्रथमभूतात्अकर्मकात् परस्मैपदिनोऽकर्मकाद् भू इत्यस्माद्धातोः परस्य लकारस्य स्थाने तिङ्.विभक्तिर्योज्यते,भूसत्तायाम् भू इति स्थिते धातुसंज्ञायां वर्त्तमाने लट् ३-२-१२३ लस्येति वर्त्तमानेति प्तसुझिसिप्थस्थमिब्वस्मस्तातांझथा-साथांध्वमिड्वहिमहिङि 3-4-78 ति लस्यतिबादय आदेशाः भवन्ति इति सामान्येन तिबादिषु प्राप्तेषु 'शेषात्कर्तरिपरस्मैपदम्' -१-३-७८ उपयुक्तादन्यो यः स शेषः येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदं न विहितं तेभ्यः परस्य लकारस्य स्थाने कर्त्तरि परस्मैपदम् भवति, 'तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः'१-४-१०८ तिङस्त्रीणि त्रीणि पदानि भूत्वा परस्मैपदमात्मनेपदं च प्रथमपुरुषमध्यमपुरषोत्तमपुरुषसंज्ञानि भवन्ति । 'शेषे प्रथमः' १-४-१०५ इति मध्यमोत्तमविषयादन्य उच्यते यत्र युष्मदस्मदी समानाधिकरणेन स्तः तत्र शेषे प्रथमपुरुषो भवति 'तान्येकवचनद्विवचनबहुवचनान्येकशः' १-४-१०२ तानि तिड.स्त्रीणित्रीणि पदानि भूत्वा एकश एकवचनद्विवचनबहुवचनसंज्ञानि भवन्ति, इत्येकार्थविवक्षायामेकवचनं

तिप् 'तिङ्. शित् सार्वधातुकं' ३-४-११३ शपगुणावादेशौ भवति तौ भवतः। 'झोऽन्तः' ७-१-३। प्रत्ययावयवस्य झकारस्य अन्त इत्ययमादेशो भवति अकार उच्चारणार्थः भवन्ति 'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' १-४-१०५ युष्मद्युपपदे समानाधिकरणे समानाभिधेये व्यवहिते चाव्यवहिते च स्थानिन्यप्रयुज्यमानेऽपि प्रयुज्यमानेऽपि मध्यमपुरुषो भवति त्वं भवसि युवां भवथः यूयं भवथ स्थानिनि-भवसि भवथः भवथ, 'अस्मद्युत्तमः' १-४-१०७ अस्मद्युपपदे समानाधिकरणे समानाभिधेये व्यवहिते चाव्यवहिते च स्थानिन्यप्रयुज्यमानेऽपि प्रयुज्यमानेऽपि उत्तमपुरुषो भवति 'अतो दीर्घो यञि' ७-३-१०१ अकारान्तस्याङ्गस्य यञादौ सार्वधातुके परतो दीर्घो भवति अहं भवामि आवां भवावः वयं भवामः समानाधिकरण इति किम् त्वया कंम्बलो अनुभूयते मया कम्बलोऽनुभूयते।।

एध वृद्धौ अकार आत्मनेपदार्थः 'अनुदात्तङित आत्मनेपदम्' १-३-१२ अनुदात्तेतो ये धातवः तेभ्यो ङिद्भ्यश्चात्मनेपदं भवति टित आत्मनेपदानां 'टेरेः' ३-४-७९ टितो लकार स्थानेषु तिङ्क्षु यान्यात्मनेपदानि विहितानि तेषां टेरेकारादेशोभवति ।

टित इत्यादिसूत्रेऽस्मिन्नात्मनेपदमे विधौ ।
यत्तु तत्तङ् विजानीयात् तिङ एवानुवर्त्तनात् ।।

प्रकृतैस्तिङ्भिरात्मनेपदानि विशिष्यन्ते एधते 'अतोयेय' इत्यधिकृत्य 'आतो ङितः' 7-2-51 अकारान्तादङ्गादुत्तरस्य ङिदवयवस्याकारस्य इय् इत्ययमादेशो भवति 'लोपो व्योर्वलि '6-1-66 यकारलोपः एधेते, एधन्ते, 'थासः से' 3-4-80 टितो लकारस्य थासः से इत्ययमादेशो भवति 'थासः स' इति वक्तव्ये 'से' इत्युक्तमादेशानां टेरेत्वं न भवतीति ज्ञापनार्थं एधसे एधेथे एधध्वे एधे एधावहे एधामहे ।।

'डुपचष् पाके' अकारः 'स्वरितञितः कर्त्रभिप्राये क्रियाफल' इति विशेषणार्थः ''स्तरितञितः कर्त्रभिप्राये क्रियाफले'' १-३-७२ स्वरितेभ्यो धातुभ्योञि द्भ्यश्चात्मनेपदं भवति कर्त्तारं चेत् क्रियाफलमभिप्रैति पचति पचतः पचन्तीत्यादि पचते पचेते पचन्त इत्यादि ।।

अथ तिङन्तपदानयनमार्गमाह -

''धातोरुक्तिर्यथापाठं पुनर्धातुतदर्थयोः ।
विभज्य कथनं धातुर्धातुसंज्ञानुबन्धलुक् ।।
पश्चात् केवलधातूक्तिर्धातुसंस्कार एव च ।
धातुभ्योऽथ लकाराः स्युस्तेषामप्यनुबन्धलुक् ।।
लस्य स्थाने विभक्तिश्च तस्या अप्यनुबन्धलुक् ।
सार्वधात्वादिसंज्ञा च तत्र स्युः सार्वधातुके ।।
शबादिप्रत्ययास्तेषां शकाराद्यनुबन्धलुक् ।
यथास्वं प्रक्रिया पश्चात् कमोऽयं तिङ्षिभक्तिषु ।।''इति ।।

धातुत्वमात्रप्रयुक्तो वर्णागमो वर्णविकारश्चात्र धातुसंस्कार इति परिभाषितः स च 'टुणदि समृद्धा'वित्यादिषु द्रष्टव्यः ।तत्र सार्वधातुके -

'धातोः परे लकाराः स्युर्लकाराणां तिबादयः ।
मध्ये धातुविभक्तयोश्च प्रत्ययाः स्युः शबादयः ।।

यथास्वं प्रक्रिया पश्चात् क्रमोऽयं सार्वधातुके ।।' इति क्रमः ।

शब्विकरणम्

भवतीति पदे 'भू सत्तायाम्' भू इत्ययं धातुः सत्तायां वर्त्तने भू इति स्थिते भूवादयो धातवः 1-3-1 इति धातुसंज्ञा ततो धात्वधिकारविहितानेकप्रत्ययप्रसङ्गे वक्तुर्विवक्षितपूर्विका शब्दप्रवृत्तिरिति विवक्षावशाद् वक्ता वर्त्तमानार्थे विवक्षिते 'वर्त्तमाने लटि'ति लट् प्रत्ययः भू लट् टकारस्य 'हलन्त्य'मितीत्संज्ञा 'अदर्शनं

लोप' इति लोपसंज्ञा 'तस्य लोप' इति लोपः प्रयोजनम् टित आत्मनेपदानां टेरे इत्यस्मिन् सूत्रे टित् इति विशेषणम् । भू ल अकारस्य उपदेशेजनुनासिक इत् इतीत्संज्ञा अदर्शनं लोप इति लोप संज्ञा तस्य लोपः इति लोपः प्रयोजनम् विदो लटो वे ३-४-८३ त्यस्मिन् सूत्रे लट् इति विशेषणम् भूल "तिप्तस्झिसिप्थस्थमिब्वस्मस्तातां झथासाथांध्वमिड्वहिमहिङ् ३-४-७५ ति लकारस्य स्थाने सामान्येन तिबादिषु प्राप्तेषु विभक्तिश्चे १-४-१०४ ति विभक्तिसंज्ञा लः परस्मैपद १-४-९९ मिति परस्मैपदसंज्ञा 'शेषात् कर्तरि परस्मैपद' १-३-७८ मिति परस्मैपदे तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः १-४-१०१ इति पुरुष संज्ञा शेषे प्रथमः १-४-१०८ इति प्रथमपुरुषे तान्येकवचनद्विवचन बहुवचनान्येकशः १-४-१०२ इति वचनसंज्ञा द्वेकयोर्द्विवचनैक वचने १-४-२२ इत्येकार्थविवक्षायां परस्मैपद प्रथमपुरुषैकवचन तिप् । पकारस्य 'हलन्त्य' मितीत्संज्ञा 'तस्य लोप' इति लोपः प्रयोजनम् । अनुदात्तौ सुप्पितावित्यस्मिन् सूत्रे पित् इति विशेषणम् भूति 'तिङ्शित् सार्वधातुक' ३-४-११३ मिति सार्वधातुकसंज्ञा कर्त्तरिशबि ३-१-६५ ति शप्प्रत्ययः भूशप् ति शकारः सार्वधातुकसंज्ञार्थः पकारः पित्कार्यार्थः भूअ ति सार्वधातुकार्धधातुकयो ७-३-८४ रिति गुणः शपो अ ति एचोऽयवायाव इत्यवादेशः भ् अव् अ ति श्लिष्टोच्चारणं कर्त्तव्यं, भवति ।

'भवत' इति पदे भू सत्तायामिति स्थिते 'भूवादयो धतव' इति धातु संज्ञा 'वर्त्तमाने लटी' ति लट् प्रत्ययः, अनुबन्धलोपः भू ल्, 'तिप्तसि' इति लकारस्यस्थाने सामान्येन तिबादिषु प्राप्तेषु 'विभक्तिश्चेति' विभक्तिसंज्ञा, लः परस्मैपदमिति परस्मैपदसंज्ञा शेषात् कर्त्तरि परस्मैपदमिति परस्मैपदे 'तिङस्त्रीणी'त्यादिना इति पुरुषसज्ञा 'शेषे प्रथम' इति प्रथम पुरुषे तान्येकवचनेत्यादिना वचनसंज्ञा, 'द्व्येकयोरिति' द्व्यर्थविवक्षायां परस्मैपद प्रथमपुरुषद्विवचनं तस्, भू तस् 'तिङ्शिदित्यादिना' सार्वधातुक संज्ञा, 'कर्त्तरि शपि' ति शप्, भू शप् तस्, अनुबन्धलोपः भू अ तस्, 'सार्वधातुके'त्यादिना गुणः भो अतस्, अवादेशः भवतस् रुत्वविसर्गौ भवतः ।

'भवन्ति' इति पदे 'भू सत्तायां' 'भूवादयो' इति धातुसंज्ञा 'वर्तमाने लटि'ति लट्, भू लट्, अनुबन्धलोपः, भू ल्, 'तिप्तसि'त्यादिना लस्य सामान्येन तिबादिषुप्राप्तेषु विभक्तिसंज्ञा 'लः 'इत्यादिना परस्मैपदसंज्ञा 'शेषादि'त्यादिना परस्मैपदे 'तिङस्त्रीणी' त्यादिना पुरुषसंज्ञा 'शेषे प्रथम'इति प्रथम पुरुषे बहुवचने इत्यादिना वचनसंज्ञा 'बहुषु बहुवचनमि'ति बह्वर्थविवक्षायां परस्मैपदप्रथमपुरुषबहुवचनं झि , भू झि 'तिङ्शित्' इति सार्वधातुकसंज्ञा, 'कर्त्तरीति शप् 'भू शप् झि, अनुबन्धलोपः भू अ झि, 'सार्वधातुके'ति गुणः भो अ झि अवादेशः, भवति 'झोऽन्त '७-१-३ इति हल्मात्रस्य झकारस्यान्तादेश । भव अन्त इ तकारेऽकारउच्चारणार्थः भव अन्त् इ, भव अन्ति, पररूपत्वं भवन्ति । भवसीति पदे भू सत्तायां, 'भूवादय'इति धातुसंज्ञा । लट् भू लट् भू ल्, 'तिप्तस्झी'ति लस्यसामान्येषु तिबादिषु प्राप्तेषु विभक्तिसंज्ञा, 'लः' इति परस्मैपदसंज्ञा 'शेषादि' ति परस्मैपदे 'तिङस्त्रीणी'ति पुरुषसंज्ञा युष्मद्युपपद इत्यादिना मध्यमपुरुषे तान्येकवचने इति वचनसंज्ञा 'द्व्येकयो' रित्येकार्थविवक्षायां परस्मैपदमध्यमपुरुषैकवचनं सिप्, पकार लोपः भू सि, 'तिङ्शिदि'ति सार्वधातुक संज्ञा, शप्, भू शप् सि, भू अ सि, 'सार्वधातुके' तिगुणः, भो अ सि, अवादेशः, भवसि । भवथ इति पदे, भू, भू ल्, 'तिप्तसि'त्यादिना सामान्येन तिबादिषु प्राप्तेषु विभक्तिसंज्ञा परस्मैपदसंज्ञा, 'शेषादि'तिपदपरस्मैपदे 'तिङस्त्रीणीत्रीणी'ति पुरुषसंज्ञा 'युष्मद्युपदे' इत्यादिना मध्यमपुरुषे 'तान्येकवचने' इति वचनसंज्ञा 'द्व्येकयो' इति अर्थविवक्षायां परस्मैपदमध्यमपुरुषद्विचनं थस्, भू थस् 'तिङ्शिति'त्यादिना पूर्ववत्गुणावदेशः, भवथस्, रुत्वविसर्गौ भवथः । भवथेति पदे भू पुरुषसंज्ञा 'युष्मद्युपपदे' इति मध्यमपुरुषे 'तान्येकवचने'त्यादिना वचनसंज्ञा, बहुवचनं इति बह्वर्थविवक्षायां परस्मैपदमध्यमपुरुषबहुवचनं थ, भू थ, 'तिङ्.शित्' इत्यादिना पूर्ववच्छब्गुणावादेशाः भवथस् रुत्वविसर्गौ भवथः ,भवामीति पदे भू सत्तायां 'अस्मद्युत्तमः' १-४-१०७ इति पुरुष संज्ञा, अस्मद्युत्तमः इति उत्तमपुरुषे तान्येकेत्यादिना इति वचनसंज्ञा, द्वयेकयारेकवचने इति एकार्थविवक्षायां परस्मैपद

उत्तमपुरुषैकवचनं, मिप्, भू, मिप्, पकारलोपः भू मि, 'तिङशिद'ादिना सार्वधातुकसंज्ञा, पूर्ववच्छब्गुणावादेशः, भव मि 'अतोदीर्घोयञी' ७-३-१०१ तिदीर्घः भवामि ,भवाव इतिपदे भू सत्तायां इति पुरुषसंज्ञा 'अस्मद्युत्तम' इत्युत्तमपुरुषे 'तान्ये' इति द्विवचनसंज्ञा, द्व्येकयो इति अर्थविवक्षायां परस्मैपदोत्तमपुरुषद्विवचनं वस्, भू वस्, 'तिङशित'ादिना सार्वधातुक संज्ञा पूर्ववतच्छब्गुणावादेशः, भव वस्, 'अतोदीर्घो यञीति' दीर्घः, रुत्वविसर्गौ भवावः, भवामः इतिपदे भू सत्तायां इति तिङस्त्रीणीत्यादिना पुरुषसंज्ञा, अस्मद्युत्तम इत्युत्तमपुरुषे तान्येकवचने द्विवचन संज्ञा, बहुष्विति बहुवचन संज्ञा, बहुवचनविवक्षायां परस्मैपदोत्तमपुरुषबहुवचनम् मस्, भू मस् तिङ्शित् सार्वधातुकसंज्ञा पूर्ववच्छब्गुणावादेशः, भवमस्, अतो दीर्घो यञीति दीर्घ भवामस्, रुत्वविसर्गौ भवामः

एधत इति पदे एधवृद्धौ एधइत्ययं धातुर्वृद्धौ वर्त्तते । एध 'भूवादय' इति धातु संज्ञा, धकारेऽकार 'उपदेशेऽजनुनासिक इत्'इतीत्संज्ञा, 'अदर्शनंलोप' इति लोपसंज्ञा 'तस्यलोप'इति लोपः प्रयोजनं 'अनुदात्तङित आत्मनेपद'मित्यस्मिन्सूत्रेअनुदात्तेन इति विशेषणं, एध्, तत् धात्व-वृत्तिरिति विवक्षा वचनाद् वक्त्रा, वर्त्तमानार्थे विवक्षिते 'वर्त्तमानेलटि'ति लट्प्रत्ययः, लट्, एधल्, 'तिप्तस्झि' इत्यादिना लस्यस्थाने सामान्येन तिबादिषु प्राप्तेषु 'विभक्तिश्चे'ति विभक्तिसंज्ञा, 'तङानावात्मनेपदं' १-४-१०० मित्यात्मनेपदसंज्ञा, 'अनुदात्तङितआत्मनेपदमित्यात्मनेपदं' 'तिङस्त्रीणीत्यादिना' पुरुषसंज्ञा 'शेषे प्रथम' इति प्रथमपुरुषे तान्ये -इत्यादिना एकार्थविवक्षायामात्मनेपदप्रथमपुरुषैक वचनं, एध् तङ् एधत 'तिङ् शित् सार्वधातुके'तिसंज्ञा, शप् , एध्, अत्, एधत, 'टितआत्मनेपदानां टेरे' ३-४-७९ इति टेरत्वं, एधते एधेते इति पदे एध, तिबातिषु प्राप्तेषु विभक्ति संज्ञा, 'तङानावात्मनेपदम्' इत्यात्मनेपदसंज्ञा 'अनुदात्तङितावात्मनेपदमित्यात्मनेपदे' 'तिङस्त्रीणामि'त्यादिना पुरुषसंज्ञा 'शेषे प्रथमे'ति प्रथमपुरुषे 'तान्ये'त्यादिना वचनसंज्ञा 'द्व्येकयो' इति अर्थविवक्षायामात्मनेपदप्रथमपुरुषद्विवचनं आतां । एध आताम् एधेताम् ।

सार्वधातुकसंज्ञायां शप् एध् अ आताम् एध आताम् 'सार्वधातुकमपि'दि १-२-४ ति ङिद्वत्भावे 'अतोङित' ७-२-८१ इत्याकारस्येय् इत्ययमादेशः । एध इय् ताम्, 'लोपोव्योर्वलि' ६-१-६६ इति यकारलोपः एध इताम्, 'आद्गुण' इति गुणः, एधएताम् टेरत्वम् एधेते, एधन्त इति पदे एध्, वचन संज्ञा, बहुष्विति बहुत्वविवक्षायां आत्मनेपद प्रथमपुरुषबहुवचनं झ, एध झ, 'तिङ्. शित्सार्वधातुकं' सार्वधातुकत्वात् शप्, एध् अ झ, 'झोऽन्त' इत्यन्तादेशः एध अन्त अ, तकारेऽकारउच्चारणार्थः, एध अन्त् अ एध अन्त पररूपत्वं, एधन्त टेरत्वं, एधन्ते, एधस इतिपदे एध्, पुरुषसंज्ञा युष्मद्युपपदं इति मद्यमपुरुषे 'तान्ये' इत्यादिना एकार्थविवक्षायां आत्मनेपदमध्यमपुरुषैकवचनं थास्, एध थास्, 'तिङ शित्' इति सार्वधातुकसंज्ञा कर्त्तरीति शप्, एध् अ थास्, एध 'थासः से' ३-४-८० इति थासः से इत्ययमादेशः एधसे, एधेथ इतिपदे एध् 'तिङस्त्रीणी'ति पुरुषसंज्ञायुष्मद्युपपदइति मध्यमपुरुषे तान्येतिवचनसंज्ञा द्व्येकयोरिति अर्थविवक्षायामात्मनेपदमध्यमपुरुषद्विवचनम् आथाम्, एध आथाम् तिङ्शित् सार्वधातुकसंज्ञा शप्, एध्, आथाम्, 'सार्वधातुकमपिति' ति ङिद्वत्भावे 'आतोङित' इत्याकारस्येय् इत्ययमादेशः एध इय आथाम् 'लोपो व्योर्वलि' इति यकारलोपः एध इताम्, गुणः, एधेथाम् टेरत्वम् एधेथे, एधत्व इति पदे एध् तिङस्त्रीणीतिपुरुषसंज्ञायुष्मद्युपपद इति मध्यमपुरुषे तानिइत्यादिनावचनसंज्ञा बहुष्विति बह्वर्थविवक्षायामात्मनेपद मध्यमपुरुषबहुवचनं एध् ध्वम् शप् एध ध्वम्'अनचिचे' तिद्वत्वं एधध् ध्वम् 'झलां जश् झशी'ति मध्ममधकारस्य जश्त्वं एधद् ध्वम्, टेरेत्वं एधद्वे, एधे इति पदे 'तिङस्त्रीणी'ति पुरुषसंज्ञा 'अस्मद्युत्तम' इत्युत्तमपुरुषे 'तान्ये' -इत्यादिना वचन संज्ञा 'द्व्येकयोरित्यादिना एकार्थविक्षायामात्मनेपदो-त्तमपुरुषैकवचनमिट् एध् इट् टकारलोपः एध् इ 'तिङ् शित्' इति सार्वधातुकसंज्ञा शप् एध् अ इ ,एध इ गुणः एधे एधावह इति पदे एध 'तिडस्त्रीणीति' पुरुषसंज्ञा 'अस्मदद्युत्तम' इत्युत्तमपुरुषे 'तानी' इत्यादिना वचनसंज्ञा 'द्व्येकया'रिति द्व्यर्थ विवक्षायामात्मनेपदोत्तमपुरुषद्विवचनं वहि, एध् वहि तिङ्शित् शप् एध

वहि 'अतो दीर्घो यञी' ति दीर्घः एधावहि टेरेत्वम् एधावहे ,एधामह इति पदे एध 'तिङ.स्त्री—त्तमाः'इति पुरुषसंज्ञा अस्मद्युत्तम इत्युत्तमपुरुष 'तान्य....शः' इति वचनसंज्ञा बह्वर्थविवक्षायामात्मनेपदोत्तमपुरुषबहुवचनन महिङ् एध् महिङ् एध महि 'अतो दीर्घोयञी'ति दीर्घः एधामहि टेरेत्वम् एधामहे ।।

एवमुत्तरत्रापि धातोः परत्वेन लकारे कृते लस्य स्याने विभक्तिष्वादिश्यमानासु यथाविवक्षं पदपुरुषवचनानि संयोज्य पुनः सार्वधातुकं चेद् धातुविभक्त्योर्मध्ये शबादीन् निधाय यथान्यायं पदान्यानेतव्यानि ।।

"वन्दे गिरीशं गिरिजासमेतं कैलासशैलेन्द्रलतागृहस्थाम् ।
अङ्के निषण्णेन विनायकेन स्कन्देन चात्यन्तसुखायमानम् ।।
धातोः परे लकाराः स्युर्लकाराणां तिबादयः ।
मध्ये धातुविभक्त्योश्च प्रत्ययाः स्युः शबादयः ।।
यथास्वं प्रक्रिया पश्चात् क्रमोऽयं सार्वधातुके ।
लट् लङ् लोट् लिङ् चेत्येते चत्वाराः सार्वधातुकम् ।।
आशीर्लिङ् लिट् लुङ् लुट् लृट् लृङित्येते षडार्धधातुकम् ।।"
"आथादौ शब्विकरणे नदिध्वंस्योः स्वसंस्कृतिः ।
पुनः सर्वत्रोक्तनीत्या कृते शपि भुवः पुनः ।।
गुणः स्यात् सार्वधात्वादिनावादेशस्ततः परम् ।
भवेद्वेञस्त्वयादेशः कृतेष्वेषु यथाक्रमम् ।।
भवैधादिपदांशाः स्युस्तिबादिप्रत्ययान्विताः ।
इह णो नश्चेदितो नुम् धातोर्नश्चापदेति च ।।
स्यादनुस्वारस्य ययीत्यथ नन्दति सिध्यति ।।
नश्चापदेत्यनुस्वारे कृते ध्वंसिति सिध्यति ।।" इति ।।

'भूसत्तायाम्' भू 'वर्त्तमाने लडि'ति लट् अनुबन्धलोपः भूल्' तिप्तस्झी'ति लस्य स्थाने ति बादयः अनुबन्धानां पकाराणां लोपः 'कर्तरि शबि'ति धातोः शप्

शकारपकारयोर्लोपः । भूअति भू अतसित्यादि 'सार्वधातुकार्धधातुकया'रिति गुणः । भो अति तिबादेशः एषुकृतेषु भवति भवतसित्यादयः सिध्यन्ति, 'भूवादयो धातवः' १-३-९ भू इत्येवमादयः शब्दाः क्रियावाचिनो धातुसंज्ञा भवन्ति 'वर्त्तमाने लट्' ३-२-१२३ प्रारब्धोऽपरिसमाप्तश्च वर्त्तमानः तस्मिन् वर्त्तमानार्थे वर्त्तमानाद् धातोर्लट्प्रत्ययो भवति, 'कर्त्तरिशप्'३-१-६८ कर्तृवाचिनि सार्वधातुकेपरतो धातो श्प्प्रत्ययो भवति 'तिङ्शित् सार्वधातुकम्' ३-४-११३ तिङः शितश्च धातुविहताः प्रत्ययाः सार्वधातुकसंज्ञा भवन्ति, 'सार्वधातुकार्धधातुकयोः' ७-३-५४ सार्वधातुक आर्धधातुके च परत इगन्तस्याङ्गस्य गुणो भवति 'एचोऽयवायावः' ६-१-७८ एचः स्थाने यथासंख्यं 'अय् अव् आय् आवि'त्येत आदेशाभवन्त्यचिपरतः संहितायाम्।। एध वृद्धौ एध अकार आत्मनेपदार्थः । एध् लट् लस्य तङ् अनुबन्धयोष्टकारङकारयोर्लोपः शप् एषु कृतेषु एधत एध आतामित्यादयः सिध्यन्ति।

डुपचष् पाके डुपचष् 'भूवादयो धातव' इति धतुसंज्ञा अनुबन्धलोपः पच् लट् लस्य तिङादिषु सामान्येन प्राप्तेषु 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' १-३-७२ इति क्रियाफलस्य कर्तृगामित्वविवक्षायामात्मनेपदम् अन्यदा परस्मैपदम् अनुबन्धानां पकारटकारङकाराणां लोपः शप्, एषु कृतेषु पचति पचत तिबादयः पचत पचआतामित्यादयश्च सिध्यन्ति ।।

टुणदि समृद्धौ 'धातोरुक्तिर्यथापाठमित्यादिनोक्त'मत्र साकल्येन द्रष्टव्यम् टुणदीत्ययं धातुः समृद्धार्थे वर्त्तते । टुणदीतिस्थिते 'णोन' ६-९-६५- इति णकारस्य नकारादेश 'इदितो नुम् धातो' ७-१-५८ रिति नुमागमे नुमो मित्वात् 'मिदचोऽन्त्यात् पर' इत्यान्त्यादचः परो भवति, नुनूकार उच्चारणार्थः मकारो देशविध्यर्थः । नन् द् इति धातुसंस्कारः नकारस्य 'नश्चापदान्तस्य झली त्यनुस्वारः नंद् 'अनुस्वारस्ययथि परसवर्ण' इति अनुस्वारस्य परसवर्णादेशः नन्द् लट् नन्द् लट् अनुबन्धयोरकारणकारयोः लोपः नन्द्ल् लस्य तिबादयः नन्द् तिप् इत्यादि अनुबन्धानां पकाराणां लोपः नन्दति 'तिङशिदि' ति सार्वधातुकसंज्ञा कर्त्तरि शबतिति शप्

नन्द् शप् ति शकार पकारयोर्लोपः नन्द् अति एषु कृतेषु नन्दति नन्दतीत्यादयः सिध्यन्ति णोनः धात्वादेर्णकारस्य नकारादेशो भवति इदितोनुम् धतोः इदितो धातोर्नुमागमो भवति नश्चापदान्तस्य झलि नकारस्य मकारस्य चापदान्तस्य झलि परतोऽनुस्वारादेशो भवति । अनुस्वारस्य ययि परसवर्णः अनुस्वारस्य ययिपरतः परसवर्णादेशो भवति 'मिदचेऽन्त्यात्' परः अचां सन्निविष्टानामन्त्यादचः परो मिद् भवति ।।

ध्वन्सु गतौ च ध्वन्सु उच्चारणार्थः 'नश्चापदान्तस्ये'ति नस्यानुस्वारः ध्वंस् लट् लस्य तङ् अनुबन्धयोष्टकारकारयोःलोपः शप् एषु कृतेषु ध्वंस् त ध्वंस् आतामित्यादयः सिध्यन्ति ।।

व्येञ् संवरणे ,व्येञ् ञकारः 'स्वरिताञित' इत्यत्र विशेषणार्थः व्ये लट् लस्य तिबादयः अनुबन्धानां पकारटकारङकाराणां लोपः शप् व्ये अतीत्यादि अयादेशः एषु कृतेषु व्ययति व्ययतस्तिबादय व्ययत व्यय आतामित्यादयस्च सिध्यन्ति

।। इति शब्विकरणम् ।।

अथ लुग्विकरणम्

अथातो लुग्विकरणे कृते शपि शपः पुनः ।
लुक् स्याददि प्रभृत्यादि सूत्रेणैषु कृतेष्वथ ।।
शीङो गुणः स्यादङ्गस्य परतः सार्वधातुके ।
अदिति स्यात् तदादेशे बुर्वोऽशाः प्रत्ययान्विताः । इति।

अदभक्षणे, अद अकार उच्चाराणार्थः अद्लट् लस्य तिबादयः तेषामनुबन्धलोपः शप् अदअतीत्यादि अदिप्रभृतिभ्यः सिध्यन्ति "अदिप्रभृतिभ्यः शपः" अदादिभ्यो धातुभ्य उत्तरस्य शपो लुग्भवति ।। "शीङ् स्वप्ने", शीङ्, ङकार आत्मनेपदार्थः शील्, लस्यतङ् अनुबन्धयोर्लोपः शप् शी अत "अदिप्रभृतिभ्यः

शपः'' शपोलुक् शीत ''शीङ् सार्वधातुके गुण'' ७-४-२१ इतिगुणः एषुकृतेषु शेत आतामित्यादयः सिध्यन्ति ।।

ब्रूञ् व्यक्तायां वाचि ब्रूञ् ञकारलोपः ब्रू ल् लस्य तिबादयः अनुबन्धानां लोपः शप् बू अतीत्यादि ''अदिप्रभृतिभ्य शप'' इति शपो लुक् एषु कृतेषु ब्रूतीत्यादयः ब्रूत इत्यादयश्च सिध्यन्ति 'शीङ सार्वधतुकेगुणः' शीङोऽङ्गस्य गुणो भवति सार्वधातुके परे ।

इति लुग्विकरणम्

अथ श्लुविकरणम्

श्लुसंज्ञके विकरणे कृते शपि शपः पुनः ।
श्लुःस्याज्जुहोत्यादिभ्यः श्लुः प्रत्ययादर्शनं हि सः ।।
हुदानादनयोरित्यत्र हुकारस्य च कथ्यते,
तस्य आतां श्लाविति द्वे तत्पूर्वोऽभ्याससंज्ञकः ।।
अभ्यासस्याथ होश्चुत्वं छकारः स्यात् कुहोश्चुना ।
झस्यजश्त्वं जकारः स्यादभ्यासे चर्चसूत्रतः ।। इति ।।

हु दानादानयोः हु लट् । लस्य तिबादयः अनुबन्धानां लोपः धातोः शप् अनुबन्धलोपः हु अति 'जुहोत्यादिभ्य श्लु' २-४-७५ रिति शपः श्लुः हुति 'श्लौ' ६-१-१० इति हुकारस्य द्वित्वम् हुहुति 'पूर्वोभ्यास' ६-१-४ इति पूर्वस्य हुकारस्याभ्याससंज्ञा 'कुहोश्चु' ७-४-६२ रित्यभ्याससंज्ञकस्य हकारस्य श्चुत्वं झकारः झुहुति 'अभ्यासे चर्च'८-४-५४ सकारस्य जश्त्वं जकारः एषु कृतेषु जुहुति जुहुतसित्यादयः सिध्यन्ति।

ओहाङ् गतावित्यत्र च हकारस्याथ कथ्यते ।
प्राग्वद् द्वित्वादिजश्त्वन्तं हाकारस्य पुनर्भृञाम् ।।
इदित्यनेनचाकारस्याभ्यासस्य त्विकारता ।। इति।।

ओहाङ् गतौ ,ओहाङ् ङकारलोपः ओकार 'ओदितश्चे' ति विशेषणार्थः हा लट् लस्य तङ् अनुबन्धयोष्टकारङकारयोर्लोपः हात शप् हा अत् 'जुहोत्यादिभ्यः श्लु'रिति शपः श्लुः हा त 'श्ला' विति द्वित्वम् हाहा त 'पूर्वोऽभ्यास' इति पूर्वहकारस्याभ्याससंज्ञा 'कुहोश्चु'रित्यभ्याससंज्ञकस्य हाकारस्य चुत्वं झकारः झहाते 'अभ्यासे चर्चे'ति झकारस्य जश्त्वं जकारः जा हात 'भृञामिति' ७-४-७६ त्यभ्यासस्येकारादेश स च जकारात् परस्याकरस्य भवति एषुकृतेषु जिहात जिहा आतामित्यादयः सिध्यन्ति

डुधाञ् दानादिके धातौ धकारस्याथ कथ्यते ।
द्वित्वाद्यभ्याससंज्ञान्तं धाकारस्यापि पूर्ववत् ।।
ह्रस्वोऽभ्यासस्य जश्त्वं चाप्यभ्यासे चर्चसूत्रतः ।
क्रमेणैव जुहुजिहादधाः स्युः प्रत्ययान्विताः ।। इति।।

डुधाञ् दानधारणयोः डुधाञ् डुकारञकारयोर्लोपः धा लट् लस्य तिबादयः अनुबन्धानां लोपः शप् धा अ ति 'जुहोत्यादिभ्य श्लु'रिति शपः श्लुः ,धा ति 'श्ला'विति द्वित्वम् धा धा ति 'पूर्वेऽभ्यास' इति पूर्वस्य धकारस्याभ्याससंज्ञा 'ह्रस्व' ७-४-५९ इत्यभ्यासाचो ह्रस्वत्वम् 'अभ्यासे चर्चे'ति पूर्वधकारस्यजश्त्वं दकारः एषु कृतेषु दधातीत्यादयः दधात इत्यादश्च सिध्यन्ति ,'जुहोत्यादिभ्य श्लुः' जुहोत्यादिभ्यो धातुभ्य उत्तरस्य शपः श्लुर्भवति 'श्लौ' ,श्लौ परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः 'पूर्वोऽभ्यासः' अस्मिन् प्रकरणे ये द्वे विहिते तयोः पूर्वोऽवयवयोऽभ्याससंज्ञो भवति, 'कुहोश्चुः' अभ्यासस्य कवर्गहकारयोश्चवर्गादेशो भवति, 'अभ्यासे चर्च' अभ्यासे वर्तमाननां झलां चरादेशो भवति, चकाराज्जश्त्वं च ,'भृञामित्'भृञ् माङ् ओहाङित्येतेषामभ्यास्येकारादेशो भवति 'ह्रस्वः' अभ्यासस्य ह्रस्वो भवति।।

इति श्लु विकरणम् ।।

अथ श्यन्विकरणम्

स्यादादौ श्यन्विकरणे धात्वादेः षः स इत्यपि ।
णोनश्चोक्त क्रमेणाथ दिवादिभ्य इति श्यनि ।।
कृतेऽत्र दिविधातोस्तु दीस्तु दीर्धः स्याजझलि चेत्यतः
द्वित्वं स्याद्वकारस्य सूत्रेणानाचिचेति तत् ।।
एवं कृतेदीव्यसूयनह्याः स्युः प्रत्ययान्विताः ।
इत अद्यपि यथा तथैव प्रक्रिया श्यनि ।। इति ।।

दिवु क्रीडाविजिगीषाभ्यवहारद्युतिस्तुतिगतिषु, दिवु इत्ययं धातुः क्रीडाद्यर्थे वर्तत्ते, दिवु 'भूवादयो धातव' इति धतुसंज्ञा, उकार 'उदितश्चे' ति विशेषणार्थः दिव् लट् । लस्य तिबादयः अनुबन्धलोपः दिव् ति इत्यादि 'दिवादिभ्य श्यन्नि' ३-१-६९ ति धातोः श्यन्प्रत्ययः शकारनकारयोर्लोपः दिव्यति'हलिचे' ८-२-७७ ति वकारान्तस्य धातोरुपधायाः दीर्घः दीव् य ति 'अनचिचे'ति वकारस्य द्वित्वम् एषु कृतेषु दीव्यति दीव्यसीत्यादयः सिध्यन्ति ।

'दिवादिभ्यः श्यन्' दिवादिभ्यो धतुभ्यः श्यन्प्रत्ययोभवति कर्तृवाचिनि सार्वधातुकेपरतः शपोऽपवादः 'हलिच' रेफवकारान्तस्य धातोरुपधाया इको दीर्घो भवति हलि परतः । 'अनचि च' अच उत्तरस्य यरो द्वे भवतः अनचि परतः।

'षूङ् प्राणिप्रसव' षूङ् डकारलोपः षू 'धात्वादेः षः स' ६-१-६८ इति षकारस्य सकारः सू लट् लस्य तङ् अनुबन्धयोर्लोपः 'दिवादिभ्यः श्यन्नि'ति धातोः श्यन्प्रत्ययः एषु कृतेषु सूयत सूय आतामित्यादयः सिध्यन्ति "धात्वादेः षः सः" धात्वादिभूतस्य षकारस्य सकारादेशो भवति ।।

णह बन्धते णह अकारलोपः प्रयोजनं 'स्वरितञित' इति विशेषणम् णह "णोन" इति णकारस्य नकारः नह् लट् लस्य तिबादयः अनुबन्धलोपः

'दिवादिभ्यः'इति धातोः श्यन् एषु उक्तेषु नह्यति नह तस् इत्यादयो नह्यत इत्यादयश्च सिध्यन्ति । इत ऊर्ध्वं शब्विकरणोक्तवत् प्रक्रिया

।। इति श्यन्विकरणम् ।।

अथ श्नुविकरणम् ।

श्नुसंज्ञके विकरणे षुञः सत्वंपूर्वोक्तवत् ।
पुनः क्रमेण स्वादिभ्यः श्नुरिति श्नौ कृते सति ।।
क्रमात् सुन्वश्नुचिनवो भवेयुः प्रत्ययान्विताः ।। इति ।।

'षुञ् अभिषवे' षुञ् ञकारलोपः षु । ''धात्वादे ष सः'' इति षकारस्य सकारः सु लट् लस्य तिबादयः अनुबन्धलोपः सुति इत्यादि ''स्वादिभ्यः श्नु'' ३-१-७३ रिति धातोः श्नुप्रत्ययः श्नुति शकारलोपः एषु कृतेषु सुनुति सुनुतसित्यादयः सिध्यन्ति, ''स्वादिभ्यः श्नुः'' स्वादिभ्यो धातुभ्यः श्नुप्रत्ययो भवति कर्तृवाचिनि सार्वधातुके परतः शपोऽपवादः ।।

'अशू व्याप्तौ' अशू अकारलोपः प्रयोजनम् ''स्वरतिसूतिसूयतिधूञुदितो वे'' ति विशेषणम् अश् लट् लस्य तङ् अनुबन्धलोपः अश् त इत्यादि ''स्वादिभ्य श्नु ''रितिश्नुः शकारलोपः एषु कृतेषु अश्नुत अश्नु आतामित्यादयः सिध्यन्ति, चिञ् चयने ञकारलोपः चि लट् लस्य तिबदायः अनुबन्धलोपः 'स्वादिभ्यः श्नु' इतिः एषु कृतेषु चिनुति इत्यादयः चिनुत इत्यादयश्च सिध्यन्ति ।।

इति श्नुविकरणम्।

अथ शविकरणम्

शसंज्ञके विकरणे प्रत्यये शे कृते पुनः
मृङस्तु रिङशयेत्यादिरिङादेशस्ततः परम्
अचि श्नुइत्यादिनेयङ् स्यान्मुञ्चतेः शेमुचादिना
नुमागमस्त्वनुस्वारः पुनः परसवर्णता ।।

तुदम्रियतथामुच्चतदाः स्युः प्रत्ययान्विताः ।

तुदव्यथने तुद अकारलोपः प्रयोजनं स्वरितञितः ।

इत ऊर्ध्वं शपीवात्र विज्ञेयः प्रक्रियाक्रमः इति ।।

तुद व्यथने ,तुद अकारलोपः प्रयोजनं 'स्वरितञित' इति विशेषणम् तुद् लट् लस्य तिबादयः अनुन्धलोपः तुदतीत्यादि 'तुदादिभ्यः शः' ३-१-७७ तुदादिभ्यो धातुभ्यः शप्रत्ययो भवति । शकारलोपः तुद् अति एषु कृतेषु तुदति तुदतसित्यादयः सिध्यन्ति, मृङ् प्राणत्यागे मृङ् ङकारलोपः मृ लट् म्रियते लुंङलिङोश्चे १-३-६१ त्यात्मनेपदम् लस्य तङ् अनुबन्धलोपः मृत इत्यादि 'तुदादिभ्यः श' इति धतोः शः मृअत 'रिङशयग्लिङ्क्षु' ७-४-२८ इति ऋकारान्तस्य अङ्गस्य रिङादेश रिङ्ड.कारलोपः म्रिय् अत म्रियत 'अचिश्नु'त्यादिनेयड.ादेश म्रिय् अत एषु कृतेषु म्रियत म्रियत म्रिय आतामित्यादयः सिध्यन्ति' म्रियतेर्लुङ्लिङोश्च' म्रियतेर्धातोर्लुङ्लिङ्विषया-च्छिद्भाविनश्चैवात्मनेपदं भवति'रिङ्शयग्लिङ्क्षु ऋकारान्तस्याङ्गस्य शयगित्येतयोर्लिङि च यकारादावार्धधातुके परतो रिङादेशो भवति 'अचिश्न......डा' धातोरिवर्णोर्णान्तस्य श्नुप्रत्ययान्तस्य भ्रूशब्दस्य इवर्णोवर्णयोर्यथासंख्यमियङुवङित्येतावादेशौ भवतः अजादौ प्रत्यये । मुच्लृ मोक्षणे मुच्लृ लृकारलोपः'लृदित परस्मैपदेषु'इति वेशेषणम् मुच् लट् लस्य तिबादयः अनुबन्धलोप 'तुदादिभ्यः शः' इति शः मुच् अति मुचति 'शेमुचादीना' ७ -२- नुमागमः मुन् च् अति 'नश्चे'त्यनुस्वारः मुंच् अति 'अनुस्वारस्य ययि परसवर्ण' इति परसवर्णादेशः मुञ्च् अति मुञ्चति एषु कृतेषु मुञ्चतीत्यादयो मुञ्चत इत्यादय सिध्यन्ति इत ऊर्ध्वं शब्बिकरणोक्तवदेवात्रप्रक्रिया'शे मुचादीनाम् । मुचादीनामङ्गानां शे परतो नुमागमो भवति । **इति शविकरणम्।**

अथ श्नम्विकरणम्

अथातः श्नम्बिकरणे प्रोक्तनीत्या तिबांदिषु ।

कृतेषु तु श्नमो मित्वात् सः स्यादन्त्यादचः परः ।।

रुनधग्रे भुनज् पश्चात् तत्पश्चाद् पुनजित्यपि ।
क्रमेणैते पदांशाः स्युस्तिबादिप्रत्यान्विताः ।। इति ।।

रुधिर् आवरणे ,रुधिर् धातुसंज्ञा रकाररेफयो 'इरितामिर उपसंख्यान'मितीत्संज्ञा लोपः प्रयोजनम् 'इरितो वे' ति विशेषणम् रुध् लट्, लस्य तिबादयः । अनुबन्धलोपः रुधति 'रुधादिभ्यः श्नमि'३-१-७८ति श्नम्प्रत्यये 'मिदचोन्त्यात्परे'त्यनेन श्नमो मित्वादन्त्यादचः परो भवति, रुश्नम् ध् ति शकारलोपयोरुपसर्जनं 'श्नान्नलोप' इति विशेषणम् मकारादेशो विध्यर्थः रुनध् ति एषु कृतेषु रुनध् इत्यादयः रुनध् त इत्यादयश्च सिध्यन्ति। **रुधादिभ्यः श्नम्** रुधादिभ्यो धातुभ्यःश्नम् प्रत्ययो भवति कर्तृवाचि सार्वधातुके परतः शपोऽपवादः।।

भुज पालनाभ्यवहारयोः भुज अकार उच्चारणार्थः भुज् लट् लस्य तिबादयः अनुबन्धलोपः भुज् ति इत्यादिभ्यःरुधादिभ्यः इति श्नम् एषु कृतेषु भुनज् ति भुनज् त इत्यादयश्च सिद्ध्यन्ति युजिर् योगे युजिर इकार वेति विशेषणम् युज् लट् लस्य तिबादयः अनुबन्धलोपः युज् तीत्यदि रुधादिभ्य श्नम् इति अनुबन्धलोपः एषु कृतेषु युनज् ति इत्यादयः युनज् त इत्यादयः सिध्यन्ति ।।

अथ उविकरणम्

उसंज्ञके विकरणे तनाद्युप्रत्यये कृते ।
करोतेः सार्वधात्वादिर्गुणः स्यादपरो हि सः ।।
क्रमेण स्युस्तनुमनुकरवः प्रत्ययान्विताः ।। इति ।।

तनु विस्तारे तनु धातुसंज्ञा उकारतोपः । तन् लट् लस्य तिबादयः अनुबन्धलोपः तनादिकृञ्भ्य उः ३-१-७९ तनादिभ्यो धातुभ्यः कृञ्भ्यश्चोप्रत्ययो भवति कर्तृवाचिनिसार्वधातुके परतः शपोऽपवादः ।।

मनु अवबोधने मनु धातुसंज्ञा उकारलोपः मन् लट् लस्य तङ अनुबन्धलोपः मन् त इत्यादि तनादिकृञ्भ्यःउरिति धातोरुप्रत्ययः मन् उ त एषु कृतेषु मनुत

मनु आताम् इत्यादयः सिध्यन्ति । डुकृञ् करणे डुकृञ् धातुसंज्ञा अनुबन्धलोपः कृ लट् लस्य तिबादयः अनुबन्धलोपः कृति इत्यादि 'तनादिकृञ्भ्यः उः' इति धातोरु प्रत्यय कृ उ ति 'सार्वधातुकयो'रिति गुणे रपरः क् अर् उति, एषु कृतेषु करुति इत्यादयः करुत इत्यादयश्च सिध्यन्ति ।।

अथ श्नाविकरणम्

अथातः श्नाविकरणे क्र्यादिभ्यः श्नेति सूत्रतः ।
श्नाप्रत्यये कृते तत्र ग्रहेः स्यात् सम्प्रसारणम् ।।
यथाविधि नकाराणां पुनर्णत्वे कृते सति ।
क्रीणा वृणा च गृहा च स्युरेते प्रत्ययान्विताः ।।

डुक्रीञ् द्रव्यविनिमये डुक्रीञ् धातुसंज्ञा डुकारञकारयोर्लोप लट् लस्य तिबादयः अनुबन्धलोपः क्रीति इत्यादि क्रयादिभ्यः ३-१-८१ इति धातोः श्नाप्रत्ययः क्रीश्नाति शकारलोपः क्री 'अट्कुप्वाङि' ति णत्वम् एषु कृतेषु क्रीणाति क्रीणातसित्यादयः सिध्यति। 'क्र्यादिभ्यः श्ना' क्र्यादिभ्यो धातुभ्यः श्नाप्रत्ययोभवति कर्तृवाचिनि सार्वधातुके परतः शपोऽपवादः ।।

'वृङ् सम्भक्तौ' वृङ धातुसंज्ञा ङकारलोपः वृ ल् लस्य तङ् अनुबन्धलोपः वृत इत्यादि 'क्र्यादिभ्यः श्न'ति श्नाप्रत्ययः । शकारलोपः वृनाति 'ऋवर्णाच्चेति वक्तव्य'मिति णत्वम् एषुकृतेषु वृणति वृण आतामित्यादयश्चसिध्यन्ति ।।

ग्रह उपादने ग्रह धातुसंज्ञायामकारलोपः ग्रह लट् लस्य तिबादयः अनुबन्धलोपः गह तीत्यादि क्र्यादिभ्यः श्नेति श्ना शकारलोपः ग्रह नाति ग्रहिज्येति ६-१-१६ सम्प्रसारणम् गृ अ ह नाति 'सम्प्रसारणाच्चे'ति पूर्वरूपत्वम् गृह् नाति णत्वम् एषु कृतेषु गृह्णाति गृह्णातसित्यादय गृह्णात गृह्ण आतामित्यादयश्च सिध्यन्ति "ग्रहिज्यावयिवधिवष्टि विचतिपृच्छतिभृज्जतीनां ङि.ति च" ग्रह उपादाने ज्या वयोहानौ व्येञो वयि, व्यध ताड ने वश कान्तौ व्यच व्याजीकरणे ओ व्रश्चूछेदने

प्रच्छ ज्ञीप्सायाम् भ्रस्ज पाके इत्येतेषां ङिति परतः सम्प्रसारणं भवति चकारात् किति च, ''इग्यणः सम्प्रसारणम्'' यणः स्थाने भूतो भावी वा य इक् स सम्प्रसारणसंज्ञं । 'सम्प्रसारणाच्च' सम्प्रसारणादचि परतः पूर्वपरयोः पररूपमेकादेशो भवति।।

अथ णिज्विकरणम्

चुरादिभ्योऽथ धातुभ्यः स्वार्थे णिच्प्रत्ययो भवेत्
सत्यापपाशरूपेति त्रिभ्यश्चैवं कृते पुनः
चुरिधातोः पुगन्तेति गुणः कार्यस्ततः परं
सर्वेषां धातुसंज्ञायां सनाद्यन्तेति सूत्रतः ।।
प्रोक्तनीत्या शपि कृते सार्वधात्वादिना गुणः ।
आयादेशश्च कार्यः स्यात् कृतेष्वेषु यथाक्रमम् ।।
चोरय स्यात् पालय वाप्यर्चय प्रत्ययैः सह ।
इतः ऊर्ध्वं शपीवात्र विज्ञेयः प्रक्रियाक्रमः ।।
फलस्य कर्त्रभिप्राये अजन्ताच्चात्मनेपदम् ।। इति ।।

'चुर स्तेये' चुर इत्ययं धातुः स्तेयेऽर्थे वर्त्तते चुरः धातुसंज्ञायामकार उच्चारणार्थः प्रयोजनान्तराभावात् चुर् 'सत्यापपाशे' ३-१-२५ त्यादिना स्वर्थे णिच् प्रत्ययः चुर् णिच् णकारचकारयोर्लोपः चुर् इ 'पुगन्तेति' गुणः चोरि 'सनाद्यन्ता धातवः' ३-१-३२ इति धातुसंज्ञा 'वर्त्तमानेलडि'तिलट् प्रत्ययः अनुबन्धलोपः चोरि ल् लस्य तिबादयः अनुबन्धलोपः चोरि तीत्यादि कर्तरीति शप् अनुबन्धलोपः चेरि अ ति 'सार्वधातुके'त्यादिना गुणः चोः अयादेश एषु कृतेषु चोरयति इत्यादयः चोरयत इत्यादयश्चसिध्यन्ति। 'सत्यापपाशरूपवीणा-तूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्' सत्यापादिभ्यश्चूर्णपर्यन्तेभ्य-श्चुरादिभ्यश्च णिचप्रत्ययो भवति स्वार्थे पुगन्तलघूपधस्यच पुगन्तस्याङ्गस्य लधूपधस्यचेकोगुणो भवति सार्वधातुकार्धधातुकयोः परतः 'सनाद्यन्ताधातवः'

सन्नादिर्येषां ते सनादयः सनादयोऽन्ते येषां ते सनाद्यन्ताते समुदाया धातुसंज्ञाभवन्ति 'णिचश्च' १-३-७४ णिजन्तादात्मनेपदं भवति कर्तारं चेत कियाफलमभिप्रेतव्यम्।

'पाल रक्षणे' पाल अकार उच्चारणार्थः 'सत्याप...' णिच् इति स्वार्थे णिच् पाल इ धातु संज्ञा लट् पालिल् लस्य तिबादयः अनुबन्धलोपः पालि तीत्यादेः शप्, पालिअति गुणः पाले अ ति अयादेशः पालयति पालयत इत्यादयः सिध्यन्ति ।।

'अर्च पूजयाम्'अर्च धातुसंज्ञा अकार उच्चारणार्थः अर्च 'सत्यापपाशे'त्यादीना णिच् अर्चि शप् अर्चि अ ति गुणः अयादेशः अर्चयति अर्चयत इत्यादयश्च सिध्यन्ति इतः परं शब्विकरणोक्तवदवत्रापि प्रक्रिया अत्र 'णिचश्चे' त्यात्मनेपदम् ।। लिङलोड्विध्यादि लिङामप्यनेन क्रमेणैव ,भव एध इत्यादयः पदैकदेशा आनेतव्याः ।।

लट् प्रक्रिया

लडादीनां चतुर्णां स्युर्भव चैध तथा पच् ।
नन्दध्वं सन्ययादन्यस्त्वथ शी ब्रू पुनर्जुहु ।।
जिहा दधदीव्यसूय नह्य सुन्वश्नुचिन्वपि ।
मुदम्रियौ मुञ्च रुन्ध् भुनज्युनजथो तनु ।।
मनु स्यात् कुरु वै क्रीणा बृणा गृह्ण च चोरय ।
पालयार्चय चेत्येते शबादिप्रत्ययान्विताः ।।
ततो विभक्तयो योज्याः प्रोक्तैरेभिः पदांशकैः
विभक्तियोजनामार्गो लटि तावत् प्रदर्शय
अथ झेर्झोऽन्त इत्यन्तो हल्मात्रस्य चेदयं
अकार उच्चारणार्थस्तकारादुत्तरस्त्वसो
तत्र स्यात् पूर्वपरयोः पररुपमतो गुणे
ते अकारस्योत्तमे दीर्धस्त्वतो दीर्धो यञीति सः

पदान्तस्य सकारस्य सर्वत्र सति सम्भवे
कृतेष्वन्येषु कार्येषु रुविसर्गौ भवत्यसौ । इति

भवन्ति. भव झि 'झोऽन्त' इति हल्मात्रस्य झकारस्यान्त इत्ययमादेशः भव अन्त इ तकारेऽकार उच्चारणार्थः भव अन्त् इ भवन्ति 'अतो गुण' इति पररूपं भवति भवतः इत्यादि 'अतोगुणे' अपदातान्तादकारात् गुणसंज्ञके वर्णे परतः पूर्वपरयोः स्थाने पररूपमेकादेशो भवति ,'सुप्तिङ.न्तं पदम्' 'ससजुषोरुः' 'विरामोऽवसानम्' 'खरवानयोर्विसर्जनीय' इत्येते सवृत्तिकाः ।।

एध ,अतो ङितश्चलोपोव्योराद्गुणं चात्मनेपदे ।
सूमत्रयं ह्यर्थयोः स्यात् थासः सेशब्दमादिशेत् ।।
थासः स इति वक्तव्ये सेशब्दमुपदिष्टवान् ।
आदेशनां न टेरेत्वंमिति ज्ञापयितुं मुनिः ।
झस्यापि झोऽन्तः प्राग्वत् स्यात् पररूपमतो गुणे ।
परयोर्वहिमह्योः स्यादतो दीर्घो यञीत्यथ ।।
टेः स्यादेत्वं टितां लानामात्मनेपदवर्त्तिना
एत्वसूत्रात् परत्वेन गुणस्येत्याद्गुणोऽथवा ।।
इटि नैव गुणः कार्यष्टेरेत्वं स्यादिहाष्टसु ।
सुटित इत्यादिना पश्चादिट्यतो गुण एधते ।। इति ।।

एधते एत्वम् एधते एध आतामित्यत्र 'सार्वधातुकमपिदि'ति ङिद्वद्भावे 'आतो ङित' इत्याकारस्येय् इत्ययमादेशः एध इय् ताम् 'लोपो व्योर्वली'ति यकारलोपः एध ई ताम् गुणः एधे ताम् टेरेत्वम् एधेते एध झ इत्यत्र झस्य 'झोऽन्त' इत्यन्तादेश एध अन्त अ तकार अकार उच्चारणार्थः एध् अन्त् अतोगुण एध न्त टेरेत्वम् एधन्ते एध थास् 'थासः से' इति थासः से इत्ययमादेशः एधसे एधध आथाम् एधेते इतिवत् एधेथे एधध्वम् 'अनचिचे' ति द्वित्वम् एधध्ध्वम् टेरेत्वम् एधध्वे एध इ गुणः एधे वहिमहोः परत 'अतो दीर्घो यञी'ति दीर्घः टेरेत्वं एधावहे एधामहे सार्वधातुकमपित् लोपो व्योर्वलि ।।

'पच्'

धातवः स्वरितेद्भ्यः स्याञ्ञिद्भ्यश्चात्मनेपदम्

क्रियाफलं चेत् कर्त्तुः स्यात् परस्मैपदमन्यर्थं ।। इति ।।

पचति पचतः पचते पचेते इत्यादयश्च ।।

नन्दति नन्दत इत्यादि ध्वंसते ध्वंसते ध्वंसेते इत्यादि व्ययति व्ययते इत्यादि ।।

अद्, अदेर्लिटिभवेच्चत्र्वं खरि चेतीह पञ्चसु

झोऽन्तश्चाकण्ठमत्यन्नमाद्यूनोऽसौ बुभुक्षितः ।।

इति । प्रथमपुरुष बहुवचनमुत्तमं च विनान्येषु पञ्चसु दकारस्य' खरिचे'ति चर्त्वम् अत्ति अत्त इत्यादि ।।

'शे', अयादेशो भवेच्छी (ङो) द्व्यर्थयोरिटि च त्रिषु ।

झस्वात्मनेपदेष्वेव स्यादच्छब्दस्य रुडागमः ।।

शीङो रुडिति थासः से सस्यषत्वं भवेत् पुनः ।

टित इत्यादिटेरेत्वं शेषे शेते श्रिया हरिः ।। इति ।।

शेत टेरेत्वम् शेते आतामाथामिडित्येतेबु त्रिषु परतोऽयादेशः । टेरेत्वं च शयाते शे झ इत्यत्र 'आत्मनेपदेष्वनत' ७-१-५ इति हल्मात्रस्य सकारस्यातित्ययमादेशः शे अ झादेशस्याच्छब्दस्य 'शीङो रुट्' ७-१-६ इति रुडागमः धात्वादाद्यंशो रुट् शे रुट् अत उकार उच्चारणार्थः टकारौ देशविध्यर्थः। शेर् अत एत्वं शेरते शे थास् 'थासः से' आदेशः शेसे सकारस्य षत्वं यत्र षत्वं कार्यं तत्र प्रायश 'आदेशो'त्यमुनैव ,शेषे शयाथे शेध्वे शये शेवहे शेमहे ।। 'आत्मनेपदेष्वनतः' आत्मनेपदेषु यो झकारस्तस्यानकारान्तादङ्गदुत्तर-स्यादित्ययमादेशो भवति 'शीङो रुट्' शीङरोऽङ्गादुत्तरस्यातो रुडागमे भवति।।

ब्रू ,ब्रुव अङ्गादुत्तरेषां तु पितामीडागमो भवेत् ।
ब्रुव इडिति पित्स्वेषु सार्वधात्वादिना गुणः ।।
अवादेशश्च झेर्झोऽन्तस्तस्त्रोवङ्स्यादचि
आदेशति सिपः सस्य षत्वं सत्यं ब्रवीति सः ।। इति ।।

तिप्सिप् मिपो त्रयाणां 'ब्रुव ईडि' ७-३-९३ तीडागमः ब्रू ई ति ब्रू ई सि ब्रू ई मि गुणः ब्रोईति ब्रो ई सि ब्रो ई मि अवादेश ब्रतीति ब्रवीति ब्रवीसि ब्रवीमि इति पित्सु ब्रूतः ब्रूझि झोऽन्तः ब्रूअन्ति 'अचि श्नुधात्वि'त्यादना ऊकारस्योवङादेश ब्रूव्अन्ति उच्चारणार्थ इकारलोपः ब्रूव् अन्ति । ब्रवीसि षत्वम् ब्रवीषि ब्रवीथ ब्रवीमि ब्रूमः 'ब्रुव ईट्' ब्रूवोङ्गादुत्तरस्य हलादेः सार्वधातुकस्येडागमो भवति

लटः परस्मैपदिनो ब्रुव आदौ निषेदुषाम् ।
यथाक्रमं णलतुसस्थलथुश्चेति पञ्च च ।।
पञ्चानां स्युस्तिबादीनां ब्रुवश्चाहो विधीयते ।
तिबादिप्रत्ययादीनामाहादेशः प्रकीर्त्तितः ।। इति ।।
शङ्कानिवृत्यर्थं पुनर्ब्रूग्रहणम् कृतम् ।
थल्मात्रो हकारस्य भवेज्झलि परे सति ।। इति ।।

'ब्रुवः पञ्चानामादित आहो ब्रुवः' ३-४-८४ ब्रुवः परस्य लटः परस्मैपदानामादिभूतानां यथासंख्यं णल् अतुस् उस् थल् अथुसित्येते आदेश भवन्ति ,आहश्च ब्रुवः ब्रुव इति पुनर्वचनं स्थान्यर्थम् इतरथा हि

झस्यात्मनेपदेष्वेव स्यादच्छब्दस्य रुडागमः ।।
शीङो रुडिति थासः से सस्यषत्वं भवेत् पुनः ।
टित इत्यादिटेरेत्वं शेषे शेते श्रिया हरिः ।। इति ।।

शेत टेरेत्वम् शेते आतामाथामिडित्येतेबु त्रिषु परतोऽयादेशः । टेरेत्वं च शयाते शे झ इत्यत्र 'आत्मनेपदेष्वनत' ७-१-५ इति हल्मात्रस्य

सकारस्यातित्ययमादेशः शे अ झादेशस्याच्छब्दस्य 'शीङो रुट्' ७-१-६ इति रुडागमः धात्वादाद्यंशो रुट् शे रुट् अत उकार उच्चारणार्थः टकारौ देशविध्यर्थः। शेर् अत एत्वं शेरते शे थास् 'थासः से' आदेशः शेसे सकारस्य षत्वं यत्र षत्वं कार्यं तत्र प्रायश 'आदेशे'त्यमुनैव ,शेषे शयाथे शेध्वे शये शेवहे शेमहे ।। 'आत्मनेपदेष्वनतः' आत्मनेपदेषु यो झकारस्तस्यानकारान्तादङ्गदुत्तर-स्यादित्ययमादेशो भवति 'शीड.ा रुट्' शीङरोऽङ्गादुत्तरस्यातो रुडागमे भवति।।

ब्रू ,ब्रुव अङ्गादुत्तरेषां तु पितामीडागमो भवेत् ।
ब्रुव इडिति पित्स्वेषु सार्वधात्वादिना गुणः ।।
अवादेशश्च झेर्झोऽन्तस्तस्त्रोवङ्स्यादचि
आदेशति सिपः सस्य षत्वं सत्यं ब्रवीति सः ।। इति ।।

तिप्सिप् मिपो त्रयाणां 'ब्रुव ईडि' ७-३-९३ तीडागमः ब्रू ई ति ब्रू ई सि ब्रू ई मि गुणः ब्रोईति ब्रो ई सि ब्रो ई मि अवादेश ब्रतीति ब्रवीति ब्रवीसि ब्रवीमि इति पित्सु ब्रूतः ब्रूझि झोऽन्तः ब्रूअन्ति 'अचि श्नुधात्वि'त्यादना ऊकारस्योवङादेश ब्रूव्अन्ति उच्चारणार्थ इकारलोपः ब्रूव् अन्ति । ब्रवीसि षत्वम् ब्रवीषि ब्रवीथ ब्रवीमि ब्रूमः 'ब्रुव ईट्' ब्रूवोङ्गादुत्तरस्य हलादेः सार्वधातुकस्येडागमो भवति

लटः परस्मैपदिनो ब्रुव आदौ निषेदुषाम् ।
यथाक्रमं णलतुसस्थलथुश्चेति पञ्च च ।।
पञ्चानां स्युस्तिबादीनां ब्रुवश्चाहो विधीयते ।
तिबादिप्रत्ययादीनामाहादेशः प्रकीर्त्तितः ।। इति ।।
शङ्कानिवृत्यर्थं पुनर्ब्रूग्रहणम् कृतम् ।
थल्मात्रो हकारस्य भवेज्झलि परे सति ।। इति ।।

'ब्रुवः पञ्चानामादित आहो ब्रुवः' ३-४-८४ ब्रुवः परस्य लटः परस्मैपदानामादिभूतानां यथासंख्यं णल् अतुस् उस् थल् अथुसित्येते आदेश

भवन्ति ,आहश्च ब्रुवः ब्रुव इति पुनर्वचनं स्थान्यर्थम् इतरथा हि परस्मैपदानामेव स्यात् हकारेऽकार उच्चरणार्थः आह् णल् लकारणकारयोर्लोपः आह आहतुः आहुः 'आह स्थः ५-२-३५ आहो हकारस्य थकारः आथ् थ 'खरि चे' ति पूर्वथाकारस्य चर्त्वं आत्थआहथुः ।।

झस्यात्मनेपदेष्वत् स्यादजादिषु चतुर्ष्वथ ।
अचि श्न्वित्यादिनोवङ्स्यात् थास से षत्वमेव च ।।

थासोऽन्यत्र च टेरेत्वं ब्रूते गैरी वरं वधूः ।। इति ब्रूत टेरेत्वम् ब्रूते ब्रुआताम् अकारस्योवङ् ब्रुवाताम् एत्वम् ब्रुवाते ,ब्रु झ, 'आत्मनेपद' इति झस्यादित्ययमादेशः। ब्रूअत् अ ,बू अत ,उव ङ् ब्रुवत एत्वम् ब्रुवते ब्रू थास् । थासः से षत्वम् ब्रूषे ब्रुवाथे ब्रूध्वे ब्रु इ उवङ् ब्रुवि एत्वम् । ब्रुवे ब्रूवहे ब्रूमहे ।। जुहु ।

'जुहु', पित्सु त्रिषु स्यादङ्स्य सार्वधात्वादिना गुणः ।
अङ्गस्याभ्यस्तसंज्ञायामुभे अभ्यस्तमित्यतः ।।
अदभ्यस्तादुत्तरस्य झकारस्य भवेत् पुनः ।
हुश्नुवोरिति यण् चा पि तत्र स्यात् सस्य षः पुनः ।।
आहिताग्निस्त्वग्निहोत्रं सायम्पातर्जुहोति हि ।। इति ।।

जुहुति, गुणः जुहोति, जुहुतः जुहु झि अत्र जुहु इत्यनयोः 'उभे अभ्यस्त'मित्यभ्यस्तसंज्ञाया झस्यादित्ययमादेश जुहु अत जुहु अति 'हुश्नुवो सार्वधातुके' ६-८-५६ इति हकार उकारस्य यणादेशे वकारः जुह्वति ,जुहुसि गुणः जुहोसि षत्वम् जुहोषि, जुहुथः जुहुथ, जुहोमि जुहुवः जुहुमः 'उभे अभ्यस्तम', 'अदभ्यस्तात्' अभ्यस्तादङ्गादुत्तरस्य झकारस्यादित्ययमादेश भवति 'हुश्नुवोः सार्वधातुकेः' हु इत्येतस्य श्नुप्रत्ययान्तस्याङ्गस्यनेकाचोऽसंयोग पूर्वस्योकारस्य यणादेशो भवति जिहा,

अदभ्यस्ताज्झककारस्य बनरी हल्यघोरिति ।
आकारस्य भवेदीत्वं हलादिषु विभक्तिषु ।।
चतुर्ष्वजादिष्वाकारलोपः श्नाभ्यस्तयोरिति ।
थासः से सस्य षत्वं च जिहीते परमेश्वरः ।।

जिहात ई हल्यघोः ६-४-११ झरित्याकारस्येकारादेश हलि परतः ।

जिहीत एत्वम् जिहीते जिहा आताम् अजादिषु विभक्तिषु परतः 'श्नाभ्यस्तयारातो'लोपः ६-४-११२ इति हकार आकारस्य लोपः जिह् आताम् टेरेत्वम् जिहाते जिहा झ 'अदभ्यस्तादि' त्यत् जिहा अत् अ जिहा अत 'श्नाभ्यस्तयोरात' इत्याकारलोपः जिह् अत टेरेत्वम् जिहते जिहा थास् ईत्वम् जिही थास् 'थासः से' षत्वम् जिहीषे जिहाथे जिहीध्वे जिहे जिहीवहे जिहीमहे 'ई हल्यघोः' श्ना इत्येतस्य घुवर्जितानां चाभ्यस्तानामाकारस्येकारादेशो भवति हलादौ लिति सार्वधातुके परतः 'श्नाभ्यस्तयोरातः' श्नाइत्ये तस्याभ्यस्तानां चाकारस्य लोपो भवति सार्वधातुके कृति परतः ।। दधा,

झकारयोरदभ्यस्तादित्यत् पुनरपित्स्विह ।
लोपः श्नाभ्यस्तयोरातः थासः से षट्सु दस्य धः ।।
दधस्तथोस्चेत्यमुना तेश्वेवाथ ध्वमं विना ।
पञ्चस्वत्येषु धस्य स्याद् द्वितीयस्य रवतीति चर् ।।
वस्मसोर्वहिमह्योश्च द्वित्वं चानचि चेत्यतः ।
एषु ध्वमि च जश्त्वं च स्याज्झलां जश् झशीति तत् ।
पुनरष्टसु टेरेत्वं च भवेट्टित आदिना ।
दधात्यन्नं चातिथिभ्यो धत्ते मां वक्षसा हरिः ।। इति ।।

दधाति झेर्झस्य च अदभ्यस्तादित्यत आः श दधा अति दधा अत, पुनरपित्सु पञ्चदशसु 'श्नाभ्यस्तयोरात'इति धकार आकारस्यलोपः दध् तस् दध् अतीत्यादि दध् तस 'दधस्तथोश्वे' ८-२-३८ ति दकारस्य धकारः धध् तस् द्वितीयधकारस्य

'खरि चे' ति चर्त्वम् धत् तस् धत्तस् धत्तः दध अति दधति दधासि दध् थस् 'दधस्तथोश्चे' ति दकारस्ययोदकारः धध् थस् 'खरिचेति' चर्त्वं धत् थस् धत्थः दध् थ, दस्य धः धध् ध चर्त्वं धत् थ धत्थ, दधामि दध् वस् 'अनचिचे' ति द्वित्वम्। दधध् वस् 'झल' मित्यादिन पूर्वधस्य जश्त्वम् दध्वः दध्मः । दध् त दस्य धः धध् त चर्लम् धत्त, एत्वम् धत्ते दध् आताम्, दधाति एत्वम् दधाते दध् अत दधत एत्वम् दधते दध् थास् धासः झे दस्य धः धध् से चर्त्वं धत्से दधाथे दध ध्वम्। दस्य धः धध् ध्वम् 'झलां जश् झशी' अभ्यास धकारस्य ज़श्त्वम् धद्ध्म् टेरेत्वम् धद्ध्वे, दध् इ एत्वम् दधे दध् वहि धकारस्य द्वित्वजश्त्वे । एत्वं च। दद्ध्वे दद्ध्वहे दद्ध्महे ।। 'दधस्तथोश्च' दधातेर्झषन्तस्य बशः स्थाने भषादेशो भवति तकारथकारयोर्झलि सकारे ध्वेच परतः पदान्ते च ।।

दीव्यति दीव्यत इत्यादि सूयते नह्यति नह्यते इत्यादि ।। परिपूर्वः 'उपसर्गादसमासेऽपि णोपदेशस्ये' ८-४-१४ ति णत्वम् । परिणह्यति परिणह्यत इत्यादि ।।

सुनुचिन्वोः पित्सु कार्यः सार्वधात्वादिना गुणः ।
झेर्झोऽन्तस्तत्र यण् चापि हुश्नुवोरिति सस्य षः ।।
लोपश्चास्येत्युलोपो वा वमादौ प्रत्यये परे ।
सोमं सुनोति विप्रोऽअयं धनं भूरि चिनोति च ।। इति ।।

सुनुति गुणः सुनोति सुनतः सुझि' झोऽन्त' सुनु अन्ति 'हुश्नुवो सार्वधातुकस्य' इति उकारस्य यणादेशः वकारः सुन्वन्ति सुनुसि गुणः सुनोसि षत्वम् सुनोषि सुनुथः सनुथ सुनुमि गुणः सुनोमि वस्मसित्यनयोः परतो नकारे उकारस्य 'लोपश्चास्यान्ततरस्यांम्वो' ६-४-१०७ रिति विकल्पेन लोपः सुन्वः सुनुवः सुन्मः सुनुमः अश्नु चिनु,

झस्यात्मनेपदेष्वत् स्यात् थासः से सस्य षो द्वयोः ।
अश्नोतेरुवङादेशः सुनुचिन्वोर्यणेव हि ।।

अचिश्न्वित्युवङश्नोतेरजादिषु विभक्तिषु ।
चिनोतेर्हुश्नुवोर्यण् स्यादजादिषु विभक्तिषु ।।
लोपश्चस्येत्युलोपो वा चिनोतेरुभयत्र सः ।
अश्नोतेश्च चिनोतेश्च टेरेत्वं टितआदिना ।।
आकारमश्नुते मेघः कदर्यश्चिनुते धनम् ।। इति ।।

सुन्वश्नुचिनूनां श्नुप्रत्ययान्तत्वेन 'अचि श्नुत्या'दिनोवङि प्राप्ते सुनुचिन्वोरुकारस्यासंयोग पूर्वत्वादुवङादेशं बाधित्वा 'हुश्नुवो' रिति यणेव भवति अश्नु इत्यत्रोकारस्य संयोगपूर्वत्वात् 'हुश्नुवो'रिति यण्न भवति तस्मादश्नोतेरुवङेव, सुनुचिन्वोर्यणेव । अश्नुत टेरेत्वम् अश्नु ते, अश्नुआताम् उवङ् अश्नुवाताम् टेरेत्वम् अश्नुवाते अश्नु झ 'आत्मनेपदे.. 'झस्यादित्ययमादेशः अश्नु अ अत् अश्नु अत उवङ् अश्नुवतः टेरेत्वम् अश्नुवते ,अश्नु थास् थास से अश्नु से षत्वं अश्नु आथाम् उवङ् एत्वं अश्नुवाथे अश्नु ध्वम् एत्वम् अश्नुध्वे अश्नु इ उवङेत्वं च अश्नुवे अश्नुवहि एत्वं अश्नुवहेअश्नुमहे चिनोति चिनुत इत्यादि चिनुते चिनु आताम् 'हश्नुवो' रिति यण् चिन्वाताम् टेरेत्वम् चिन्वाते चिनुझ 'आत्मनेपदे' इति झस्यात् चिनु अत् अ यण् चिन्वत यण् टेरेत्वम् । चिन्वते चिनु इ यण् एत्वम् चिन्वे वहिमह्योः परतः लोपश्चास्ये एत्वं च चिन्वहे चिनुवहे चिन्महे चिनुमहे लोपश्चास्यान्यतरस्यां 'म्वोः' योऽयमुकारोऽसंयोगपूर्वस्तदन्तस्य प्रत्ययस्यान्यतरस्यां लोपो भवति । मकारवकाराद्योः प्रत्यययोः परतः ।।

तुद तुदति तुदत इत्यादि, म्रियते म्रियेते इत्यादि मुच्छति मुञ्चत इत्यादि मुञ्चते मुञ्चाते इत्यादि ।

रुनध् झस्यात्मनेपदेष्वत् स्यात् थासः से झोऽन्त एव च ।
झष उत्तरयोर्धत्वं स्यात् तकारथकारयोः ।।
झषस्तथोर्धेति पित्सु नस्य णकारता ।
तिपि पूर्वधकारस्य स्याज्झलां जश् झशीति जश् ।।

अपितिस्विह नकारे तत् श्नसोरल्लोप इत्यथ ।
झरो झरि सवर्णे लुग्झल उत्तरवर्तिनः ।।
नस्य त्वपित्स्वनुस्वारः पुनः परसवर्णता ।
मध्यमैकार्थयोश्चत्वं खति चेति धकारयोः ।।
रुणाद्धि टित इत्येत्वेरुन्धे रुन्धात इत्यपि ।। इति ।।

रुनध् ति 'झषस्तथोधोध' इत्यादिना तकारस्य धकारादेशः रुनध् धि 'अट्कुप्वाङि' ति नकारस्य णत्वम् रुणध् धि 'झलां जश् झशी'त्यादिना पूर्वधकारस्य जश्त्वम् रुणद्धि रुणधतस् 'झष स्तथो'रित्यादिना तकारस्य धकारः रुनध् धस् 'श्नसोरल्लोप' इति नकारेऽकारस्य लोपः रुन्ध् धस् 'झरो झरि सवर्णे' इति हल उत्तरस्य पूर्वधकारस्य लोपः रुनध्स नकारस्यानुस्वारपरसवर्णो, रुन्धः रुन्धन्ति रुनध् सि णत्वम् रुणध्सि 'खरि चे' ति चर्त्वम् रुणत् सि रुणत्सि रुनध्थस् 'झषस्तथो'रिति धकारः रुनध् धस् 'श्नसोरल्लोपः' रुनध् धस् रुनधस 'झरो झरि सवर्णे'ति पूर्वधकारस्य लोप रुनधस् नकारस्यानुस्वारपरसवर्णो रुत्थः रुन्ध रुनध् मि आ णत्वम् रुणध् मि रुणध्मि रुणध् धकारस्य द्वित्वजश्त्वे रुणद्धि रुधध् वस् 'श्नसोरल्लोपः' रुनध स् अनुस्वा रपरसूवर्णौ रुन्ध्वः रुन्धमः रुनधत 'झष स्तथोर्धाध' इति तकारस्य धकारः इत्यादि रनध् धअल्लोपः 'झरोझरि' ति पूर्वधस्य लोपः रुनध् नकारस्यानुस्वारपरसवर्णै रुन्धा टेरेत्वम् रुन्धे रुनध् आताम् अल्लोपानुस्वारपरसवर्णाः । एत्वं च । रुन्धाते रुनध् झ 'आत्मनेपदेष्वि' इति अत् रुनध् अत लोपः अनुस्वारपरसवर्णौ च रुध्थत रुन्धते रुनध् थास् 'थासः से' रुनध् से अल्लोपः अनुस्वारवरसवर्ण चर्वानि रुन्त्से रुत्से रुन्धाथे रुन्धातम् अल्लोपः रुनध् ध्वम् झरो झरि सवर्णे इति पूर्वधकारलोपः रुनध्वम् अनुस्वारपरसवर्णो एत्वं च । रन्धवे रुनध् इ अल्लोपानुस्वारपरसवर्णैनि एत्वं च रुन्धे रुनध् वहि अल्लोपानुस्वारपरसवर्णै एत्वं च रुन्ध्वहे, रुन्धमहे 'झषस्तथोधोऽधः' झषः उत्तरयोस्तकारथकारयोर्धकारादेशो भवति दधातिं वर्जयित्वा 'श्नसोरल्लोपः' श्नाभ्यस्तेस्चाकारस्य लोपो भवति सार्वधातुके क्ङिति परतः 'झरो झरि सवर्णे' हल उत्तरस्य झरो लोपो भवति, सवर्णे झरि परतः ।।

भनज् युनज् ।
अपालनार्थविषयात् भुजेः स्यादात्मनेपदम् ।
प्रोपाभ्यामिति सूत्रेण युजेः स्यादात्मनेपदम् ।।
झस्यात्मनेपदेष्वत् स्यात् थासः से झोऽन्तं एव च ।
झल्परत्वे तु चोः कुः स्यात् खर्परत्वे तु गस्य चर् ।।
खरि चेति पुनः षत्वं मध्यमैकार्थयोस्तु तत् ।
अपित्स्वथ नकारे ते श्नसोरल्लोप इत्यादि ।
नश्चापदेत्यनुस्वारः पुनः परसवर्णता ।
टित इत्यादि टेरत्वं भुनक्ति च युनक्ति च ।
तथैव भुङ्क्ते युङ्क्ते च मार्गसाम्याद् भवेति । इति ।

भुनज् ति 'चोः कुं रुति कुत्वं भुनग् ति, चर्त्वं, भुनक्ति, भुनज्, तस्, कुत्वचर्त्वे,भुनक्तस्अल्लोपः, भुन्ज् क्तस्, अनुस्वार परसवर्णौ, भुङ्क्तः भुनज् झि, 'झोन्तः' भुनज् अन्ति, अल्लोपानुस्वार परसवर्णाः भुञ्जन्ति भुनज् सि अकारस्य कुत्वचर्त्वे जकारस्य षत्वं भुनक्षि, भुनज् थस्, कुत्वचर्वे भुनक्थस् अल्लोपानुस्वारपरसवर्णौ भुङ्क्थः भुङ्क्थ, भुनज्मि, भुनज्, वस् अल्लोपानुस्वारपरसवर्णाः, भुञ्ज्वः भुञ्ज्मः ।भुनज् त कुत्वचर्त्वे अल्लोपानुस्वारपरसवर्णाः एत्वं भुङ्त्वे, भुनज् आताम् अल्लोपानुस्वारपरसवर्णौ एत्वं च, भुङ्ते, भुनज्आताम् अल्लोपानुस्वारपरसवर्णे एत्वं च भुनज् झ, 'आत्मनेपदेष्वनतः' भुनज् अत् अल्लोपानुस्वारपरसवर्णे एत्वं च भुञ्जाते,भुञ्जते, भुनज् थास् थासः से, भुनज् से कुत्व चर्त्वे भुनक्से, षत्वाल्लोपानुस्वारपरसवर्णाः भुङक्षे, भुञ्चाथे,भुनज् ध्वम् कुत्वं अल्लोपानुस्वारपरसवर्णे एत्वं च भुङ्ध्वे भुनज् इ, अल्लोपानुस्वारपरसवर्ण एत्वं च भुञ्जे भुञ्ज्वहे भुञ्ज्महे युजेस्चाप्येवं क्रमः, युनक्ति, युङ्क्त इत्यादि युङ्क्ते युञ्जत इत्यादि 'भुजो अनवने' (१-३-६६) भुजोर्धातोरनदपालने अर्थे वर्तमानादात्मनेपदं भवति 'प्रोपाभ्यां युजेरयमात्रेषु ' (१-३-६४) इति उप इत्येताभ्यां उत्तरस्य युजेरात्मनेपदं भसज्ञायां प्रत्ययञापार्थे विषये ।

तनु ,पित्सूविकरणे कार्यः सार्वधात्वादिना गुणः ।
यत्रोविकरणे यण् स्यात् तत्रेको यणचीति यण् ।
झोऽन्तश्च तत्र यण् पश्चात् सिप्यादेशेति सस्य षः ।
लोपश्चास्येत्युलोपो वा वमादौ प्रत्यये परे ।।
आढ्यम्मन्यो मनुष्यो यस्त्वात्मश्लाघा तनोति सः ।। इति ।।

तनोति तनुतः तनु झि 'झोऽन्तः' तनु अन्ति 'इको यण ची' ति यण्तन्वन्ति, तनोषि तनुथः तनुथ, तनोमि तनु वस् 'लोपश्चास्यन्यतरस्यां ' विकल्पेनोकारलोपः तन्वः तनुवः तन्मः तनुमः ।।

मनु, झस्यात्मनेपदेष्वत् स्यात् थासः से सस्य षः पुन ।
आथामथातामिट्चैषु परतो यण् भवेदिकः ।।
लोपश्चास्येति टेरेत्वं वेदार्थं मनुते सुधीः ।। इति ।।

'आत्मने' ति झस्यात् आतामाताथामिट् इत्येतेषु चतुर्षु 'इको यणची' ति यणादेश वहिमह्योः परतः 'लोपश्चास्ये' ति वोलोप मनुते मन्वात इत्यादि ।।

धातोरुप्रत्ययान्तस्य करोतेरत् भवेत् ।
सार्वधातुकनिष्ठस्य क्ङिति प्रत्यये परे ।।

झस्यात्मनेपदेष्वत् स्यात् थासः से झोऽन्त एव झेः ।
कुर्वन्तीत्यादिषु द्वित्वं सूत्रेणाचोरडादिना ।।
मध्यमैकार्थयोः सत्वमादेशेति सकारयोः ।
नित्यं करोतेरुल्लोपो वमादौ प्रत्यये परे ।।
करोत्यधर्मं दुष्टात्मा स्वधर्मं कुरुते सुधीः ।। इति ।।

पित्सु त्रिषु सार्वधातुके तिगुणः । अपित्सु पञ्चदशसु 'अत उत् सार्वधातुके' ६-४-११० इति ककारेऽकारस्योकारादेशः भवति ।

करोति कुरुत इत्यादि कुरुते कुर्वाते इत्यादि 'अत उत् सार्वधातुके' उप्रत्ययान्तस्य अचो उत्तरौ यौ रेफ हकारौ ताभ्यामुत्तरस्य यरो द्वे भवतः 'नित्यं करोतेः' ६-४-१०८ उप्रत्ययान्तस्य करोते नित्यंलोपो भवति वकारमकारादौ प्रत्यये परतः ।

भेदोऽयंश्नाविकरणे प्रोक्तेष्वनुगतां नयनात् ।
णकारादुत्तरस्यात्र सर्वत्र हल्यघोरिति ।।
आकारस्य भवेदीत्वं तत्त्वपित्सु हलादिषु ।
अपित्स्वजादिष्वाकारलोपः श्नाभ्यस्तयोरिति ।। इति ।।

अपित्सु हलादिषु विभक्तिषु परतः श्नाविकरणे सर्व णकार आकारस्य 'ईहल्यघो' रितीकारादेश अपित्स्वजादिषु विभक्तिषु पकाराकारस्य 'श्नाभ्यस्तयोरात' इति लोपः झेः 'झोन्तः' अन्तादेशत्वादजादित्वं 'झस्यात्मनेपदेष्वि'ति अत् आदेशत्वादजाादित्वम् अन्यत् सर्वं पूर्ववत् ,क्रीणाति क्रीणीत इत्यादि वृणीते वृणात इत्यादि गृह्णाति गृह्णीत इत्यादि गृह्णीते इत्यादि ।। चोरयति चेरयत इत्यादि चोरयते चोरयेत इत्यादि, पालयते पालयत इत्यादि, पालयते पालयेत इत्यादि अर्चयति अर्चयत इत्यादि अर्चयते अर्चयेते इत्यादि ।।

अथ लङ्प्रक्रिया

तेभ्य एव धातुभ्यः 'भूते' 3-2-54 इति वर्तमाने 'अनद्यतने लङ्' ३-२-१११ अतीतायाश्च रात्रेः पश्चिमो याम आगामिन्याश्च रात्रेःपूर्वो भागः दिवसः सकलः । एषोऽद्यतनः कालः अहरूभयतो रात्र्यर्धमद्यतनः काल इत्यर्थः । अविद्यमानाद्यतनभूतेऽर्थे वर्त्तमानाद्धातोलङ्प्रत्ययो भवति । भव इति स्थिते,

विभक्तियोजनामार्गो लङि तावत् प्रदर्श्यते ।
झोऽन्तश्चातो गुणे पश्चादितश्चेकारलुक् त्रिषु ।।
इकारलुमितश्चेति ङिल्लकारानुवर्त्तिनाम् ।
स्यात् तिबन्ति सिबित्येषां त्रयाणाने- सम्भवेत् ।।

परस्मैपदसंज्ञेषु ङिल्लादेशेषु लोटि च ।
भवन्ति तस्यास्थमिपां तान्तन्तामो यथाक्रमम् ।
संयोगान्तस्य लोपोऽन्तेरमि पूर्व परे त्वमि ।
अतो दीर्घो यञीति स्याद् दीर्घोऽकारस्यवस्मसोः ।।
नित्यं ङितः सलोपश्च ङिल्लादेशेषु लोटि च ।
पश्चादेवान्यकार्याणां पूर्वं रुत्वविसर्गतः ।।
संयोगान्तस्यलोपाच्च लुङ्लङीत्याद्यडागमः ।
अङ्गानामाडजदीनामाटश्चेति तदाड् भवेत् ।। इति ।।

भवति 'इतश्चे' ३-४-१०० तीकारलोपः भवत् 'लङ्लुङ्लृङ्ष्वडुदात्तः' ६-४-७१ इत्यङ्गस्याडागमः टित्वादादिः अभवत् तस्थस्थमिपां क्रमेण तान्तन्तामः अट् अभवताम् भवन्ति 'इतश्च' अट् अभवन्त भवन्त अट् अभवन्त संयोगान्तलोपः अभवन् ,भवसि 'इतश्च अट् रुत्वविसर्गौ अभवः अभवतं अभवत, अभव अम् 'अमिपूर्व' इति पूर्वरूपत्वम् अट् अभवम् ,भव वस् 'अतो दीर्घो यञी'ति दीर्धः भवावस् 'नित्यं ङितः' ३-४-९९ इति सलोपः अट् अभवाव अभवाम 'इतश्च' ङिल्लकारसम्बन्धिनः पस्मैपदस्येकारस्य लोपो भवति। 'तस्थस्थमिपां तान्तन्तामः ३-४-१०१ ङिल्लकारसम्बन्धिनां तस् थस् थ मिप् इत्येतेषां यथासंख्यं तां तं त अम् इत्येते आदेशा भवन्ति। 'अमिपूर्वः' अमि पूर्वरूपमेकादेशो भवति स उत्तमस्येति वर्तमाने 'नित्यं ङितः ३-४-९९ ङिल्लकारसम्बन्धिन उत्तमपुरुषसकारस्य नित्यं लोपो भवति ,'लङ्लुङ्लृङ्ष्वडुदात्तः' । लुङ्लङ्लृङ् इत्येषुऽङ्गस्याडागमो भवति सचोदात्तः 'आडजादीनाम् ६-४-७२ लङलृङ इत्येषु परतोऽजादीनामङ्गानामाडागमो भवति 'आटश्च ६-१-९० आटोचि परे वृद्धिरेकादेशो भवति । 'संयोगान्तस्य लोपः'

संयोगान्तस्य पदान्तस्य लोपो भवति ।
एध् ,आतो ङितश्च लोपो व्योद्व्यर्थयोरिटि चाद्गुणः ।
झोऽन्तश्चतो गुणे पश्चाद्वहिमह्योर्द्वयोरपि ।।
अतो दीर्घो यञीति स्यादैधत बह्मवर्चसम् ।। इति ।।

एधत इत्यादाङ्गस्याजादित्वाद् आडजादीना मित्याडागमः आट एधत टकारलोपः आ एधत 'आटशचे' ति वृद्धि पूर्वपरयोरेको वृद्धिः ऐधत एध आताम् 'आतो ङित' इत्याकारस्येय् इत्ययमादेशः एधइय् आताम् 'लोपो व्यार्वली'ति यकारलोपः एध इ ताम् आद् गुणः । एधे ताम् आड्वृद्धी ऐधेताम् एधन्त आट् वृद्धी ऐधन्त,ऐधथाःऐधेथां ऐधध्वम् ,एध इ गुणःएधेआड्वृद्धी ऐधे ,एध वहि 'अतो दीर्घो यञि' एधावहि आड्वृद्धी ऐधावहि ऐधामहि अपचत् अपचतामित्यादि । अपचत अपचेतामित्यादि।। अनन्दत् अनन्दतामित्यादि अध्वंत अध्वंसेतामित्यादि अव्ययत् अव्ययतामित्यादि अव्ययत अव्ययेतामित्यादि ।।

अद् झोऽन्तोऽथ त्रिष्वितश्चेति ततः पुनरपृक्तयोः ।
तिस्योः कार्यस्त्वदः सर्वेषामिति स्यादडागमः ।।
तान्तन्तेषु दकारस्य चर्त्वं खरिच तत् त्रिषु ।
संयोगान्तस्य लोपोऽन्तेस्तदादद् वृषभस्तृणम् ।। इति ।।

अद् ति 'इतश्चे'तिलोपः अद्त् अद्त् 'अदः सर्वेषां' ७-३-१०० मित्यपृक्तस्य तकारस्य अत् अडागमः अद् अत् ,अतद् आड्वृद्धी आदत् ,तस्थस्थमिपां क्रमेण तान्तन्तामि अद्ताम् चर्त्वम् अत्ताम् आड्वृद्धी आत्ताम् ,अद् झि 'झोऽन्तः' अदन्ति इतश्च अदन्त् आड्वृद्धी 'संयोगान्तस्य लोपः'आदन् ,अद् सि 'इतश्च' अद्स् अदः तम् ररिच आड्वृद्धी आत्तां आत्त । अद् आम् आड्वृद्धी आद्म् अदवस् 'नित्यं ङितः' अद्व आड्वद्धी 'अनचिच'आद्द आद्ग 'अदः सर्वेषाम्' अदोऽङ्गादुत्तरस्यापृक्तस्य सार्वधातुकस्याडागमो भवति सर्वेषामाचार्याणां मतेन।।

शे, अयादेशस्त्वजादौ स्याज्झस्यात् स्यादात्मनेपदे ।
शीङ्गो रुडित्यथाच्छब्दस्येह कार्यो रुडागमः ।।
जगत्येकार्णवीभूते कृष्णोऽशेत वटच्छदे ।। इति ।।

शेत, अट् अशेत ,शे आताम् अयादेशः अट् अशायाताम् शे झ 'झस्यात्'

शेअत झादेशस्याछब्दस्य 'शीङो रुडि' ७-१-६ तिरुडागमः ।। शेरत अट् अशेरत अशेथाः अशयाथाम् अशेध्वम् अशयि अशेवहि अशेमहि ।।

ब्रू, झोऽन्तस्तत्रैव वाचिश्न्वित्युवङ् स्यात् त्रिष्वितश्चलुक् ।
ब्रुव ईट् तिप्सिपोः पित्सु सार्वधात्वादिना गुणः ।।
अवादेशस्च संयोगान्तस्यान्तेर्लुक् तदाब्रवीत् ।। इति ।।

ब्रू ति 'इतश्च' बूत 'ब्रुव ईडि' ७-३-९३ तीडागमः ब्रू ई त् 'सर्वधातुके' त्यादिना गुणः ब्रो ई त् अवादेशः अट् अब्रवीत् 'तस्थस्थमिपान्तान्तन्तामः' ब्रूताम् अट् अब्रूताम् ,ब्रू झि 'झोऽन्तः' ब्रू अन्ति उवङ् ब्रुवन्ति इतश्च संयोगन्तलोपः अब्रुवन् अट् ब्रू सि ब्रुव ईट् ब्रूईस् गुणः ब्रो ईस् अम् अवादेश अट् अब्रवम् ब्रू वस् नित्यं ङितः अट् अब्रूव अब्रूम् ।।

झस्यात्मनेपदेष्वत् स्यादजादिषु चतरर्ष्वेथ ।
अकास्योवङादेशः सूत्रेणाचि श्नुधात्विति ।।
लज्जानम्रमुखी पश्चात्मन्दमब्रूत सा प्रियम् ।। इति ।।

अब्रू ब्रू आताम् उवङ् अब्रुवाताम् ,ब्रूझ आत्मनेपदेष्वनतः ब्रूअत उवङ् अब्रुवत अब्रूथ अब्रुवाथाम् अब्रूध्वम् ,ब्रू इ उवङ्अट् अब्रवि अब्रूवहिअब्रूमहि ।।

जुहु, इतश्च तिप्सिपोरेर्लुक् पित्सु त्रिषु गुणो भवेत् ।
सार्वधात्वादिना झेर्जुस् सिजभ्यस्तविदीति सः ।।
जुसि चेति गुणश्चात्र तत्र चामि परेऽपि च ।
अवादेशाद् द्विजः कश्चिदजुहोत् पन्नगान् किल ।। इति ।।

जुहुति इतश्च । जुहुत् गुणः अट् अजुहोत् अजुहुतां जुहु झि, जुहु उस् 'जुसिच' ७-३-८३ ति गुणः जुहो उस् अवादेशः अट् रुत्वविसर्गे । अजुहवुः जुहु सि इतश्च जुहु स् गुणः अट् रुत्वविसर्गे अजुहोः अजुहुतं अजुहुत जुहु अम् गुणः जुहो अम् अवादेशः अट् अजुहवम् जुहु वस् 'नित्यं ङितः' अट् । अजुहुव

अजुहुम 'सिजभ्यस्तविदिभ्यश्च' सिचोऽभ्यस्तसंज्ञकेक्यो दित्तेश्चोत्तरस्य ङिल्लकारसम्बन्धिनी झेर्जुसादेशे भवति । जुसिच जुसि च परत इगन्तस्याङ्गस्य गुणो भवति ।

जिहा, अदभ्यस्तादुत्तरस्य झकारस्य भवेत् पुनः ।
ईहल्यघोरितीत्वं स्यादाकारस्य हलादिषु ।।
आतः श्नाभ्यस्तयोरात इति लोपस्त्वजादिषु ।
अजिहीत द्विजः स्वर्गं ज्योतिष्टोमेन पण्डितः ।।इति ।

जिहात् हलादिषु पञ्चसु विभक्तिषु परत 'ईहल्यघो' रितीत्वम् जिहीत अट् अजिहित जिहा आताम् अजादिषु चतुर्षु विभक्तिषु परतः 'श्नाभ्यस्तयोरात' इति हकार आकारस्य लोपः जिह् आताम् अजिहाताम् जिहा झ 'अदभ्यस्तादि' ति झस्यात् जिहा अत आकारलोपः अजिहत अजिहीयाः अजिहाथां अजिहीध्वम् अजिहि अजिहीवहि अजिहीमहि ।

दधा, इलोपस्तिप्सिपोझेर्जुस् सिजभ्यस्तविदीति सः ।
अत् स्याज्झस्यत्वदभ्यस्तादमि पूर्वः परे त्वमि ।।
अपित्सु पञ्चदशसु लोपः शनाभ्यस्तयोरिति ।
प्राग्वद्दधस्तथोश्चेति षट्सु दस्य धकारता ।।
एषु ध्वमं विना धस्य द्वितीयस्य खरिति चर् ।
वस्मसोर्वहिमत्योश्च द्वि चानांचे चेति तत् ।।
तेषु ध्वमि च जश्त्वं स्याज्झलां जश् झशिसूत्रेति ।
भार्गवो भूमिमदद्याद् गोविन्दोऽधत्त पर्वतम् ।। इति ।।

दधाति इलोपः जट् अदधात् दधा ताम् आकारलोपः दध् ताम् 'दधस्तथोश्च' धध् ताम् अट् ताम् दधा झि, दधा उस् आकारलोपः । अट् च अदधुः दधासि हकारलोपः स्वास् अदधाः दधातम् आकारलोपः दध् तम् दधस्तधोत्वम् धध् तम्

रखार चि धत् तच अधत्तं अधत्त दधा अम् अमिपूर्वः अदधाम् दधा वस् दध् वस् नित्यं ङितः दध् स् दित्वजश्त्वे अदध्वे अदध्म ।।

दधात 'रनाभ्य' दधत 'दधस्तथोश्च' धधत् चर्त्वं अधत्त दधा आताम् मकारलोपः अट् अद धाताम् दधा झ 'अदभ्यस्तात'् दधा अतः 'श्न'त्यादिनाकार लोपः अट् अदधत दधाथास् अकारलोपः दध् थास् धधथास् 'खरि च' धय व्यास् अट् विसर्गे अधथाः अदधथाम् दधाध्वम् श्नेभ्यरुत दध् ध्वम् झला जश अधध्वम् दधा इ 'श्ने' त्यादिनाकारलोपः अदधि दधावहि शनापथ दोध्ये द्वित्वजश्त्वे अट् अदध्ववहि अदध्महि ।।

अदीव्यत् अदीव्यातामित्यादि । असूयत असूयेतामित्यादि । अनह्यत् अनत्यताम् अनह्यत अनत्येतामित्यादि ।।

सुनुचिन्वोः पित्सु कार्यः सार्वधात्वादिवागुणः ।
झेर्जुसो हुश्नुवेर्यण् चाथेतश्च त्रिष्विलोपता ।।
संयोगान्तस्य लोपोऽन्तेदेशः परे लमि ।
लोपश्चास्येत्युलोपो वेत्यसुनोदचिनोदपि ।। इति ।।

सुनुति गुणः सुनोति 'इतश्च' अट् असुनोत् असुनुतामः सुनुझि, 'झोऽन्तः' सुनु अन्ति 'हुश्नुवो' रिति यण् सुन्वन्ति 'इतश्च' खन्वन्तः अ सुन्वन्त संयोगान्त लोपः असुन्वन् सुनु सि गुणः अतश्च असुनोः असुनुतं असुनुत सुनु अम् गुणः अट असनो अम् । अबू असुनवम् सुनु बस् 'लोपश्चास्ये' ति वोलोपः 'नित्यं ङित' अट् असुन्व असुनुव असुन्म असुनुम ।।

अश्नोतेश्च चिनोतेश्च झस्यात् स्यादात्मनेपदे ।
उवङ् स्यात् प्राग्वदश्नातेश्चिनोतेश्तु यणेव हि ।।
प्राग्वच्चिनोतेरुल्लोपो लोपश्चास्येपि सूत्रतः ।
अश्नोतेराट् चिनोतेराडश्नुत चिनुत क्रमात् ।। इति ।।

अश्नुत, आड्वृद्धी आश्नुत अश्नु आताम् उवङ् अश्नुवाताम् । अश्नु झ तस्य अत् ,उवङ् अश्नुवत आश्नुथाः अश्नुवाथाम् । आश्नुध्वम् अश्नु इ ,उवङ् आश्नुवि, आश्नुवहि आश्नुमहि । अचिनोत् अचिनुतां अचिनुत अचिन्वतामित्यादि ,अनुदत् अनुददतामित्यादि ,अम्रियत अम्रियेतामित्यादि ।

रुनध्, झस्यात्मनेपदेष्वत् स्यात् तथा झेर्झोऽन्त एव च ।
अट्कुप्वाङादिना णत्वं पित्सु त्रिष्वपि न स तत् ।।
स्यात् तिबन्तिसिबित्येषामितश्चेकारलुक् पुनः ।
तिस्योर्हल्ङ्यादिलोपः स्याज्जश्त्वं च स्याद्धकारयोः ।।
झलां जशोऽन्ते तावत् स्यद्रुणदित्यनयोर्द्वयोः ।
पुनः सिपि तु दश्चेति वा दकारस्य रुर्भवेत् ।।
रोरुलोपो विसर्गश्च रुत्वाभावेऽत्र तिप्यापि ।
स्यादकारस्यत्वा चर्त्वं वावसान इतीहतत् ।।
संयोगान्तस्य लोपोऽन्तेर्धत्वं पश्चाज्झषस्तथोः ।
अपित्स्विह नकरेत श्नसोरल्लोप इत्यथ ।।
झसे झरि सवर्णे लुक् हल उत्तरवर्तिनः ।
अस्य त्वपित्स्वनुस्वारः पुनः परसवर्णता ।।
अरुणत् तथासन्ध लङ्गां कपिकुलं क्षणात् ।। इति ।।

रुणध् त् 'हल्ङ्यादिलोपः',झलां जशोन्ते जश्त्वं ,वावसाने चर्त्वं रुणद् रुणत्, रुणध् झ अत्,अट्अरुणध् त् 'हल्ङ्यादिलोपः' अरुणध् जश्त्वम् अरुणद् 'वावसान' इति वा चर्त्वम् अरुणत् अरुणद् ,रुनध् ताम् झषस्तथोधोध श्नसोरल्लोप इति नकारे अकारस्य लोपः नस्यानुस्वारपरसवर्णो अट् अरुन्धाम्, रुनध् झि झोऽन्तः रुनध् अन्ति इतश्च रुनध् अन्त् नस्यानुस्वारपरसवर्णेरुधन्त् संयोगान्त लोपः अरुन्धन् ,रुनध् सि णत्वम् रुणध् सि इतश्चअरुणध् स् हलङ्यादि लोपः अरुणध् तश्त्वम् वाव अरुणद् दश्चे ५-२-७५ ति दकारस्य वा रुः अरुण्

रु उलोपः रेफस्य विसर्जनीयः अरुणः रुत्वाभावे अरुणाद् इति स्थिते वावसाने चर्त्वम् अरुणत् अरुणद् ।रुनध् ताम् अथ धत्वम् रुनध् धम् अल्लोपः रुन्ध् धम् 'झरो झरि सवर्णे' रुन् धम् अनुस्वारपरसवर्णे अरुन्धम्, अरुन्ध ,रुनध् अम् णत्वम् अरुणधम् रुनध् वस् अल्लोपनुस्वारपरसवर्णे ,सलोपः अरुन्ध्व अरुन्ध्म।।

रुनध् त मध्यमबहुवचनवत् अरुन्ध रुनध् आताम् श्नसोरल्लोप अनुस्वारपरसवर्णे अरुन्धाताम् ,रुनध् झ आत्मनेपदेष्वनतः झस्यात् रुनध् अत अल्लोपनुस्वारपरसवर्णाटः अरुन्धत ,रुनध् थास् 'झषस्तथोर्धोऽधः' धत्वम् रुनध् धास् श्नसोरल्लोपे अरुन्धास् रुत्वविसर्गौ अरुन्धाः,अरुन्धाथाम् , रुनध् ध्वम् अल्लोपः अरुनध् ध्वम् अनुस्वारपरसवर्णे अरुन्ध्वम् ,रुनध् इ इ श्नसोरल्लोपः अट् अनस्वरसवर्णे अरुन्धि,रुनध् वहिअट् अरुन्ध्वहि ,अरुन्धमहि 'हल्ङ्याभ्यो दीर्घात् सुतिस्यपृक्तं हल्' ,'दश्च' दकारान्तस्य पदस्य धातोः सिपि परतो वा रुर्भवति ।।। भुनज् युनज् ,

झस्यात्मनेपदेष्वत् स्याज्झोऽन्तश्चोः कुः परे झलि ।
इलोपस्त्रिष्वितश्चेति तिप्सिपोस्तु द्वयोरपि ।।
हल्यादिलोपश्चर्त्वंच वावसाने गकारयोः ।
खर्परत्वे गकारस्य चर्त्वं स्यात् खरि चेत्यतः ।।
अपिस्वथ नकारेऽतः श्नसोरल्लोप इत्यपि ।
नश्चापदेत्यनुस्वारः पुनः परसवर्णता।
पुनरन्तेस्तकारस्य संयोगान्तस्यलोपता ।
तदा स्यादभुनक्ते द्वदत्युनक् च क्रमात् पुनः ।।
अभुङ्क्त तथायुक्त मार्गसाम्याद् भवेदिति ।। इति ।।

भुनज् ति 'चोः कुः' भुनग् ति 'इतश्च' भुनग् त् 'हलृङ्यादि'ना लोपः। अभुनग् वा चर्त्वम् अभुनक् अभुनग् भुनज् ताम् चोः कुः भुनग् ताम्'खरि च'भुनक् ताम्'श्नसोरल्लोपः अनुस्वारपरसंवर्णाटः अभुङ्क्ताम् भुनज् झि, 'झोऽन्तः'

भुनज् अन्ति 'इतश्च' भुनज् अन्त् अल्लोपानुस्वारपरसवणाः अभुञ्चन्त् संयोगान्तलोपः अभुञ्जन् अभुनक् अभुनम् अभुङ्क्त ,अभुङ्क्त, अभुनजं भुनज् वस् श्नसोरल्लोपः अनुस्वारपरसवर्णौ,अट् नित्यंङितः अभुञ्ज्व अभुञ्ज्म। अभुङ्क्त भुनज् आताम् अल्लोपनुस्वारपरसवर्णौ अट् अभुञ्जताम् ,भुनज् झ 'आत्मनेदवनतः' झस्यात् भुनज अत 'श्नसोरल्लोपः' 'अनुस्वारपरसवर्णे' अभुज्जत भुनज् थास् 'चोः कुः' भुनग् थास् चर्त्वम् भुनक् थास् अल्लापानुस्वारपरसवर्णौ अभुङ्क्थ अभुञ्चाथां, भुनज् ध्वम् चोः कु भुनग् ध्वम् अल्लोपानुस्वारपरसवर्णोः अभुङ्गध्वम् भुनज् इ श्नसोरल्लोपः अनुस्वारपरसवर्णौ अभुञ्चि, भुनज् वहि अल्लोप अनुस्वारपरसवर्णाटः अभुञ्ज्वहि अभुञ्ज्महि ।

अयुनक् अयुनग् अयुक्त अयुञ्जातामित्यादि ।।
तनुमनु, लटि झोऽन्तश्च तत्रैव स्यादिको यणचीति यण् ।
तिबन्तिसिप्स्वितश्चेति त्रिष्विकारस्य लुग् भवेत् ।।
पुनस्तेस्तकारस्य संयोगन्तस्य लोपता ।
अवादेशेऽमि परतो झस्यात् स्यादात्मनेपदे ।।
आतामताथामिट् चैषु परतो यण् भवेदिकः ।
लोपश्चास्येत्युलोपो वा वमादौ प्रत्यये परे ।।
उभयत्रैतदावनोत् पश्चादमनुत क्रमात् ।। इति ।।

तनुति 'सार्वधातुके'त्यादिना गुणः तनोति इतश्च तनोत् अतनोत् अतनुताम्, तनुझि झोऽन्तः तनु अन्ति यण् तन्वन्ति इतश्च तन्वन्त् संयोगन्तलोपः अतन्वन् तनु सि गुणः तनो सि इतश्च तनोस् अट् रुत्वविसर्गौ अतनोः अतनुतं अतनुत, तनु अं गुणः तनो अम् अवादेशः अट् अतनवम् ,तनु वस् 'नित्यंङितः' तनुव लोपश्चेत्यादिनालोपः अतन्व ,अतनुव अतन्म ,अतनुम।। अमनुत मनु आताम् यण् अमन्वाताम् मनुझ झस्यात् मनु अत यणटौ अमन्वत, अमनुथाः अमन्वाथां अमनुध्वम् ,मनु इ ,इणोयणटौ अमन्वि ,मनुवहि लोपश्चे ति वोलोपः अमन्वहि अमनुवहि अमन्महि अमनुमहि ।।

कुरु, प्रायो लङि करोतेश्च तनुमन्वोरिहोक्तवत् ।
अत उत् स्यादपित्वे तु नित्यमुल्लोपता भवेत् ।।
वमयोरकरोत् पश्चात् तथैवाकुरुत क्रमात् ।। इति ।।

कुरु ति 'सार्वधातुके' ति गुणः करोति 'इतश्च' अकरोत् अकुरुताम् अपित्सु पञ्चदशसु "अत उत् सार्वधातुके" ६-४-११० इति ककारेऽकारस्योकारः अकुरुताम् कुरु झि 'झोऽन्तः' कुरु अन्ति अत उत् कुरुअन्ति इतश्च यण् कुर्वन्त् द्वित्वम् कुर्वन्त् अट् संयोगान्तलोपः अकुर्वन् ,कुरसि 'इतश्च' अट् अकरोस् अकरोः अकुरुतंअकुरुत ,करु अम् करो अम् अटवौ अकरवं करुवस् अत उत् सार्वधातुके करुवस् नित्यं ङितः कुरव इको यण् द्वित्वम् अकुर्व अकुर्म।

अकुरुत कुरुआताम् यण् द्वित्वम् अट् अकुर्वाताम् कुरु झ अत् कुरु अत् यण् द्वित्वम् ,अकुर्वत कुरु इ यण् द्वित्वम् अट् अकुर्वि अकुर्वहि अकुर्महि ।।

अक्रीणात् अक्रीणीताम् अवृणीत अगृह्णाात् अगृह्णीतेत्यादि । अचोरयत् अचोरयत अपालयत् अपालयत आर्चयत् आचर्यतेत्यादि ।। **इति लङ्** ।।

अथ लोट् प्रक्रिया

'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङि' ति वर्त्तमाने 'लोट् च' ३-३-१६२ धातोर्लोट् प्रत्ययो भवति विध्यादिविशिष्टेष्वर्थेषु 'आशिषि लिङ्लोटौ' ३-३-१७३ आशीर्विशिष्टेऽर्थे वर्त्तमानाद्धातोर्लिङ्लोटौ प्रत्ययौ भवतः लोडादेशानामिकारस्योकारादेशो भवति 'तुह्योस्तातङाशिष्यन्यतरस्याम्' ७-१-३५ तुहीत्येतयोराशिषि विषये तातङादेशो भवत्यन्यतरस्याम् ङकारो गुणवृद्धिप्रतिषेधार्थः नान्तादेशार्थः ।

तातङि ङित्वं सङ्क्रमकृत् स्यादन्त्यविधिश्चेत् तच्च ।
हेरधिकारे हेरधिकारोलोपविधौ तु ज्ञापयितुमाह ।।

भवतु भवतात् लोटो लङ्वत् ३-४-५८ लोट लङ इव कार्यं भवति तामादयः सलोपश्च।

विदो लटो वेत्यतो वाग्रहणमनुवर्तते ।
व्यावस्थित विभाषा च विज्ञायते ।।

तेन तामादयः सलोपश्चैव भवति भवतां भवन्तु इत्यत्र तोस्तातङादेशो न भवति । 'अर्थवद्ग्रहणे नानर्थकस्ये' ति न्यायात् 'सेर्ह्यपिच्च' ३-४-८७ लोडादेशस्य सेहिरादेशो भवत्यपिच्च भवति ,'अतोहेः' ६-४-१०५ अकारान्तादङ्गादुत्तरस्य हेर्लुग्भवति भव भवतात् भवतं भवत 'मेर्निः' ३-४-८९ लोडादेशस्य मेर्निरादेशो भवति विधानसामर्थ्याद्धिन्योरुत्वं न भवति 'आडुत्तमस्य पिच्च' ३-४-९२ लोट् सम्बनद्धिन उत्तमपुरुषस्याडागमो भवति स चोत्तमपुरुष पिद् भवति । भवानि भवाव भवाम 'आमेतः' ३-४-९० लोट्सम्बन्धिन एकास्यामादेशोभवति एधतां एधेतां एधन्ताम् 'सवभ्यां वामौ'। ३-४-९१ सकारवकाराभ्यामुत्तरस्य लोटसम्बन्धिन एकारस्य यथासंख्यंअमादेशौभवतः एधस्व एधेथां एधध्वम् 'एत ऐ' ३-४-९३ लोटसम्बन्धिन उत्तमपुरषस्यैकारस्य ऐकारादेशे भवति, एधै एधावहै एधामहै।।

भव, विभक्तियोजनामार्गे लोटि तावत् प्रदर्श्यते ।
झोऽन्तश्चातो गुणे पश्चादेरुरन्ते तिपश्च सः ।।
सेर्ह्यपिच्चेति सेर्हिः स्यात् तुह्योर्वा तातङाशिषि ।
अतोहे रिति हेर्लुक् स्यात्मेर्निश्चाडुत्तमस्य च ।
तस्मिन्सवर्णदीर्घश्च शंनो भवतु सर्वतः । इति ।।

भवति 'एरु' ३-४-८६ भवतु भवहीत्यनयोरविवक्षिते 'तुह्यो' रित्यादिना तातङ्वा ङकाराकारयोलोप अकार उच्चारणार्थः । भवतात् 'तस्थस्थमिपां तान्तन्तामः' भवतां भवन्ति एरुः भवन्तु भवन्ति 'सेर्ह्यपिच्चे'ति सेःहिः भवति 'तुह्यो' रिति वा तातङ् तातङभावे भवहीत्यत्र 'अतो हे' रिति लुग्भवति भव

भवतात् भवतं भवत भवमि 'मेर्नि' अमोडपवादः भवति 'आडुत्तमस्यपिच्च' टित्वादादिः तत्र सवर्णदीर्धश्च भवानि भवा वस् 'नित्यं ङित' इति सकारलोपः भवाव भवाम 'अक सवर्णे दीर्घः' ।।

एधः,आतोङितश्च लोपो व्योराद्गुणो झोन्त इत्यपि।
आतो गुणे च थामः से टित इत्येत्वमष्टसु ।।
प्रथमे मध्यमद्यर्थे चामेतः स्याच्चतुर्ष्वसौ
मध्यमैकार्थबहर्थयोः सवाक्यामितीरितः ।।
उत्तमे त्वेत ए पश्चात् तत्रैलडुत्तमस्य च ।
इट्याटश्चेति वृद्धिः स्यादि वृद्धिरेचीति च क्रमात् ।।
सवर्णदीर्घोऽन्ययोः स्यादेधतां बाह्मणान्वयः ।। इति ।।

'आतो ङित' इत्यादि टित इत्येत्वमष्टसु इत्यन्तं लट्युक्तवदेव ।अष्टस्वेत्वे कृते प्रथमुरुषे मध्यमपुरुषद्विवचने च आमेत इत्येकारस्यामादेशः एधतां एधेतां एधन्ताम् एधसे एधध्व इत्यनयोः 'सवाभ्यां वामा' विति सकारस्वकाराभ्यास्यैकारस्य यथासंख्यं वामावित्येतावदेशौ भवतः इमावामादेशपवादौ एवस्व तधेथां एध ध्वम् एध इ टेरेत्वम् एधए एध वहे उत्तम एकारस्य तु 'एताऐ' इत्यैकाररादेशःअयमप्यमादेशापवादः एध ऐ एध वहै उत्तमस्याडागमः एकवचने एध इट् इति स्थिते 'आटश्चे'ति आट् एध ऐ पुनरैकारस्य शबकारस्य च 'वृद्धिरेची' त्येकावृद्धि एधै एध आ वहै सवर्णदीर्घ एधावहै एधामहै ।। पचतु पचतात् पवतां पचेतां पचन्तामित्यादि। नन्दुतु नन्दात्ध्वंसतां ध्वं सेताम् व्ययतु व्ययतात् व्ययतां व्ययेतां व्ययन्तामित्यादि।। अद्, सेर्ह्यपिच्चोति झोऽन्तश्चाप्येस्तुह्योर्हुझल् पुनः ।

खरिचेति मेर्निश्चाडुत्तमस्यात्तु गौस्मृणम् ।। इति ।।

अद् ति एरुः अदतु 'तुह्यो' रिति वातातङ् अद् तात् खरि च । अत्तु अत्तात् अद्तां चर्त्वम् अत्ताम् अद् झि 'झोऽन्तः' अदन्ति । 'एरुः' अदन्तु ,

अद्‌िस सेः हिअद हि , तातङ् अद् हीत्यत्र तातङभावे 'हुझल्भ्यो हेर्धि' ६-४-१०१ रिति हेर्धिरादेशः । अद् धि अद्धि अत्तात् अत्तं अत्त अदमिमेर्निः अदं नि उत्तमस्याटा अद् आनि, अदानि अद् आ वस् नित्यं ङितः इति सलोपः अदानि अदाव अदाम हुझल्पयो हेर्धिः हु इत्ये तस्माज्झलन्तेवयस्तरस्य हलादेर्हेर्धिरादेशो भवति हलादेरित्येव रुदिहि स्वपिहि, 'रुधादिभ्याः सार्वधातुक' इतीढागमः ।।

शे, झस्यात्मनेपदेष्वत स्यादच्चब्दस्य रुडागमः ।
शीङरुडिति थासः से टित आमेत इत्यपि ।।
सवाभ्यामिति चादेप्रप्रत्ययेति च सस्य षः ।
एत ऐचाडुत्तमस्य पिच्च चाटाश्च वै पुनः ।।
पञ्चस्वेचोऽयवायावः शेतामत्र भवान् सुखम् ।। इति ।।

शेत टेरेत्वम् 'आमेतः' शेआताम् अयादेशः शयाताम् टेरेत्वम् शयाते'आमेतः' शयाताम् शे झ आत्मनेपदेष्वनत शे अत शीङो रुट् ,शेर अत टेरेत्वम् शेरते 'आमेतः' शेरताम् थासः से सवाभ्यामित्येकारस्य वकारः शेस् व षत्वम् शेष्व, शयाथां शेध्वम् टेरेत्वम् शेध्वे 'सवाभ्या' मित्येकारस्याम् शेध्वम्, शे इ टेरेत्वं शेए एत ए, "आडुतमस्य" शेआ ऐ, वृद्धिः शये शेवहि एत्वम् शेवहेः, 'एत ए' शेवहे, 'आडुत्तमस्य' शे आ वहै अयादेश शयावहै शयामहै ।।

ब्रू, झस्यात्मनेपदेष्वत् स्यात् तथा झेर्झोन्त इत्यपि ।
इटोऽन्तत्र त्वजादौ स्यादचि श्न्वित्यादिना ह्युवङ् ।।
एरुश्च सेर्ह्यपिच्चेति तुह्योर्वा तातङाशिषि ।
मेर्निश्च प्रथमैकार्थे पितः स्याद् ब्रुव ईडि ति ।।
थासः से टित इत्यादिना स्याट्टेरेत्वमष्टसु ।
प्रथमे मध्यमद्व्यर्थे चामेतः स्याच्चतुर्ष्वपि ।।
मध्यमैकार्थबह्वर्थयोः सवाभ्यामितीरितः ।
सस्य षत्वं चोत्तमे स्यादेत ऐ चात्मनेपदे ।।

उभयत्रडुत्तमस्य तत्रेट्याटश्च सप्तसु ।
पित्सु स्यात् सार्वधात्वादिर्गुणोऽवादेश एव च ।।
अपित्वं सेर्हिरादेशाङित्वमेव हि तातङः ।
लोडुत्तमस्य पित्वं स्यात् सर्वत्राडागमे कृते ।।
नस्य णत्वं ब्रवीतु स्याद् ब्रूतां चापि क्रमादिह ।। इति ।।

ब्रूति, 'एरुः' ब्रू तु तुह्योर्वातातङ् अत्र तातङभावे ब्रू तु इत्यत्र ब्रुव ईडि तीडागमः ब्रुई त 'सार्वधातुके' तिगुणः ब्रो ई तु अवादेश ब्रवीतु ब्रूतात् ब्रूतां ब्रू झि झोऽन्तः ब्रू अन्ति उवङ् ब्रुवन्ति 'एरुः' ब्रुवन्तु ब्रूसि 'सेर्ह्यपिच्च' ब्रूहि तुह्योर्वा तातङ् ब्रूतात् ब्रूतं ब्रूत ब्रूमि मेर्निः ब्रूनि 'आडुत्तमस्य' ब्रूआनि 'सार्वधातुके'ति गुणः ब्रो आ नि अथ ब्रवानि 'अट्कुप्वाङि'ति णत्वम् ब्रवाणि, ब्रूवस् आट्,ब्रूआ वस् गुणः ब्रो आ वस् अवादेश ब्रव् वस् नित्यं ङित ब्रवाव ब्रवाम, ब्रूत टेरेत्वम् ब्रूते आमेतः ब्रुताम् ब्रू आताम् उवङ् ब्रुवाताम् ,ब्रूवात् आमेतः ब्रूवाताम् ब्रूथास् थासः से ब्रूसे सवाभ्या मित्येकारस्य वकारः ब्रूस्व षत्वम् ब्रूष्व ब्रुवाथां ब्रूध्वम् टेरेत्वम् ब्रूध्वे, सवाभ्यमित्येकारस्याम् ब्रूध्वम् ,ब्रूइ टेरेत्वम् ब्रूए एत ऐ आट्,ब्रूआ ऐ ब्रूऐ सार्वधातुकयोरिति गुणः ब्रो ऐ ब्रवै ब्रूवहि टेरेत्वम् ब्रूवहे, एत ऐ ब्रू वहै, ब्रूआवहे गुणावादेशौ ब्रवावहै ब्रवामहै ।।

जुहु, अदभ्यस्तादुत्तरस्य तत्र यण् हुश्नुवोरिति ।
एरुश्च सेर्ह्यपिच्चेति तुह्योर्वा तातङाशिषि ।।
अन्यत्र हेर्धिरादेशो हुझल्भ्यो हेर्धिरित्यतः ।
मेर्निराडुत्तमस्यस्यात् पुनः पित्सु चतुर्ष्वपि ।।
गुणः स्यात् सार्वधात्वादिस्ततोऽवादेश उत्तमे ।
गृहस्थोऽनहिताग्निश्च साराम्प्रातर्जुहोतु सः ।। इति ।।

जुहुति 'एरुः' जुहुतु वा तातङ् जुहोतु जुहुतात् जुहुतां जुहु झि अदभ्यस्तात् जुहुअति जुहुअति हुश्नुवोरिति यण् जुह्वति 'एरुः' जुह्वतु जुहुसि सेः हि जुहु

वा तातङ् 'हुझल्भ्यो हेर्धि रिति हेर्धि' जुहुधि जुहुतात् जुहुतं जुहुत जुहुमि मेर्नि जुहुनि आट् जुहु आनि गुणावादेशौ जुहवानि जुहुवस् आट् जुहुआवस् गुणावादेशौ 'नित्यं ङितः'जुहवाव जुहवाम।

जिहा, अदभ्यस्ताज्झकारस्य प्रथमे मध्यमेऽपि च ।
ई हल्यघोरितीत्वं स्यादाकारस्य हलादिषु ।।
आकारलोपः श्नाभ्यस्तयोरिति स्यादजादिषु ।
थासः से पुनरष्टासु टेरेत्वं टितः आदिना ।।
प्रथमे मध्यमे द्व्यर्थे चामेतः स्याच्चतुर्ष्वपि ।
मध्यमैकार्थबह्वर्थयोः सवाभ्यामितीरितः ।।
सस्यषत्वं चोत्तगे स्यादेत ऐ पुनराडपि ।
एकत्वे तत्र चाटश्च वृद्धिरेचीति च कमात् ।।
सवर्णदीर्धस्त्वन्यत्र जिहीतां सुकृती दीवम् ।। इति ।।

जिहात 'ई हली' तीत्वम् जिहीत टेरेत्वम् जिहीते आमेतः जिहीताम् जिहा आताम् श्नाभ्यस्तयोरित्यकारलोपः स्यात् जिह आताम् टेरेत्वम् जिहाते आमेतः जिहाताम् जिहा झ,जिहा अत् 'श्नाभ्यस्तयो'रित्याकारलोपः जिह अत एत्वम् जिहताम् ,जिहाथास्'थासः से' ई हलि जिहीसे 'सवाभ्यां' जिहीस्व षत्वम् जिहीष्व जिहाथां जिहाध्वम् टेरत्वं जिहीध्वे 'सवाभ्या' मि जिहीध्वम् जिहा इ टेरेत्वम् जिहा ए 'एत ऐ' जिहा ऐ आट् जिहा आ ऐ आट्श्च जिहा ऐ वृद्धिरेचि जिहै जिहावहि एत्वम् जिहावहे जिहामहे आट् सवर्णदीर्धः जिहावहै जहामहै ।

दधा, झकारयोरदभ्यस्तात् थासः से मेर्निरेव च ।
एरुश्च सेर्ह्यपिच्चेति तुह्योर्वा तातङाशिषि ।।
अन्यत्र हौ घुसंज्ञायमेकारोऽङ्गस्य वै पुनः ।
अभ्यासलोपश्च भवेद् ध्वसोरेद्धावितीह सः ।।

धेहिवर्जमपित्सु स्याल्लोपः श्नाभ्यस्तयोरिति ।
दधस्तथोश्चेत्यष्टासु दकारस्य धकारता ।।
सप्तस्वेषु द्वितीयस्य धकारस्येह चर् भवेत् ।
ध्वमि जश्त्वं मध्यमस्य धकारस्य झलामिति ।।
अष्टासु टित इत्येत्वं चतुर्ष्वामेत इत्यपि ।
मध्यमैकार्थबह्वर्थयोः सवाभ्यामितीरितः ।।
आत्मने तूत्तमे ह्येत ऐ पश्चादभयोरपि ।
आडुत्तमस्येट्याटश्च वृद्धिरेचीति च क्रमात् ।।
सवर्णदीर्घस्त्वन्येषु धत्तां पूर्वं दधात्विति ।। इति ।।

दधाति एरुः दधातु तातङ् दधा तात् श्नाभ्यस्तेति अकारलोपः ।दध् तात् दधस्तथोश्च इति दकारस्य धकारः धध् तात् 'खरि चे' ति द्वितीयधकारस्य चर्त्वम् । धत्तात् दधाताम् 'श्नाभ्यस्ते'ति दध्ताम् धध्ताम् चर्त्वम् धत्ताम् ,दधा झि 'अदभ्यस्तात्' दधा अति दधति एरुः दधतु दधासि 'सेर्हि' दधाहि वा तातङ् दधा तात् 'दाधाघ्वदाबि' १-१-२० ति धतोर्घुसंज्ञायां 'घ्वसोरेद्धावभ्यासलीपश्चे' ६-४-११९ त्यङ्गस्यैकारादेशोऽभ्यासलोपश्च धेहि। धत्तात् धत्तं धत्त दधामि मेर्नि आडुत्तमस्य दधा आनि सवर्णदीर्घः दधानि दधा वस् आट् दधा आ वस् सवर्णदीर्घः नित्यं ङितः दधाव दधाम ।। दधा त शनाभ्यस्त ,दध् त 'दधस्तथा' धध् त्त धत्त, एत्वम् 'आमेतः'धत्ताम् , दधा आताम् दध् एत्वमाम्त्वं च । दधाताम् दधा झ 'अदभ्यस्तात्' दधा अत 'श्नाभ्यस्त' दधत एत्वमाम्त्वं च दधताम् ,दधा थास् 'थासः से' दधा स श्नाभ्यस्त दध् से दधस्तथोश्च धध् से 'खरि' चर्त्वं च । धत्से 'सवाभ्यां वामौ' धत्स्व दधाथां ,दधा ध्वम् 'श्नाभ्यस्तयो' दध् ध्वम् 'दधस्तथोश्च' धध् ध्वम् मध्यमधकारस्य 'झलां जश् झशी'ति दत्वं टेरेत्वम् धद्ध्वे 'सवाभ्यां' धध्वम् ,दधा इ एत्वम् दधा ए , आडुत्तमस्य दधा ऐआटश्च दधा ऐ वृद्धिरेचि । दधै ,दधा वहि एत्वं दधा वहै आट् दधा आ वहै सवर्णदीर्घः दधावहै दधामहै

'दाधाघ्वदाप'् दारूपाश्चत्वारो धातवो धारूपौ च द्वौ घुसंज्ञा भवन्ति दाब्दैपौ वर्जयित्वा 'ध्वसारेद्धावभ्यासलोपश्च' घुसंज्ञकानामङ्गानामस्तेश्चैकारो भवति हौ परतोऽभ्यासलोपश्च ।। दीव्यतु दीव्यतात् सूयतां सूयेताम् नह्यतु नह्यतात् नह्यतां न ह्योतां त्यादि ।।

सुनुचिनू, झोऽन्तश्च हुश्नुवोरेरुः सेर्ह्यपित् तातङाशिषि ।
तातङोऽन्यत्र हेर्लुक् स्यादुतश्च प्रत्यादिना ।।
मेर्निराड्डुत्तमे पित्सु सार्वधात्वादिना गुणः ।
उत्तमे स्यादवादेशः सुनोतु च चिनोतुं च ।। इति ।।

सुनु ति 'एरुः' सुनु तु वा तातङ् सुनुइत्यसार्वधत्वदिगुणः । सुनोतु सुनुतात् सुनुतां सुन झि झोऽन्तः । सुनु अन्ति 'हुश्नुवो'रिति यण् सुन्वन्ति 'एरुः' सुन्वन्तु सुनु सि 'सेर्ह्यपिच्च' सुनुहि तात ङ् सुनुए इत्यत्र 'उतश्च' प्रत्ययादिना हेर्लुक् सुनु सुनुतात् सुनुतं सुनुत, सुनु मि 'मेर्निः' सुनु नि आड्डुत्तमस्य सुनु आनि गुणावादेशौ सुनवानि सुनु वस् आट् सुनु आ वस् गुणः सुनो आवस् अवादेशः 'नित्यं ङितः' सुनवाव सुनवाम एवं चिनोत्वित्यादि।। 'उतश्च प्रत्ययादसंयोगपूर्वात्' त्योऽयमुकारोऽसंयोग-पूर्वस्तदन्तात् प्रत्ययादुतरस्य हेर्लुग् भवति ।।

अश्नु चिनु झस्यात्मनेपदेष्वत् स्यादजादौ स्यादुवङ् च यण् ।
थासः से टित आमेतः सवाभ्यां सस्य षः पुनः ।।
एत ऐ चाड्डुत्तमस्य तत्रेट्याटश्च वै गुणः ।
सार्वधात्वित्यवादेश्चाश्नुतां चिनुतां क्रमात् ।। इति ।।

अश्नुत टेरेत्वम् आमेतः अश्नुताम् अश्नोतेरजादिषु विभक्तिषु परतः अचि श्नुधत्वित्यादिनोवङ् चिनोतेस्तु तेषु परतो 'हुश्नुवो'रिति यण् इत्येवानयोर्विशेषुः अन्यत् सर्वं समानम् अश्नु आताम् उवङ् अश्नुवाताम् टेरेत्वम् आमेध्वस्च अश्नुवाताम् अश्नु झ 'आत्मनेपदेष्वनत' अश्नुअत् उवङ् अश्नुवत टेरेत्वम्

आत्मनेपद अश्नुवानाम् अश्नु थास् थासः से अश्नु से 'सवाभ्यां' अश्नु स्व षत्वम् अश्नुष्व अश्नुवायां अश्नुध्वम् टेरेत्वम् अश्नुध्वेसवाभ्या अश्नुध्वम् अश्नु इ टेरेत्वम् अश्नु ए सुतरा अश्नु ते आडुत्तमस्य अश्नु आ ए 'आटश्च' अश्नु ऐ गुणः. अश्नोऐ अत वादेश अश्नवै अश्नुवहि टेरेत्वम् अश्नु वहे एत्वम् अश्नु वहै, आट् अश्नु आ वहै गुणः अश्नो आ वहै अवादेश अश्नवावहै अश्नवामहै चिनोतु चिनुतात् चिनुतां चन्वन्तु चिनुतां चिन्वातामित्यादि । तुद, तुदतु तुदतादित्यादि म्रियतां म्रियेतामित्यादि, मुञ्चतु मुञ्चतादित्यादि मुञ्चतां मुञ्चेतामित्यादि ।

रुनध्, झस्यात्मनेपदेत्वत् थासः से झोऽन्तस्त्वेरुश्च सेर्ह्यपित् ।
तुह्योस्तातङ् हुझल्भ्यो हेर्मेनिष्टेरेत्वमष्टसु ।।
आमेतश्च सवाभ्यां वामामेत ए चोभयोरथ ।
आडुत्तस्येट्याटश्च पुनर्धत्वं झषस्तथोः ।।
पित्सु णत्वं नकारस्य धोः परत्वे तु धस्य जश् ।
अपित्स्विह नकारेऽतः श्नसोरल्लोप इत्यथ ।।
झरोझरि सवर्णे लुगधल उत्तरवर्त्तिनः ।
नस्य त्वपित्स्वनुस्वारः पुनः परसवर्णता ।।
थासि चर्त्वं धकारस्य रुन्धां पूर्वं रुणद्धिति ।। इति ।।

रनध् ति 'एरुः' रुनध् तु वा तातङ् रुनध् तात् 'झषस्तथो-ध' रुनध् ध् रुनध् धात् पूर्वत्र 'अट्कुप्वाङिति' णत्वम् रुणध् धु 'झला जश्झशी'ति रुणद्धु रुनध् धात् 'श्नसोरल्लोपः' रुनध् धात् 'झरो झरि सवर्णे' रुन्धात् अनुस्वार परसवर्णे रुन्धात् रुनध् ताम् 'झषस्तथो' धत्वं रुनध धाम् रुनध् धाम् रुन धाम् अल्लोपानुस्वारपरसवर्णोः रुन्धां , रुनध् झि 'झोऽन्तः' रुनध् अन्ति एरुः रुनधन्तु 'श्नसो' रुनधन्तु अनुस्वारपरसवर्णो रुन्धन्तु ,रुनध् सि 'सर्ह्यपिच्च'रुनध् हि वा तातङ् तातङभावे रुनध्हि 'हुझल्भ्यो हेर्धि' रिति धिरादेश रुनध् धि रुन्धि रुन्धात् रुन्धं रुन्ध, रुनध् मि 'मेर्निः' रुनध् नि आट् उत्तमस्य रुनध आ नि

णत्वम् रुणधानि रुनध् वस् आट् रुनध् आ वस् 'अट्कुप्वाङ्' णत्वम् रुणधा वस् 'नित्यं ङितः' रुणधाव रुणधाम।रुनध् त धत्वं रुनध् ध रुन्धाम् रुनध् आताम् श्नसोरल्लोपः रुन्ध् आताम् अनुरुन्धाताम् टेरेत्वम् रुन्धाते आमेतः रुन्धाताम्, रुनध् झ 'आत्मनेपदेष्वनतः' झस्यात् रुनध् अत 'श्नसो' रुन्ध् रुन्धत एत्वम् 'आमेतः' रुन्धताम् ,रुनध् थास् 'थासः से' रुनध् से रुनध् से 'खरि च' रुनत् से रुन्त्से। रुनध् ध्वम् अनुरुन्ध्वम् टेरेत्वम् रुन्ध्वे सवाभ्यां रुन्ध्वम् । रुनध् इ टेरेत्वम् रुनध् ए एत ऐ रुनध् ऐ आडुत्तमस्य रुनध् आ ऐ आटश्च रुनध् ऐ णत्वम् रुणधै ,रुनध् वहि टेरेत्वम् रुनध् वहे ऐत्वम् रुनध् वहै आट् उत्तमस्य रुनध् आ वहै णत्वम् रुणधावहै रुणधामहै ।।

भुनज् युनज् झस्यात्मनेष्वत् थासः से झोऽन्तस्त्वेरुश्चसर्ह्यपित् ।
तुह्योस्तातङ् हुझल्भ्यो हेमेर्निष्टेरेत्वमष्टसु ।।
आमेतश्च सवाभ्यां वामेत ऐ चोभयोरथ ।
आडुत्तमस्याट्याटश्च चोः कुः खरिच गस्य तत् ।।
अपित्स्वथ नकारेऽतः श्नसोरल्लोप इत्यपि ।
नश्चापदेत्यनुस्वारः पुनः परसवर्णता ।।
थासि षत्वं सकारस्य भुनक्तु च युनक्तु च ।
भुङ्क्तामिति च युङ्क्तां च मार्गसाम्याद् भवेदिति ।। इति ।।

भुनज् ति एरु भुनज् तु वा तातङ् भुनज् तात् 'चोः कुः' । भुनग् तु 'खरि च' भुनक्त भुनज् तादित्यत्र चोः कुः भुनग् तात् 'खरि च' भुनक् तात् 'श्नसोरल्लोपः' अनुस्वारपरसवर्णौ भुङ्क्तात् भुनज्ताम् कुत्वचर्त्वे श्नसोरल्लोप अनुस्वारपरसवर्णौ भुङ्क्ताम् ,भुनज् झि 'झोन्त' भुनज् अन्ति 'श्नसोरल्लोप' भुञ्जन्ति भुञ्जन्त ,भुनज् सि 'सेर्ह्यपिच्च' भुनज् हि, वा तातङ् तादङभावे भुनज् हीत्यत्र भुनज् धि 'चोः कुः' भुनग् धि 'श्नसोरल्लोप' भुङग्धि भुङ्क्तात् भुङ्क्तं भुङ्क्त, भुनज् मि मेर्निः भुनज् नि आट् उत्तमस्य भुनज् आ नि भुनजानि भुनज् वस् आट् 'नित्यंङित'

भुनजाव भुनजाम। भुनज् त 'चोः कुः' 'खरि च' भुनक्त श्नसोरल्लोपानुस्वार-परसवर्णौ भुङ्क्त टेरेत्वम् आमेतः भुङ्क्ताम् ,भुनज् आताम् श्नसोः लेपानुस्वारपरसवर्णाः भुङ्क्ताम् एत्वमाम्त्वः च भुञ्चाताम् भुनज् झ 'आत्मनेपदेष्वनतः' भुनज् अत श्नः अल्लोपानुस्वारपरसवर्णाः भुञ्चत एत्वमाम्त्वं च भुञ्चताम् ,भुनज् थास् 'थासः से' भुनज् से 'चोः कुः' भुनग् से । 'खरि च' 'सवाभ्यां' भुङ्क्ष्व भुञ्जाथाम् भुज् ध्वम् चोः कुः भुनग् ध्वम् श्नसोःलोपः अनस्वारपरसवर्णौ भुङ्ग्ध्वम् भुनज् इ टेरेत्वम् एत ए भुनज् ए आट् । भुनज् आऐ 'आटश्च' भनज् ऐ भुनजै भुनज् वहि टेरेत्वं भुनज् वहै आट् भुनज् आ वहै भुनजावहै भुनज् वहि टेरेत्वम् भुनज् वहै आट् भुनज् आ वहै भुनजावहै भुनजामहै युनक्तु युक्तादित्यादि युक्तां युञ्जातमित्यादि ।।

तनु, झोऽन्तश्च तत्र यण् पश्चादेरुः सेर्ह्यापदित्यथ ।
तुह्योस्तातङ् च हेर्लुक् स्यादुतश्च प्रत्ययादिना ।।
मेर्निराडुत्तमस्य स्यात् सार्वधात्वादिना गुणः ।
पित्सूत्तमे त्ववादेशस्तनोतु तनुतादथ ।। इति ।।

तनु ति 'एरुः' तनुतु तातङ् गुणः तनोत तनुतात् तनु'तां तनु झि 'झऽन्त' तनु अन्ति तन्वन्तु तनु सि 'सेर्हिः' तनुहि तुह्योर्वातातङ् तनुहीत्यत्र 'उतश्चे'त्यादिना हेर्लुक् तनु तनु तात् तनुतं तनुत तनु मि 'मेर्निः' तनु नि आट् तनु आनि गुणः तनो आनि अवादेशः तनवानि तनुवस् आट् तनु आ वस् गुणः तनोअवादेशः तनवाव तनवाम ।।

मनु, झस्यात्मनेपदेष्वत् स्यादातामाथामतेषु यण् ।
थासः से टित आमेतः सवाभ्यां सस्य षः पुनः ।।
एत ऐ चाडुत्तमाटः सार्वधात्वादिना गुणः ।
अवादैशश्च मनुतां मन्वातां मन्वतां पुनः ।। इति ।।

मनुत टेरेत्वम् 'आमेतः' मनुताम् मनु आताम् यण् एत्वमाम्त्वं च मन्वाताम् मनु झ यण् मन्वत टेरेत्वे मन्वताम् मनु थास् 'थासः से' 'सवाभ्यां' षत्वम् मनुष्व मन्वाथां मनुध्वम् टेरेत्वम् मनुध्वे सवाभ्यां मनुध्वम् मनु इ टेरेत्वम् एत ए मनु ऐ आट् मनु आ ऐ 'आटश्च' मनु ऐ गुण मनवै मनु वहि टेरेत्वम् मनुवहे एत ऐ, मनु वहै, आट् मनु आ वहै गुणः मनो आ वहै अव् मनवावहै मनवामहै।।

कुरु, झस्यात्मने त्वत् थासः से झोऽन्तः स्याद्यण् चतुर्ष्वथ ।
एरुश्च सेर्ह्यपिच्चेति तुह्योर्वा तातङाशिषि ।।
तातङोऽन्यत्र हेर्लुक् स्यादुतश्च प्रत्ययादिना ।
त्रयोदशस्वपित्सु स्यादत उत् सार्वधातुके ।।
मेर्निश्च टित आमेतः सवाभ्यां सस्य वः पुनः ।
एत ऐ चाडुत्तमस्य तत्रेट्याटश्च सप्तसु ।।
पित्सु स्यात् सार्वधात्वादिर्गुण उत्तमयोर्द्वयोः ।
अवादेशश्च णत्वं तु नकारस्य पुनर्भवेत् ।।
तदा करोतु कुरतात् कुरुतां धर्ममादरात् ।। इति ।।

कुरु ति 'एरुः' कुरु तु वा तातङ् कुरतात् कुर त्वित्यत्र गुणः करोतु अपित्सु त्रयोदशसु अत उत् 'सार्वधातुके' इति ककारेऽकारस्योकारः कुरतात् कुरताम् कुरुझि 'सोऽन्तः' कुरु अन्ति । 'इको यणचि' कुर्वन्ति एरुः कुर्वन्तु कुरु सि कुरुहि तातङ् कुरु हीत्यत्र हेलुगुतश्चेति कुरु कुरुतात् कुरुतं कुरुत, कुरु मि 'मेर्निः' कुरुनि आट् कुरु आनि गुण करो आनि अवादेशे णत्वम् करवाणि, वस् आट् करुआ वस् गुणः । करो आ वस् अवादेश नित्यं ङितः करवाव करवाम कुरु टेरेत्वम् आमेतः कुरुताम् ।

कुरु आताम् इकोयणचि कुर्वाताम् कुरु झ कुरु अत यण् कुर्वते टेरत्वं कुर्वते ,कुर्वताम् कुरुथास् थासः से कुरुसे षत्वे प्राप्ते पूर्वं वकारः सयाभ्यां वा मौ कुरुस्व षत्वम् कुरष्व कुर्वाथां कुरुध्वम् टेरेत्वम् कुरध्वे सवाभ्यां कुरध्वम् कुरु

इ टेरेत्वम् कुरुध्वे 'सवाभ्यां' कुरध्वम् कुरु इ टेरेत्वम् कुरुए एत ऐ आट् कुरु आ ऐ आटश्च वारुए गुणः करो ऐ अवादेशः करवै करु वहि टेरेत्वम् करु वहे एत ऐ करु आट् करु आ वहै गुणः करो आ वहै अवादेशः करवावहै करवामहै।।

क्रीणातु क्रीणीतात् क्रीणीतां क्रीणन्तु क्रीणीहि क्रीणीतात् क्रीणीतं क्रीणीत क्रीणानि क्रीणाव क्रीणाम वृणीतां वृणातां वृणताम् वृणीष्व वृणाथां वृणीध्वम् वृणौ वृणामहै ।।

ग्रहेर्लोटि सिपः सेर्हौ तातङोऽन्तत्र कथ्यते ।
हलः परस्य शानच् स्यात् श्ना इत्येतस्य हौ परे ।।
अतो हेरिति हेर्लुक् स्यान्नस्य णत्वं गृहाण गाम् ।। इति ।।

ग्रहेर्लोटि तातङभावे गृहा हीति स्थिते 'हलः श्नः शानजा' विति श्नाप्रत्ययस्य शानच् गृहशानच् हि, शकारचकरयोर्लोपः । गृह् आन हि 'अतो हे' 6-4-105 रिति हर्लुक् गृहान 'अट्कुवाङि' ति णत्वम् गृहाण गृह्णातु गृहीतात् गृह्णीतां गृह्णन्तु, गृहाणगृह्णीतात् गृह्णीतं गृह्णीतं गृह्णीत, गृह्णानि गृह्णाव गृह्णाम, गृह्णातामित्यादि । 'हलः श्नः शानज्झौः' हल उत्तरस्य श्नाप्रत्ययस्य शानजादेशो भवति हौ परतः ।।

चोरयतु चोरयतादित्यादि, चोरयतां चोरयेतामित्यादि पालयतु पलयतादित्यादि, पालयतां पालयेतामित्यादि, अर्चतु अर्चयतादित्यादि अर्चयतां अर्चयेतामित्यादि ।। **इति लोट्** ।।

अथ विधिलिङ्।

'विधिनिमन्त्रणामन्त्रणाधीष्ट सम्प्रश्नप्रार्थनेषु लिङ्' ३-३-१६१ विधिः प्रेषणम् निमन्त्रणं नियोगकरणम् आमन्त्रणं कामचारकरणम् अधीष्टः सत्कारपूर्वको व्यापारः सम्प्रश्नः सम्प्रधारणम्, प्रार्थना याञ्चा, धातोर्लिङ्प्रत्ययो भवति विध्यादिष्वर्थेषु 'यासुट् परस्मैपदेषूदात्तो ङिच्च' ३-४-१०३ परस्मैपदविषयस्य लिङो यासुडागमो

भवति सचोदात्तः ङिच्च भवति यासुटो ङिद्वचनं लकाराश्रयं ङित्वमादेशानां न भवतीति ज्ञापनार्थम् 'लिङः सलोपोऽनन्त्यस्य' ७-२-७९ सार्वधातुके यो लिङ् तस्य अनन्त्यस्यसकारस्य लोपो भवति। अनन्त्यस्येति किम् भवेय 'अतो येयः' ७-२-८० आकारान्तादङ्गादुत्तरस्य सार्वधातुकस्यावयवो यो याशब्दस्तस्येयित्ययमादेशो भवति भवेत् भवेतां 'झेर्जुस्' ३-४-१०८ लिङादेशस्य झेर्जुसादेशो भवति भवेयुरित्यादि 'लिङः सीयुट्' ३-४-१०२ लिङादेशानामात्मनेपदानां सीयुट् भवति एधेत एधेयातां 'झस्यरन्' ३-४-१०५ लिङादेशस्य झस्य रन्नित्ययमादशो भवति एधेरन् एधेयाः एधेयाथां एधेध्वम् 'इटोऽत्' ३-४-१०६ लिङादेशस्येटोऽदित्यमादेशोभवति एधेय एधेवहि एधेमहि ॥

विभक्तियोजनामार्गो लिङि तावत् प्रदर्श्यते ।
लिङो यासुट् परस्मै स्यात् सीयुट् स्यादात्मनेपदे ॥
लिङः सलोपोऽनन्त्यस्येत्युभयत्रापि सस्य लुक् ।
अतो येयिति याशब्दस्येयादेशः शशप्श्यनाम् ॥
आद्गुणश्चाथ सर्वत्र झेर्जुस् तथादि पूर्ववत् ।
पुनर्लोपो व्यार्वलीतिवत् परत्वे यकारलुक् ॥
इतश्च तिप्सिपोरेर्लुक् प्राग्वन्नित्यं ङितो भवेत् ॥ इति ॥

भवति इत्यादि 'यासुट् परस्मैपदेषूदात्तो ङिच्चे' ति लिङादेशानां परस्मैपदानां नवानां यासुडागमो भवति टित्वादादिः उकार उच्चारणार्थः टकारो देशविध्यर्थः भवत यास् ति इत्यादि एधत 'लिङः सीयुटि' ति लिङादेशानामात्मनेपदानां नवानां सीयुट् पूर्ववदनुबन्धलोपः एधसीयत इत्यादि 'लिङ सलोपोऽनन्त्यस्ये' ति यासुटः सकारसश्च सीयुटः सस्य चलोपः भव या ति एध ईय् त इत्यादि अथ परस्मैपद एव तत्रापि शविकरणं शब्विकरणं श्यन्विकरणं चुरादय इत्येषां चतुर्णामङ्गस्याकारान्तत्वात् 'अतोयेय' इति याशब्दस्येय् भव इतयति इत्यादि 'आद्गुण 'इति गुणः भवय् ति अथ सर्वेष्वपि विकरणेषु 'झेर्जुसि ति' जुसादेशः

जकारलोप भवेय इस् तस्थस्थमिपां क्रमेण तान्तन्तामः भवेय् तामित्यादि 'लोपो व्योर्वली' ति वलि परतो यकारस्य लोपः भवेतीत्यादि तिप्सिपोः 'इतश्चे'तीकारलोपः भवेत् 'नित्यं ङित' इति वस्मसोः सकारस्य लोपः भवेत् भवेतामित्यादि अथ प्रोक्तेभ्यश्चतुर्भ्योऽन्येषु षटसु विकरणेषु विशेषमाह -

शाप्श्यनोर्विनान्येषु नेयादेशायलुग्गुणाः ।
तेषु रूपस्य पदान्तादित्यमि पूर्वश्च विद्यते ।।
इत्येव षण्णां भेदः स्याञ्चतुर्भ्यः .... इति ।।

लुग्विकरणं श्लुविकरणं श्नुविकरणं श्नम्विकरणं उविकरणं श्नाविकरणमित्येषां षण्णामङ्गस्यादत्वाद् याशब्दस्येयादेशो न स्यात् । तत एव गुणोऽपि न सम्भवति यकारस्य वल्परत्वाभावन्न च लोपः तेषु षट्सु झेर्जुसादेशानन्तरं 'उस्यपदान्तादि' ६-१-१६ ति पररूपत्वं च मिपोऽमादेशानन्तरं तत्र 'अमिपूर्व' इति पूर्वरूपत्वं च विद्यते। अतात्मनेपदे,

गुणो यल्लुग्झस्य रन् स्यादिटोऽदेधेत मङ्गल ।। इति ।।

दशसुविकरणेषु एध ईय् तेत्यादिषु 'आद्गुण' इति गुणः एधेय् तेत्यादि 'लोपो व्योर्वली' ति यकारस्य वलि परतो लोपः एधेतेत्यादि 'झस्य रन्नि' ति झस्य रन् न विभक्तौ तुस्मा इति नेत्वं नकारस्य 'इटोऽदि' त्यत् तकार उच्चारणार्थः नादेशावयवः ।आत्मनेपदे सर्वत्रैवमेव एधेत एधेयातामित्यादि पचेत् पचेतामित्यादि पचेत पचेयातामित्यादि नन्देत् नन्देतामित्यादि ध्वंसेत ध्वंसेयातामित्यादि व्ययेत व्ययेयातामित्यादि ।

अथात्र, धातुवशाद्यो विशेषः स एव प्रदर्श्यते ।
एष सर्वत्रिको न्यायो विशेषोऽथ प्रदर्श्यते ।
सर्वतः स्याददेर्द्वित्वं .... ।। इति ।।

अद् यादित्यादिषु नवसु 'अनचिच'ति दकारस्य द्वित्वं भवति, अद्यात् अद्यातां अद्युरित्यादि शीङेऽयादेश एव च इति, शेर ई त शे ईय् आताम् इत्यादिषु नवसु 'एचोऽयवायाव' इत्यय् शयीत शयीयातामित्यादि,

अश्नोतेश्च ब्रुवश्च स्यादचि श्न्वित्यादिनाप्युबङ् ।। इति ।।

ब्रू ई त ब्रू ईय आतामित्यादिषु अश्नु ई त अश्नु ईय् आतामित्यादिषु च अचिश्न्वि त्यादिनोवङ् ब्रूयात् ब्रूयातामित्यिादि । ब्रूवीत ब्रुवीयातां ब्रुवीरनित्यादि। जुहुयात् जुहुयातामित्यादि

श्लोः श्नश्चाकारलोपः स्याद् द्वयोः श्नाभ्यस्तयो रिति ।। इति । श्लुविकरणे जिहा ई त जिहा ईय् आतामित्यादिषु श्नाभ्यस्तयो रिति हकार आकारस्यलोपः जिहीत जहीयातां जिहीरन् जिरीथा इत्यादि ।। पासुटो ङित्वाद् दधा यादित्यादिषु नवसु दधा ई त दधा ईय् आतामित्यादिषु च श्नेत्यादिनाकारस्य लोपः दध् यात् दध् ई त दध् ईय आतामिति स्थिते,

स्याद् दधातेश्चनचि च स्याज्झलां जश् झशीतिच ।। इति ।।

दध् यादित्यादिषु नवसु धसा दित्वजश्त्वे दध्यात् दध्यातामित्यादि दधीत दधीयातामित्यादि,

दीव्येत् दीव्येतामित्यादि सूयेत सूयेत सूयातामित्यादि नह्येत् नह्येतामित्यादि नह्येत नह्येतामित्यादि,

सुनुयात् सुनयातामित्यादि अश्नु ई ते तेयादिषु नवसूवङ् अश्नुतीत अश्नुवीयातामित्यादि,

चिनोतेस्तु यणादेशो हुश्नुवोः सर्वधतुके ।। इति ।।

चिनु ई त चिनु ईय् आतामित्यादिषु नवसु हुश्नुवो रिति यण् चिनुयात् चिनुयातामित्यादि, चिन्वीत चिन्वीयातामित्यादि ।। तुदेत् तुदेतामित्यादि ।।

म्रियेत म्रियेयात मित्यादि सुञ्चेत् मुञ्चेता मित्यादि सुञ्चेत मुञ्चेयातामित्यादि ।।

स्याल्लिङि श्नम्विकरणे श्नसोरल्लोप इत्यपि ।
नश्चापदेत्यनुस्वार पुनः परसवरणता ।। इति ।।

रुनध् यादित्यादिषु चतुष्यञ्चारात्सु श्नसो नकारेऽकारस्य लोपः नकारस्यानुस्वारपरसवर्णे च रुन्ध्यातामित्यादि, रुन्धीयत रुन्धीयातामित्यादि भुञ्ज्यात् भुञ्ज्यातामित्यदि । भुञ्जीत भुञ्जीयातामित्यादि युञ्ज्यात् युञ्ज्यातामित्यादि युञ्जीत युञ्जीयातामित्यादि,

तनुयात् ननुयातामित्यादि,
मन्वीतापि च कुर्वीतेत्रेको यणचीति यण् ।। इति ।।

मनु ई त कुर ई त इको यणची ति यणादेशः मन्वीत मन्वीयाता मित्यादि।।

धातोरुप्रत्ययान्तस्य करोतेरत उद् भवेत् ।
सार्वधातुक निष्ठस्य किङिति प्रत्यये परे ।।
येचो त्युलोपो द्वित्वं च सूत्रेणाचरहादिना ।। इति ।।

यासुटो ङित्वात् कुरु यादित्यष्टादशसु 'अत उत् सार्वधातुके' इति ककारेऽकारस्योकारः चेच ६-४-१०९ रेफादुत्तरस्योकरस्यलोपः 'अचो रहाभ्यां द्वे' इति यकारवकारयोर्यथायोगं द्वित्वम् । कुर्यात् कुर्यातामित्यादि कर्वीत कुर्वीयाता इत्यादि । योच उप्रत्ययान्तस्य करोतेरुकारस्य लोपो भवति यकारादौ प्रत्यये परतः ।

परस्मैयासुटो ङत्वात् सर्वत्रेहल्यघोरिति ।। इति ।।

क्रीणीयात् क्रीणीयातामित्यादि वृणा ई त हृण्णा ई तेत्यादिषु 'श्नाभ्यस्तया' रित्याकारलोपः वृणीत वृणीयातामित्यदि गृह्णीयत् गृह्णीयातामित्यादि गृह्णीत गृहीयतामित्यादि ।।

चोरयेत् चोरयेतामित्यादि चोरयेत चोरयेयातामित्यादि पालयेत् पालयेतामित्यादि पालयेत पालयेयातामित्यादि अर्चयेत् अर्चयेतामित्यादि अर्चयेत अर्चयेयातामित्यादि।।

।। इति रूपानपयनपद्धत्यां सार्वधातुकपरिच्छेदः ।।

इदानीं भावकर्मणोर्लडादयः प्रदर्श्यते ।।

'लः कर्मणि च भावे चाकर्मकेभ्यः' ३-४-६९ लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि भवन्ति चकारात् कर्त्तरि च अकर्मकेभ्यो धातुभ्यो भावे भवन्ति पुनश्चकारात् कर्त्तरि च 'भावकर्मणोः' १-३-१३ । भावे कर्मणि च विहितस्य लकारस्यात्मनेपदं भवति न कदाचिद् प रस्मैपरस्मैपदम् 'चिण् भावकर्मणो'' ३-१-६६ रिति वर्त्तमाने 'सार्वधातुके यक्' ३-१-६७ भावकर्मवाचिनिसार्वधातुके परतो धातोर्यक्प्रत्ययो भवति नशब्दयः तिङन्ते भावकर्मणो रूप सर्वत्र समानमेव न्त्विेकवचनमेव भवे भावस्यैकत्वात् तच्च प्रथमुरुषस्यैव अयुष्मद्विषयत्वात् प्रागिव टेरेत्वादयः यकः कित्वादगुणाभावः।

ये सार्वधतुकेऽस्माभिः कर्त्तृत्वे प्रतिपादिताः ।
ते लकाराः प्रदर्श्यन्ते साम्प्रतं भावकर्मणोः ।।
प्रोक्तालकाराः सर्वेऽपि भवकत्रीरकर्मकात् ।
धातोः परे भवन्त्येते कर्मकर्त्रोः सकर्मकात् ।।
विहाराहारसंहारपरिहारवत् ।
उपसर्गवशाद्धातुरर्थान्तर विलासकृत् ।।
अनुपर्यभिपूर्वोऽयं भूधातुः कर्मणीष्यते ।
अधिपूर्वश्च शीङ्स्थासः प्रायोऽन्येऽपि प्रयोगतः ।।
भावस्तु धातौ न सकर्मके स्या
दकर्मकत्वात् पुनरैक्यरूप्यात्,
अयुष्मदस्मद्विषयत्वतः स्या
दृकत्ववाची प्रथमस्य पुंसः ।।

धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयते ।।

भावे उदाहरणम् देवदत्तेनाढ्येन भूयते ।

श्रीमता भूयते राज्ञा श्रीमद्भिर्भूयते नृपैः ।।

राजां श्रीमान् भवत्येष इत्यस्यार्थोऽवगम्यताम् ।।

मध्यमोत्तमयोस्त्वेवं त्वयास्माभिश्च भूयते ।

युष्माभिरेध्यतेऽस्माभिरेध्यते भवतैध्यते ।।

भावे द्विवचनादीनां प्रयोगे नास्त्यसंभवात् ।। इति ।।

कर्मण्युदाहरणम् देवदत्तेन कम्बलोऽनुभूयते ।

कर्मण्यस्य प्रयोगे तु राज्ञा श्रीरनुभूयते ।

श्रियं राजानुभवतीत्ययमर्थोऽवगम्यते ।।

प्रसाधध्वे मया यूयं हे देवा इति मध्यमे ।

प्रसादययाम्यहं देवानित्यस्यार्थोऽवगस्यते ।।

उत्तमे पुरुषेऽप्येवमनुकम्प्यामहे बुधैः ।

अस्मान् बुधाः सदैवानुकाम्पयन्तीति बुध्यते ।। इति ।।

धातोः परे लकारा स्युर्लकाराणां च तङ् पुनः ।

मध्ये धातुविभक्त्योश्च यग्भवेत् सार्वधातुके ।।

इत ऊर्ध्वं शपीवात्र विज्ञेया प्रक्रिया यकि ।

द्वित्वादयो यथायोगं यकः कित्वाद् गुणो न हि ।।

एष सार्वत्रिको न्यायः .... ।। इति ।।

भू लट् लस्य त, सार्वधातुके यगि ३-१-६७ ति धातोर्यक् प्रत्ययः । भू यक् त अनुबन्धलोपः भूयत यक्प्रत्ययो कृतेऽङ्गानामदन्तत्वाच्छब्विकरणोक्तवत् प्रक्रिया भूयत इति स्थिते लटि टेरेत्वम् लङि अङ्गस्याडागमः ।लोटि टेरेत्वम् 'आमेतश्च' लिङि भूयत इति स्थिते 'लिङः सीयुडि' ति सीयुट् अनुबन्धलोपः भूय ईय् त 'लिङ सलोपोऽनन्त्यस्य' ति सकारलोपः भूय ईय् त 'लोपो व्योर्वली' ति यकारलोपः । भूय ईत 'आद्गुण' इति गुणः भूयेत यकः कित्वात् 'सार्वधतुके'

ति गुणो न भवति उत्तरत्राप्येवमेव लकारवशात् प्रक्रिया भूयते अभूयत भूयतां भूयेत इति भावे भावे प्रथम पुरुषैकवचनमेम । कर्मणि पुरुषत्रयं वचनत्रयं चास्ति अनुभूयते अनुभयेते अनुभूयेते अनुभूयन्ते, इत्यादि इति लटि अथ लङि अन्वभूयत अन्वभूयेतामित्यादि । लिटि अनुभूयतां अनुभूयेतामित्यादि लिङि अनुभूयेत अनुभूयेयातामित्यादि,

भावे एध् ल् लस्य त एध् ता 'सार्वधातुके यणि' ति यक् ककारलोपः एध् य् त 'अनचि च' ति धकारस्य द्वित्वम् 'झलां जश् झशीति' स्थिते पूर्वधकारस्य जश्त्वं च एध्यतलटि एध्यते एध्यत अङस्याटाटश्चेति वृद्धिः ऐध्यत लोटि एध्यताम् लिङि एध्येत ।

पच् ल् ,लस्य त पच् त यक् पच् य् त 'अनचि च'ति चकारस्य द्वित्वम् पच्यत । भावे पच्यते अपच्यत पच्यता पच्येत कर्मणि पच्यते पच्येतेत्यादि अपच्यत अपच्येतामित्यादि पच्यतां पच्येत पच्येयातामित्यादि ।।

नन्द ल् लस्य त पक् नन्द् य् त नन्द्यत भावे नन्द्यते अनन्द्यत नन्द्यतां नन्द्येत कर्मणि अभिनद्यते अभ्यनन्द्यत इति ।।

एष सार्वत्रिको न्यायो विशेषीऽथ प्रदर्श्यते ।
नकारलोपोऽनिदितामिति ध्वंसेर्भवेद्यकि ।। इति ।।

ध्वन स् ल् त ध्वन स् 'सार्वधातुक' इति यक् ध्वन् स् यत 'अनिदितां हल उपधाया क्ङिति' हल ध्वस् यत 'अनचिचे' ति सकारस्य द्वित्वम् ध्वस्यतां ध्वस्येत ध्वस्येयातामित्यादि ।।

व्येञस्त्वादेच इत्यात्वं भवेद्यकि विवक्षिते ।
पुनर्लकारस्तङ् यक् च वचीति स्यात् प्रसारणम् ।।
प्रसारात् पूर्वरूपत्वं दीर्घः स्याद्धल इत्यतः ।। इति ।।

व्ये 'आदेच उपदेशेऽशि'दि ६-१-४५ ति इकारस्य दीर्घः । वीयत कर्मणि वीयते वीयेते इत्यादि 'अनिदितां हल उपधायाः क्ङिति' अनिदितामङ्गानां हलन्तानामुपधाया नकारस्य लोपो भवति क्ङिति प्रत्यये परतः 'आदेच उपदेशेऽशि'ति, ''वचिस्वपियजादीनां किति', यजो यजादयः 'इग्यणः सम्प्रसारण्' स्म्प्रसारणश्च हलः ।।

अद् ल् लस्य त अद् त यक् अद्यत 'अनचिचे' ति दकारस्य द्वित्वम् अधत अद्यते अधेतेत्यादि ।।

शीङो यकिकृतेऽयङयि क्ङित्यनेनायङादिशेत् ।। इति ।।

शील् लस्य त शीत यक् शीयत भावे शय्यते अशय्यत शय्यतां शय्येत अयङ्यिकिति शीङो प्रत्यये परतः ।।

आर्धधातुकसंज्ञे यक् च प्रचीति स्यात् पर्सारणम् ।
प्रसारात् पूर्वरूपत्वं द्वित्वं चानचि चेत्यतः ।। इति ।

ब्रू ब्रूवो वचि २-४-५३ रिति वचिरित्यायमादेशः वचि । इकार उच्चारणार्थः। तेन नुङ्न भवति, वच् ल । लस्य त वच् त यक् वच् यत वचिस्वपीति सम्यसारण् उअच् यत 'स्म्पसारधाञ्' ति पूर्वरूपत्वम् उच् यत । अनचि चे ति चकारस्य द्वित्वम् उच्यत कर्मणि उच्यते उच्येते इत्यादि औच्यत उच्यतां उच्येतेत्यादि ब्रूवो वचिः ब्रुवो वचिरादेशो भवत्यार्धदातुके विषये, इकार उच्चारणार्थः तेन नुङ्न भवति ।

हुषुञ् चिलोतेश्च यकि दीर्घोऽकृत्सार्वधत्विति ।। इति ।।

हुल् लस्य त हुत यक् हुयत अकृयो रिति अजन्ताङ्गस्यदीर्घः । हूयत । कर्मणि हूयते हूयेत इत्यादि अहूयेत अहूयेतां हूयतां हूयतां हूयेत हूयेयातां इत्याटि अकृसार्वधतुकयोर्दीर्घः अकृधकारेऽसार्वधातुकयकारे च क्ङिति

परतेऽजन्तस्याङ्गस्य दीर्घो भवति अकृदिति किम् प्रकृत्व असार्वधातुक इति किम् चिनुयात् ।

हाल् लस्य त ,यक् च हायत कर्मणि हायते हायेते अहायत अहायेतां हायेतां हायेतां हायेत हायेयातामित्यादि ।।

कृते यकि दधाते स्यादात ईत्वं घुमादिना ।। इति ।।

धाल् लस्य त धात घुमास्थागापाजहातिसां हलीत्याकारादेश धीयत कर्मणि धीयते धीयेते अधीयत धीयतां धीयेतेत्यादि, घुमा हलि धुसंज्ञकानां मास्थागापाजहाति सा इत्येतेषाञ्चाकारस्य ईकारादेशः भवति क्ङित्यार्धधातुके परतः।दिवो यकि कृतेदीव्यते इत्यादि सप्रपञ्चंसमुन्नेयम्। स्थाल्यामोदनं पचति देवद्त्तः पचाते ओदनः स्वयमेव कुगरेण काष्टं भिनत्ति भिद्यते काष्टः स्वयमेव कर्मयत् कर्मणा तुल्यक्रियः ३-१-५७ कर्मणि क्रियाकर्मकर्मस्थया क्रियया तुल्यक्रियः कर्ता कर्मवत्भवति यस्मिन् कर्मणि कर्तृभूतेऽपि कर्मणीव क्रियालक्ष्यते स कर्त्ताकर्मवद् भवति कर्माश्रयाणि कार्याणि प्रतिपद्यत इत्यर्थः कर्मणेति किम् करणाधिकरणाभ्यां तुल्यक्रियस्य माभूत् कुठारो भिनत्ति स्थाली पचति ।। पच्यते ओदनः स्वयमेव भिद्यते काष्ठः स्वयमेव मुच्चते वत्सः स्वयमेव कर्मकर्तरि चायं विधिः ।।

इति यक् परिच्छेदः

अथ आशीर्लिङ् प्रक्रिया ।

पुनः कर्त्तरि नीयते, भूयात् भूयास्तां भूयासुः आशिषिलिङलोटा विति लिङ् लस्य तिबादयः लिङाशिषि आशिषि विषये यो लिङ् विहितस्तदादेशस्तिङार्धधातुकसंज्ञो भवतीत्यार्धधातुकत्वाच्छबादयो न भवत्ति, एकसंज्ञाधिकारादन्यत्र संज्ञासमावेशो भवति, इह त्वेवकारोऽनुवर्त्तते स नियमं करिष्यत्यार्धधातुकमेवेति 'किदाशिषि' ३-४-१०४ आशिषि विषये यो लिङ् विहितस्तस्य यासुडागमो भवति स लिङ् कित् भवति स्कोः संयोगाद्योरन्ते च

पदन्ते संयोगो झलि परतो यः संयोगस्तदाद्योः सकारककारयोर्लोपो भवति ।।

एधिषीष्ट एधिषीयास्तां एधिषीरन् लिङः सीयुट 'आर्धधातुकस्योड्वलादेः' ७-२-३५ । वलादेरार्ध धतुकस्येडागमो भवति 'सुट् तिथो' ३-४-१७ लिङ् सम्बन्धिनोस्तकारथकारयो सुडागमो भवति ।। पच्यात् पच्यास्तां पच्यासुः पक्षीष्ट पक्षीयास्तां पक्षीरन् नेड्वाशिकृती ति वर्तामाने एकाच उपदेशेऽनुदात्तात् ७-२-१० उपदेशे यो धातुरेकजनुदात्तस्तस्मादुत्तरस्य वलादेरार्धधातुकस्येडागमो भवति के पुनरुपदेश एकाजनुदात्ताः ये तथा पठ्यन्ते

त एवानिट्कारिकासु प्रविभक्ताः प्रदर्श्यन्ते ।।

अनिट् स्वान्तो भवतीति दृश्यता -
मिमांस्तु सेटः प्रवदन्ति तद्विदः ।
अदन्तमृदन्तमृतां च वृङ्वृञौ
श्विडीङि वर्णेष्वथ शीङ्श्रिञावपि ।।
गणस्थमूदन्तमुतां च रुस्नुवौ
क्षुवन्तथोर्णोतिमथो युणुक्ष्णुवः ।
इति स्वरान्ता निपुणं समुचिता
स्ततो हलन्तानपि सन्निबोधत ।।

वृङ् सम्भक्तौ वृञ् वरणे टुओश्वि गतिवृध्योः डीङ् विहायसा गतौ, शीङ् स्वप्ने, शिञ् सेवायाम् रुशब्दे प्रस्रवणे ष्णु प्रस्रवने, टुक्षु शब्दे ऊर्णुञ् आच्छादने यु मिश्रणे णूस्तवने क्ष्णु तेजने,ऊर्णोतेर्णुवद्भावादेकाच्त्वमस्तीत्युदात्त इत्युपदिश्यते।

शकिस्तु कान्तेष्वनिडेक इष्यते
घसिश्च सान्तेषु वसिः प्रसारिणी ।
रभिश्च भान्तेष्वथ मैथुने च यमि
स्ततस्तृतीयो लभिरेव नेतरे ।।

शक्लृ शक्तौ घस्लृ अदने वस निवासे रभ राभस्ये यभ मैथुने डुलभष् प्राप्तौ,

यमिर्चमन्तेष्वनिडिष्यते बुधै-
रमिश्च यश्च श्यनि पठ्यते मनिः ।
ममिश्चतुर्थो हनिरेव पञ्चमो
ममिस्तु षष्टः प्रतिषेधवाचिनाम् ।।

यम उपरमे रमु क्रीडायाम् णमु प्रङ्वत्वे हन हिंसागत्योः गम्लृ सृ लृ गतौ,

दिहिर्दुहिर्मेहतिरोहती वही
र्नहिस्तु षष्टो दहतिस्तथा लिहिः ।
इमेऽनिटोऽष्टाविह मुक्तसंशया
गणेषु षान्ताः प्रविभज्य कीर्तिताः ।।

दिह उपचये दुह प्रपूरणे मिह सेचने रुह बीजजन्मनि प्रादुर्भावे च, वह प्रापणे णह बन्धने दह भस्मीकरणे लिह आस्वादने, दिशिं दंशि मथां मृशिं स्पृशिं

रिशिं रुशिं क्रोशतिमष्टमं विशिम् ।
लिशिं च शान्ताननिटः पुराणगाः
पठन्ति पाठेषु दशैव नेतरान् ।।

दिश अतिसर्जने दृशिर् प्रेक्षणे दंश दंशनेमृश आमर्शने स्पृश संस्पर्शने रिश रुश हिंसायां क्रुशआह्वाने रोदने च । पिश प्रवेशने लिश अल्पीभावे ।

रुधिः सराधिर्युधिबन्धिसाधयः
क्रुधिक्षुधी शुध्यतिबुध्यती व्यधिः ।
इमे तु धान्ता दश येऽनिटो मता
स्ततः परं सिध्यतिरेव नेतरे ।।

रुधिर् आवरणे राध साध संसिद्धौ युध सम्प्रहारे बन्ध बन्धने क्रुध कोपे क्षुध बुभुक्षायाम् शुध शौचे बुध अवगमने व्यध ताडने षिधू संराद्धौ ।

शिषिं पिषिं शुष्यति पुष्यति त्विषिं
श्लिषिं विषिं शुष्यति तुष्यती द्विषिम् ।
इमान् दशैवोपदिशन्त्यनिड्विधौ
गणेषु षान्तान् कृषिकर्षती तथा ।।

शिष्लृ विशेषणे पिष्लृ सञ्चूर्णने शुष शोषणे पुष पुष्टौ त्विष दीप्तौ, श्लिष आलिङ्गने विष्लृ व्याप्तौ तुषतुष्टौ, दुष वैकृत्ये, द्विष अप्रीतौ, कृष विलेखने कर्ष स्पर्धायाम् तुदादिः स्वरितेत् भूवादिरुदात्तेत् ।

तपिं तिपिं चापिमथो वपिं स्वपिं
लिपिं लुपिं तृप्यति दृप्यती सृपिम् ।
स्वरेण नीचेन शपिं च्छुपिं क्षिपिं
प्रतीहि पान्तान् पठितांस्त्रयोदश ।।

तप सन्तापे तप ऐश्वर्ये तिपृतेपृ सेचने पृ क्षरणे, आप्लृव्याप्तौ टुवप् बीजसन्ताने, ञिष्वप् शये, लिप उपदेहे लुप्लृ च्छेदो, तृप प्रीणने दृप हर्षविमोचने सृप्लृ गतौ शप आक्रोशोपालम्भयोः छुप संस्पर्शे चुप मन्दायां गतौ, क्षिप प्रेरणे ।

अदिं हदिं स्कान्दि भिदिच्छिदिछदीन्
सदिं स्विदिं च्छिद्यतिपद्यती खिदिम् ।
तुदिं नुदिं विद्यति विन्दती तथा
प्रतीहि दान्तान् दश पञ्च चानिटः ।।

अदभक्षणे हद परीषोत्सर्गे स्कन्दिर्गतिशेषणयोः भिदिर् विदारणे च्छिदिर द्वैधीकरणे क्षुदिर सम्प्रेषणे शदृशातने षदृ विशरणगत्यवसादनेषु ञिष्विदा मात्रपक्षरणे पद्लृ गतौ खिद दैन्ये, तुद व्यथने नुद णुद प्रेरणे विद सत्तायां विदविचारणे विदिर्लाभे,

पचिं विचिं विचिरिचिराञ्चिपृच्छतीन्
निजिं सिजिं मुचिटजिभञ्चिभस्जतीन् ।
त्यजिं यजिं युजिरुजिसञ्चिमस्जतीन्
भुजिं स्वजिं सृजिं सृजिमृजि विध्यनिट् स्वरान् ।।

डुपचष् पाके वच परिभाषणे ब्रूआदेशो वा विचिर् पृथग्भावे । विचिर् विरेचने रञ्च रागे प्रच्छ ज्ञीप्सायाम् णिजिर् शौचपोषणयोः षिचिर् क्षरणे मुच्लृ मोक्षणे भज सेवायाम् भञ्जो आमर्दने, भ्रस्ज पाके, त्यज हानौ यज देवपूजासङ्गतिकरणदानेषु यजिर् योगे रुजो भङ्गे षञ्च सङ्गे टुमस्जो शुद्धौ भुजो कौटित्ये भुजपालनाभ्यवहारयोः ष्वञ्ज परिष्वङ्गे, सृज विसर्गे, मृजूशुद्धौ मृजृ शौचालङ्कायोः

वाच्य उर्णोवद्भावो यङ्प्रसिद्धिः प्रयोजनम् ।
आमश्च प्रतिषेधार्थमेकाचश्चेडुषग्रहात् ।।

प्रक्रियामृते -

अनिटः प्रायशोऽजन्तवोशेषस्तेषु भाष्यते ।
सेटः सर्वेऽप्यकारान्ता ऋकारन्तश्च धातवः ।।
वृङ् सम्भाक्तावृदन्तेषु सेट स्याद् वृञ् वरणेऽपिच ।
टुओश्वि गतिवृध्योश्च डीङ् गतौ च विहायसा ।।
श्रिञ् सेवायां च शीङ् स्वप्ने चत्वारः सेट इत्यमी ।
सेट् स्याद् गणस्थमूदन्तमुदन्तेषु क्षु तेजने ।।
टुक्षु शब्दे रुशब्दे च तयोर्णुञ् छादने पुनः ।
यु मिश्रणे णु स्तवने स्नु प्रस्रवण इत्यपि ।।
अजन्ता इत्यनुक्रान्ता हलन्तानप्यनुक्रमे ।
शक्लृ सामर्थ्य इत्येको धातुः कान्तेष्वनिट् भवेत् ।।
अनिटौ द्वौ सकारान्तौ घस्लृ स्याददने तयोः ।
सम्प्रसारणसंयुक्ता वस आच्छादने पुनः ।।

भान्तेषु रभ राभस्ये तथैव यभ मैथुने ।
पुनश्च डुलभष् प्राप्ताविति स्युरनिटस्त्रयः ।
पठितः श्यन्विकरणे मन ज्ञाने च सज्जनैः ।
हनश्च हिंसागत्योरित्यनिटौ नान्तिमावुभौ ।।
तथा रमु क्रीटायां च यमश्चोपरमे पुनः ।
गम्लृ सृप्लृ गतौ पश्चाण्णमु प्रह्वत्व इत्यपि ।।
मकारान्ता इमे प्रोक्ताश्चत्वारो धातवोऽनिटः ।
दिहस्तूपचये प्रोक्तो रुहः स्याद् बीजजन्मनि ।।
दुह प्रपूरणे प्रोक्तस्तथैव मिह सेचने ।
स्याद्वह प्रापणे तद्वत् पुनश्च णह बन्धने ।
दहेति भस्मीकरणे लिह आस्वादने पुनः ।
इत्यष्टावनिटः प्रोक्ता हकारन्तेषु धातवः ।।
दिशातिसर्जने दंश दंशने स्पर्शने स्पृशः ।
विश प्रवेशने पश्चाद् दृशिर् प्रेक्षण इत्यपि ।।
हिंसायां द्वौ रिशिरुशौ क्रुश आह्वान इत्यपि ।
मृश आमर्शने पश्चाल्लिशात्पीभाव इत्यपि ।।
अनिटः परिपठ्यन्ते शान्तेषु दश धातवः ।
स्याद्राध साध संसिद्धौ रुधिरावरणेऽपिच ।।
पश्चात् क्षुध बुभुक्षाया बुधावगमने तथा ।
क्रुध कोपे च युध सम्प्रहारे बन्ध बन्धने ।।
शुध शौचेऽपि च षिध् संराद्धौ व्यध ताडने ।
एकादश धकारन्ता निर्धृता धातवोऽनिटः ।।
पुष पुष्टौ श्लिष श्लिष्टौ तुष तुष्टौ तथैव च ।
त्विष दीप्तौ विष्णु व्याप्तौ पुनः शिष्णु विशेषणे ।।
पिण्ड सञ्चूर्णने पश्चाच्छुष संशोषणे पुनः ।
तथैव दुष वैदुष्ये द्विषाप्रीतौ प्रकीर्तितः ।।

यथैव कर्ष स्पर्धायां तथा कृष विलेखने ।
द्वादशैतेनिटः प्रोक्ताः षकारान्तेषु धातवः ।।
धमू द्वौ तपऐश्वर्ये तप सन्ताप इत्यपि ।
क्षिप प्रेरण इत्युक्तस्तिपृ तेपृ च सेचने ।।
तथाप्लृ व्याप्तौ च टुवप् बीजसन्तान उच्यते ।
ञिष्वप् शये पुनः प्रोक्तो लिप स्यादुपदेहने ।।
लुप च्छेदन इत्यक्तस्तृप प्रीणन इत्यपि ।
गम्लृ गतौ पश्चाद्धर्षमोचनयोर्दृपः ।।
पुनः शप उपालम्भे शप आक्रोश इत्यपि ।
चुप स्पर्शन इत्येको मन्दायां च गतौ चुपः ।।
पकारान्तेषु पठिता एते सप्तदशानिटः ।
हद् पुरीषोत्सर्गे स्यादद भक्षण इत्यपि ।।
गतिशोषणयोः स्कन्दिः क्षुदिर् सम्पेषणे पुनः ।
भिदिर् विदारणे पश्चात् स्याद् द्वैधीकरणे च्छिदिर् ।।
षद्लृ प्रोक्तो विशरणे गतावप्यवसादने ।
ञिष्विदा इति गात्र प्रक्षरणे शद्लृ शातने ।।
खिद दैन्ये भवेदेकः खिदोऽन्यः परिघातने ।
एकस्तु विदसत्तायामन्यो विद विचारणे ।
विदिर्लाभे पद्लृगतौ तुद् व्यथन इत्यपि ।।
नुद प्रेरण इत्येते दान्ताः सप्तदशानिटः ।
छान्तेषु प्रच्छ ज्ञीप्सायमित्येकमनिटं विदुः ।।
प्रथमं डुपचष् पाके वच स्यात् परिभाषण ।
तथा विचिर् पृथग्भावे षिचिर् संक्षरणे तथा ।।
रिचिर्विरेचने पश्चान्मुच्लृ मोक्षण इत्यपि ।
एते षडनिटः प्रोक्ताश्चकारान्तेषु धातवः ।।

भ्रस्जोपाके रुजो भङ्गे भञ्जो आमर्दने पुनः ।
तथा टुमस्जो शुद्धौ स्यान्मृजू शुद्धौतु पञ्चमः ।।
एकः ष्वञ्ज परिष्वङ्गे षञ्ज सङ्गे तथेतरः ।
रञ्ज रागे युजिर् योगे त्यज त्यागे तथा पुनः ।।
भूयश्च भज सेवायां त्यज हानौ च कथ्यते ।
भूयोऽपि भुज कौटिल्ये पालनाभ्यवहारयोः ।।
यजेति देवपूजायां दाने सङ्गतिकर्मणि ।
तथा सृज विसर्गे स्याच्छौच पोषणयोर्णिजिर् ।।
जकारान्तेषु विज्ञेया धातवः षोडशानिटः ।। इति ।।
पूर्वं धातोः स्वसंस्कारः प्राग्वत् स्यात् सति सम्भवे ।
पुनर्धातोर्लकाराः स्युर्लकाराणां तिबादयः ।।
यथास्वं प्रक्रिया पश्चात् कमोऽसावार्धधातुके ।।
पदानयनमार्गोऽत्र लिङि तावत् प्रदर्श्यते ।।
धातोराशिषि लिङ्लोटाविति लिङ्प्रत्यये कृते ।
तिप्तस्झीत्यादिना पश्चाल्लस्य स्थाने तिबादयः ।।
लिङाशिषीत्यतो लिङ् स्यादार्धधातुकसंज्ञकः ।। इति ।।

भू सत्तायाम् 'भूवादय' इति धातुसंज्ञा 'आशिषि लिङ्लोटावि'ति लिङ् प्रत्ययः अनुबन्धलोपः भूल् 'तिप्तसि'त्यादिना लस्य तिबादयः अनुबन्धानां पकाराणां लोपः भूतीत्यादि 'लिङाशि'षी त्यार्धदातुक संज्ञा तेन शबादयो न भवतन्ति । अथ परस्मैपदे 'किदाशिषी'त्यतो यासुट् किच्च भवेत् ,

लिङः सलोपोऽनन्त्येति सलोपो नार्धधातुके ।
इतश्च तिप्सिपोरेर्लुक् संयोगाद्योः सकारयोः ।।
तिप्सिपोः परयोर्लोपः स्कोः संयोगेति सूत्रतः ।
तस्थस्थेति च झेर्जुश्च नित्यं ङिच्चापि पूर्ववत् ।। इति ।।

भूतीति स्थिते 'किदाशिषी' ति लिङो यासुट् टित्वादादि भूया सुट् ति उकार उच्चारणार्थः टकारो देशिध्यर्थः भूयास् ति भूयास् तसित्यादि कित्वाद् गुणो न भवति आर्धधातुकत्वात् 'लिङः सलोपोऽनन्त्यस्ये' ति सकारलोपो न भवति इनश्चे ति तिपसिपो रिकारलोपः भूयास् त् भूयास् स् स्कोः संयोगाद्योः सकारयोर्लोपः, भूयात् भूयातस् तस्थस्थमिपां क्रमेण तान्तन्तामः, भूयास् झीत्यत्र झेर्जुसि ति झेर्जुसादेशः । जकारलोपः भूयास् इस् भूयासुस् 'नित्यं ङित' इति वस्मसोः सकारस्य लोपः भूयात् भूयास्तां भूयासुः भूयाः भूयास्तं भूयास्त, भूयासं भूयास्व भूयासम परस्मैपद उत्तरत्राप्येवं नेयम् ।।

स्यात् परस्मैपदे ह्येवं क्रमोऽथात्रात्मनेपदे ।
लिङः सीयुट् ततोऽत्रार्धधातुकस्य वलादिता ।।
लोपो धातोरधातोश्च यवयोः स्यात् परे वलि ।
स्यादार्धधातुकानां तु वलादीनामिडागमः ।।
लिङः सीयुट् ततोऽत्रार्धधातुकस्य वलादिता ।।
लोपो धतोरधातोश्च यवयोः स्यात् परे वलि ।
स्यादार्धधातुकानां तु वलादीनामिडागमः ।
धातुः सेट् चेत् तुक्तेन .... ।। इति ।।

एध वृद्धौ, एध् 'आशिषिलिङलोडावि'ति लिङ्,एध् ल् लस्य तङ् अनुबन्ध एध् त इत्यादि लिङाशीशी त्यार्धातुकसंज्ञा 'लिङ सीयुडि'ति सीयुड् एध् सीय् तेत्यादि लिङ्यात्मनेपदे सीयुडागमान्नवानां विभक्तीनां वलादिद्वम् 'लोपो व्योर्वन्वि' ति यकारस्य वलि परतो लोपः । एध् सीत् एध् सीय् आतामित्यादि, धातुः सेट् चेत् त दुक्तेन सूत्रेण नवानां विभक्तीनामिष्टित्वात् सीत सीय् आतामित्यादीनामाद्यवः स्यात् एध् इट् सीत टकारलोपः एध् इ सीत । एध् ई सीय् आतामित्यादि एधिसीत एधिसीयातामित्यादि ।। अथेड्विभागः प्रदर्श्यते -

एधतिध्वंसिमनिशीङ्ग्रहिचोर्यर्चिपालयः ।
लिङि नित्यममी सेटो धातवोऽष्टौ प्रकीर्त्तिताः ।।
स्यादार्धधातुकस्येड्वलादिनैषामिडागमः ।
अश्नोतिः सूयतिश्चेति यौ धातू अनयोर्लिङि ।।
स्वरतीत्यादिसूत्रेण विभाषित इडागमः ।
लिङ्सिचोरिति सूत्रेण विभषेट् स्याद् वृङो लिङि ।।
लिङ्सिचोरिति सूत्रेण बिभषेट् स्याद् वृङो लिङि ।।
द्वाविंशतिस्त्रयस्त्रिंशत्यनिटोऽन्ये तु धातवः ।। इति ।।

एध वृद्धौ ध्वन्सु गतौ च । मनु अवबोधने शीङ् स्वप्ने ग्रह उपादाने चुर स्तेये अर्च पूजायां पाल रक्षण एतेऽष्टौ लिङि नित्यं सेटः अत्रार्धधातुकस्यति इटागमे अशू व्याप्तौ षूङ् प्राणिप्रसव इत्यनयोः स्वरती त्यादिना विभाषेडागमः । वृङ् सम्भक्तावित्यस्य लिङ्सिचो विभाषेडागमः इत्येष्टौ धातवो नित्यं सेटः त्रयो विभाषेटः त्रयस्त्रिंशत्संख्येषु अन्ये द्वाविंशतिरनिटो लिङि ।। इतीड्विभागः ।।

सुट् तिथोरिति सूत्रेण प्रथमे मध्यमे मध्यमेऽपि च ।
एकार्थद्व्यर्थयोरात्मनेपदे स्यात् सुडागमः ।।
आदेशेत्यमुना षत्वं ष्टुना ष्टुरितिच ष्टुता ।
झस्य रन् स्यादिटोऽत् चापि भवेदित्यात्मनेपदे ।। इति ।।

एधि सीत, एधि सीयातामित्यादिषु प्रथमपुरुषे मध्यमपुरुषे चैकवचनद्विवचनयोः 'सुट् तिथो' रिति तकारथकारयोः सुडागम टित्वादादिः एधिसीस् त एधिसीयास् तां एधि सीस् थास् एधिसीयास् थाम् सकारस्येण्कवर्गाभ्यामुत्तरत्वे 'आदेश प्रत्यययो' रिति षत्वम् ष्टुत्वे काय'ष्टुना ष्टु'रिति ष्टुत्वम् झस्य रादेशः इटोऽदित्ययमादेशः तकार उच्चारणार्थः नादेशावयवः एधिषीष्ट एधिषीयास्तां एधिषीरन् एधिषीष्ठाः एधिषीयास्थां एधिषीध्वम्, एधिषीय एधिषीवहि एधिषीमहि। 'स्वरति सूतिसूयति धूञूदितोवा' ७-२-४४ । स्वरत्यादिभ्यो धातुभ्य ऊदिश्चोत्तरस्य

वलादेरार्धधातुकस्य वेडागमो भवति । 'लिङ्सिचोरात्मनेपदेषु' ७-२-४२ वृत उत्तरयोर्लिङ् सिचोरात्मनेपदेषु वर्त्तमानयोर्वेडागमो भवति। 'ष्टुनाष्टु' स्तोः सकार तवर्गयोः ष्टुना षकारटवर्गाभ्यां योगे ष्टुः षकारटवर्गावादेशौ भवतः आत्मनेपद उत्तरत्राप्येवं नेयम् ।।

अस्माद्यत्र विशेषो यस्तत्र सोऽपि विधीयते ।। इति ।।
परस्मैपदेचात्मनेपदे चाप्रदर्शितान्त्यायाद् यत्र यो विशेषस्तत्र सोऽपि विधीयते।।
पचेर्द्वित्वं परस्मै स्यात् कुत्वं त्यादात्मनेपदे ।। इति ।।

पच् यात् पच् यास् तामित्यादिषु यकारस्य 'अनचि चे' तिद्वित्वम् । पच्यात् पच्यास्तां पच्यासुरित्यादि पच सीतेत्यादावा'र्धधातुकस्येति' इडागमे प्राप्ते 'एकाच उपदैशेऽनुदात्तादि'ति प्रतिषेधः पच् सीतेत्यादि चोः कुरिति चकारस्य ककारः पक्षीष्ट पक्षीयास्तामित्यादि ।

सार्वधातुकोक्तत्वे नन्द् ध्वंसि त्येतौ नन्द्यात् नन्द्यास्तां नन्द्यासुरित्यादि ध्वंसि ध्वंसिषीष्ट ध्वंसिषीयास्तां ।

व्येञ्, व्येञस्त्वादेच इत्यात्वं प्रत्यये विषयेऽशीति ।।
परस्मै तु वचीत्यादि प्रसारः पूर्वरूपता ।।
पुनरङ्गस्य दीर्घः स्यादीकारो हल इत्यसौ ।। इति ।।

व्ये इति स्थितो 'आदेच उपदेश अशी'ति इत्येकारस्याकारः व्याल् लस्यतिबादयः व्यातीत्यादि पुनः परस्मैपदे 'किदाशिषी'ति लिङादेशानां यासुडागमः व्यायस ति 'वचिस्वपियजादीनां किती' ति सम्प्रसारणम् वि आयास् ति 'सम्प्रसारणाच्चे' ति पूर्वरूपत्वम् वियास ति 'हल' इतीकारस्य दीर्घः वी यास् तीत्यादि शेषं पूर्ववत् वीयात् वीयास्तां वीयासुरित्यादि आत्मनेपदे व्यात लिङ सीयुट् व्यासीयत व्यासीय त यकारस्य वलि लोपः व्यासीत सुट् तिथो रिति सुट् वायसीस्त षत्वष्टुत्वे व्यासीष्ट व्यासीयास्तां व्यासीयासुरित्यादि ।

अदेर्द्वित्वं चेति, अद् यादित्यादिषु अनचिचे ति दकारस्य द्वित्वम् अद्यात् अद्यास्तां अद्यासुरित्यादि ।

शीङस्तु 'सार्वधात्वा'दिना गुणः सीयुट् पुनर्यकारस्य वंलिलोपः शेसीत शेसीय् आताम् 'आर्धधातुकस्ये' त्यादिनेट् शे इसीत अय् सुट् षत्वष्टुत्वे शयिषीष्ट शयिषीयास्तां शयिषीरन् शयिषीष्ठाः शयिषीयास्थां शयिषीध्वमित्यत्र 'विभाषेट' ७-३-७९ इति थकारस्य वा ढकारः । शयिषीध्वं शयिषीढ्वम् शयिषीय शयिषीवहि शयिषीमहि 'विभाषेटः' । इणन्तादङ्गादुत्तरो यइट् तत उत्तरेषां षीध्वं लुङलिटांधकारस्य विभाषामूर्धन्यादेशः षकारो भवति ।।

षूङो वृङ्श्चेडभावे चिञ् मृङोर्डुकृञः सदा ।
ध्वमो ढत्वमिणः षीध्वंलुङलिटामिति नित्यशः ।।
शीङो ग्रहेश्चुरादीनामिट्पक्षे षूङ् वृञोरपि ।
ध्वमो ढत्वं विकल्पेन विभाषेटो लिङीष्यते ।। इति ।।

षूङ् प्राणिप्रसवे वृङ् सम्भक्तौ इत्यनयोरिट्पक्षे चेति सप्तानां सेटो ध्वमो धकारस्य 'विभाषेट' इति वा ढत्वम् इति लिङि 'इणः षीध्वंलुङ् लिटां धोऽङ्गात्' इण्णन्ताद्यङ्गादुत्तरेषां षीध्वं लुङ् लिटां धकारस्य मूर्धन्यादेशो भवति इण्ग्रहणं कवर्मनिवृत्यर्थम् लिङिति वक्तव्ये षीध्वंग्रहणं स्तुवीध्वमित्यादिषु निवृत्यर्थम् ।

आर्धधातुकसंज्ञे तु प्रत्ययेऽथ विवक्षते ।
ब्रुवो वचिरिति प्रोक्तो वच्यादेशो भवेद् ब्रुवः ।।
इकार उच्चारणार्थस्तेन नुम् न भवेदिह ।
लिङ् स्यादाशिषि लिङ्लोटाविति लस्य तिबादयः ।।
किदाशिषीति यासुट् स्याल्लिङः कित्वात् प्रसारणम् ।
वचिस्वपियजेति स्यात् पूर्वरुपं प्रसारणात् ।।
अकारस्य पुनर्द्वित्वं स्यात् परस्मा इति क्रमः ।
एवोक्तक्रमात् तङि कृते सीयुट् स्यादात्मनेपदे ।। इति ।।
कित्वाभावात् प्रसारो न चोः कुत्वं तु भवेदिह ।इति ।

ब्रु, 'ब्रूवो वचि' रिति ब्रुवो वचिरादेश चकार उच्चारणार्थः वच् आशिषि लिङ् लृ लस्य तिबादयः वच् ति इत्यादि 'लिङाशिषी' ३-४-११६ त्यार्धधातुकसंज्ञा 'किदाशिषी' ति यासुट् वच् यास् तीत्यादि, लिङः कित्वात् 'वचिस्वपी' त्यादिना सम्प्रसारण् वस्योकारः उ अच् यास् ति 'सम्प्रसारणाच्चे' ति पूर्वरूपत्वम् उच्यात् उच्यास्तां उच्यासुरित्यादि आत्मनेपदे वच् तेत्यादौ लिङः कित्वाभावात् सम्प्रसारणं न भवति, वच् सीत 'चोः कु' रिति चकारस्य ककारः वक्सीत षत्वष्टुत्वे वक्षीष्ट वक्षीयास्तामित्यादि।

जुहोतेर्यासुटि कृते दीर्घो'ऽकृत्सार्वधात्वि'ति ।।इति।। हुयास् ति 'अकृत्सार्वधातुकयो' दीर्घः हूयात् हूयास्तामित्यादि हासीष्ट हासीयास्तां हासीरन्नियादि।।

दधातेश्च लिङ कित्वे त्वेर्लिडीत्यात एद् भवेत् ।। इति ।।

धायास् ति अत्र कित्वात् 'एर्लिङी' ६-४-६७ ति धकार आकारस्यैकारादेशः धेयात् धेयास्तां आत्मनेपदे लिङः कित्वाभावादेत्वं न भवति धासीष्ट धासीयास्तामित्यादि । एर्लिङि, घुमास्थागापाजहातिसामित्येतेषामाकारस्यैकारादेश भवति किति लिङि परतः।

दीर्धो धातोस्तूपधाया 'हलि चे'ति भवेद्दिवः । यासुटोऽनन्तरं दीर्घो द्वित्वं च तदनन्तरम् ।। इति ।।

दिव् यास् ति हलि चे ति धातोरुपधाया दीर्घः दीव् यास् ति इकारसकारयोर्लोपः दीव् यात् 'अनचि चे' ति वकारत्य द्वित्वम् दीव्यात् दीव्यास्तां दीव्यासुरित्यादि।

षूङस्तु सीयुटः पूर्वं सार्वधात्वादिना गुणः ।
पुनः सीयुट् स्वरत्यादिना विकल्पादिडागमः ।।
इडागमो यत्र भवेत् तत्रावादेश एव च ।। इति ।।

सूतेत्यादौ 'सार्वधातुकार्धधातुकयो' रिति गुणः सोत सो सीय् त स्वरति सूतिइडागमः , सो इ सीय् त अवादेश सविसीय् त, यकारस्य वलि लोपः सविषीष्ट सविषीयास्तामित्यादि ध्वमि 'विभाषेट' इति धकारस्य वा मूर्धन्यो भवति सविषीढ्वं सविषीध्वम्, इडभावे सोषीष्ट सोषीयास्तां ध्वमि इणः षीध्वमित्वादिना ध्वस्य नित्यं मूर्धन्यादेशः । सोषीढ्वम्, नह्यात् ह्यास्तां नह्यासुरित्यादि,

आत्मने सीयुटः पश्चान्नहोऽधो धस्य चर् पुनः ।। इति ।।

नह् सीय् त 'नहोध' इति हकारस्य धकारः नध् सीय् त 'खरिच'ति धकारस्य चर्त्वम् । नत्सीष्ट नत्सीयास्तां 'नहो धः' नहो हकारस्य धकारादोशो भवति झलि परतः पदान्ते च ।

षुञाश्चिञश्च दीर्घः स्याद् यासुटोऽनन्तरं त्वकृत् ।
सार्वधातुकयोर्दीर्घ इति दित्वं तुदेर्भवेत् ।। इति ।।
सुयास् ति अकृदिदीर्घः सूयास्ति सूयात् सूयास्तां सूयासुरित्यदि,
अश्नोतेरिङ्विकत्पः स्यात् तत्रानिट्त्वे तु शस्य षः ।

व्रश्चादिना 'षढोः कः सी'ति षस्य ककारता ।। इति ।। अश् सीत् अश् सीय् आतामित्यादिषु 'स्वरति सूती'त्यादिना विकल्पेनेट् आगमः अश् इसीयत् अशिसीत अशिषीष्ट अशिषीयास्तामित्यादि अत्रोदित्वादिङ्विकत्पः अत्रेभभावे अश् सीतेति स्तिथे शकारस्य 'व्रश्चे'त्या । दिनां षत्वे अक्षीष्ट अक्षीयस्तामित्यादि 'व्रश्चभस्जसृजमृजयजराजभाज छशांषः', वश्चादीनां धातूनां छकारान्तानां शकारन्तनां च षकारदेशो भवति, झलि परतः पदान्तेच 'षढोः कः सि' षकारढकारयो ककारो भवति सकारै परतः

चियास् ति दीर्घः अकृत्सार्वधातुकयोरिति चीयान् चीयास्तां आत्मनेपदे चिञस्तु सीयुटः पूर्वं सार्वधात्वादिना गुणः ।। इति ।। चेत षत्वष्चुत्वे चेषीष्ट चेषीयास्तां चेषीरन् इत्यादि ध्वमि इणःषीध्व चेषीढ्वम् ।

द्वित्वं तुदेर्भवेदिति, तुद् यास् ति ,तुद् यात् 'अनचि चे ति' दूकारस्य द्वित्वम् तुद्यात् तुद्यास्तां इत्यादि,

मृसीत 'उश्चे' १-२-१२ ति लिङः कित्वाद् गुणो न भवति मृषीष्ट मृषीयास्तामित्यादि ध्वमिढत्वम् मृषीढ्वम् ।'उश्च' ऋवर्णान्ताद् धातो परौ लिङ्सिचावात्मनेपदेषु झलादी कितौ भवतः ।

मुचेः परस्मैपदे द्वित्वम् स्यात् आत्मनेपद इति मुच् यात् 'अनचिचेति' चकारस्य द्वित्वम् मुच्यात् मुच्यास्तां इत्यादि सुच् सीत 'लिङ्सि चावात्मनेपदेष्वि' १-२-११ ति लिङ कित्वाद् गुणो न भवति मुच् सीत चोः कु रिति कुत्वम् मुक्षीष्ट मुक्षीयास्तामित्यादि 'लिङ्सिचावात्मनेपदेषु' । इकसमीपाद्धलः परौ लिङ्सिचावात्मनेपदेषु झलादि कितौ भवतः । द्वित्वजश्त्वे परस्मै स्तो रुधेश्चर्त्वं तथात्मने ।। इति ।।

रुध् यात् अनचि चेति धकारस्य द्वित्वं झलां जश् झशीति पूर्वधकारस्य जश्त्वम् रुद्धात् रुध्यास्तामित्यादि, स्वरितेत्वादुभयपदित्वम् आत्मनेपदे खरि चे ति धकारस्य चर्त्वम्, रुत्सीष्ट रुत्सीयास्तामित्यादि,

भुजेर्द्वित्वं परस्मै स्यात् कुत्वचर्त्वे तथात्मने ।। इति ।।

भुज् पालनेऽर्थे परस्मैपदम् अपालनेऽर्थे आत्मनेपदम् भुज् यात् जकारस्य 'अनचिचे' ति द्वित्वम् भुज्यात् भुज्यास्तामित्यादि, भुज् सीस् त जकारस्य चोः कुत्वम् भुग् सीसत् गकारस्य 'खरिचे' ति चर्त्वम् भुक्षीष्ट भुक्षीयास्तां भुजेरिव युजेश्चापि युज्यात् युज्यास्तां युक्षीष्ट युक्षीयास्तामित्यादि,

तनोतेर्द्वित्वमेव हि इति तन् यात् 'अनचि चे' ति नस्य द्वित्वम् तन्यात् तन्यास्तामित्यादि,

मन सीत 'आर्धधातुकस्येड्वलादे'रिति इडागमः मन् इसीत मनिषीष्ट मनिषीयास्तां मनिषीरनित्यादि,

ऋकारस्य रिङादेशो यासुटोऽनन्तरं कृञः ।। इति ।।

कृयास् ति, 'रिङ् शयग्लिङक्ष्वि'ति रिङ् ङकारलोपः क्रियास् ति क्रियात् क्रियास्तां क्रियासुरित्यादि आत्मनेपदे कृसीत 'उश्चे'ति लिङः कित्वाद् गुणो न कृषीष्ट कृषीयास्तां कृषीरन्नित्यादि । ध्वमि ढत्वं धकारस्यः कृषीढ्वम् ।

क्रियात् क्रियास्तामित्यादि क्रियारित्यादि । इङ्विकल्पे वृङ्ः सेट्त्वे सार्वधात्वदिना गुणः ।। इति ।।

वृसीत 'लिङ्सिचोरात्मनेपदेषु' इति विभाषेट् वृ इ सीत 'वृतो वे' ७-२-३८ ति दीर्धत्वे प्राप्ते 'न लिङी' ७-२-३९ ति प्रतिषेधः वृ इसीत 'सार्वधातुकार्धधातुकयो' रिति गुणो रपरः वर इ सीत, वरिसीत वरिषीष्ट वरिषीयास्तामित्यादि ध्वमि वाढत्वम् वरिषीध्वम् वरिषीध्वं वरिषीढ्वम् इ डभावे वृसीत, कित्वाल्लिङ गुणो न वृषीषीढ्वम् 'वृतोव' ७-२-३८ वृ इति वृङ् वृङ्वृञोगृहणम् सामान्येन तस्मादृकारान्तेभ्यश्च परस्येटो वा दीर्घो भवति 'न लिङि' ७-२-३९ वृत उत्तरस्येटो दीर्घो न भवति लिङि परतः,

ग्रहेस्तु यासुटः पश्चाद् गहिज्येति प्रसारणम् ।
प्रसारात् पूर्वरूपत्वमात्मने त्विडनन्तरम् ।।
ग्रहोऽलिटीति दीर्घः स्यादकित्वान्न प्रसारणम् ।। इति ।.

ग्रह् यास् ति 'ग्रहिज्ये' ६-१-१६ त्यादिना सम्प्रसारणम् गृ अह् यास् ति। 'सम्प्रसारणाच्चे' ति पूर्वरूपत्म् गृह ति गृह यास् त् गृहात् गृह्यास्तां गृह्यासुरित्यादि आत्मनेपदे कित्वाभावान्न सम्प्रसारणम् ग्रह् सीत 'आर्धधातुकस्ये' तीट् ग्रह् इ सीत ग्रहसीत 'ग्रहोलिटी' ति दीर्घः । ग्रहीषीध्वं ग्रहीषीढ्वम् 'ग्रहोऽलिटि दीर्घः' ७-२-३७ ग्रह उत्तरस्येटो दीर्घो भवत्यलिटि परतः ।

सनादिधातुसंज्ञान्तं सार्वधातुकवल्लिङः ।
चुरादिपु पुनर्यासुट् सीयुडन्तमिहोक्तवत् ।।

पुनः परस्मै णेर्लोपो भवेण्णेरनिटीति सः ।

आत्मने तु यकारस्य वलि लोप इडागमः ।।

गुणश्च सार्वधात्वादिरयादेश इति क्रमः ।। इति ।।

चुर् 'सत्यापपाशे'ति स्वार्थे णिच् चुर इ 'पुगन्त लघुपधस्य चै' ति गुणः। चोरि स नादित्वाद् धातुसंज्ञा 'आशिषी' ति लिङ् चोरि ल् लस्य तिबादयः । चोरिति 'किदाशिषी' ति यासुडागमः चोरि यास् ति 'णेरनिटी ति' णेर्लोपः चोर् यास् ति इकारसकारयोर्लोपः चोर यात् 'अचो रहाभ्या' मिति यकारस्य द्वित्वम् चोर्यास्तामित्यादि आत्मनेपदेऽपि लिङ् प्रत्ययान्तं पूर्ववत् लस्य तङ् चोरि त सीयत यकारस्य वलिलोपः 'आर्धधातुकेस्येती' चोरिसीत सार्वधातुके ति गुणः चोरे इ सीत अय् 'सुट् तिथोः' चिरयिषीष्ट चोरयिषीयास्तामित्यादि, विभाषा ढत्वम् चोरयिषीध्वं चोरयिषीढ्वम् ।।

पाल् 'सत्यापेति' स्वार्थेणिच् पालि 'सनाद्यन्ते' ति धातुसंज्ञा लिङ् पालि ल् लस्य तिबादयः पालिति यासुट् पालियास् ति णिलोपः पालयास् ति इकारसकारयोर्लोपः पाल् यात् लस्य द्वित्वम् पाल्यात् पाल्यास्तामित्यादि आत्मनेपदे लिङ् प्रत्ययान्तं पूर्ववत् लस्य तङ् सीयुट् पालि सीयुटयकारस्य वलिलोप पालिसीत पालयिषीष्ट पालयिषीयास्तमिति ढत्वम् पालयिषीध्वं पालयिषीढ्वम्

अर्च स्वार्थे णिच् धातुसंज्ञा लिङ् अर्चि ल् लस्य तिबादयः अर्चि ति यासुट् अर्चि यास् ति णेर्लोपः अर्च् यास् ति इलोप अर्च यास् त स्को रिति सलोपः अर्च् यात् अर्च्यादित्यादि, अर्चिसीयत यलोपः अर्चि सीत इट्अर्च इ सीत गुणः अर्चे इ सीत अय् अर्चयिसीत सुट् षत्वष्टुत्वे अर्चयिषीष्ट विभाषेट इति वा ढत्वम् अर्चयिषीध्वं अर्चयिषीढ्वम् अर्चयिषीय अर्चयिषीवहि अर्थयिषीमहि । **इत्याशीर्लिङ्।।**

अथ लिट्।

बभूव बभूवतुः बभूवुः 'परोक्षे लिट्' प्रयोक्तुरदर्शनविषयः परोक्षः भूतानद्यतनपरोक्षेऽर्थे वर्त्तमानाद्धातोर्लिट् प्रत्ययोभवति 'लिट् च' ३-८-११५ लिडादेशस्तिडार्धधातुकसंज्ञो भवति अत्रापि पूर्ववन्नियममाश्रीयते 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' ३-४-५२ लिडादेशानां परस्मैपदानां यथासंख्यं णल् अतुसु उस् थल् अथुस् अ णल् व म इत्येते आदेशा भवन्ति 'असंयोगाल्लिट् कित्' १-२-८ असंयोगान्ताद् धात्तोः परोलिट्प्रत्ययोऽपि किद् भवति 'इन्धिभवतिभ्यां च' १-२-६ एताभ्यां परो लिट्प्रत्ययोऽपि किद् भवति 'भुवो वुग् लुङ् लिटोः' ६-४-५५ भुवोऽङ्गस्य बुगागमो भवत्यजादेर्लुङलिटोः परतः लिटि धातोरनभ्यासस्य ६-१-५ लिटि परतोऽनभ्यासस्य धाचोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वे भवतः, हलादिशेषः ७-४-६० अभ्यासस्य हलादि शिष्यते अनादिर्हल्लुप्यते 'भवतेरः' ७-४-७३ भवतेरभ्यासस्याकारादेशो भवति लिटि परतः एधांचक्रे एधांबभूव एधामास । दीर्घमक्षरं गुरुसंज्ञं भवति। 'इजादेश्च गुरुमतोऽनृच्छ' ३-१-३६ इजादिर्यो धातुर्गुरुमानृच्छतिवर्जितः तस्माल्लिटि परत आम्प्रत्ययो भवति 'आमः' २-४-५१ आमः उत्तरस्य लेर्लुग्भवति, आमः स्वरादिषु पाठादव्ययत्वात् सुपोलुक् 'कृञ्चानुप्रयुज्यते' लिटि ३-१-४० आम्प्रत्ययस्य पश्चाल्लिटि परतः कृञनुप्रयुज्यते, अत्र कृञिति प्रत्याहारग्रहणेन कृभ्वस्तयो गृह्यन्ते 'आम्प्रत्ययवत्' कृञोऽनुप्रयोगस्य १-३-६३। अकर्त्रभिप्रायार्थोऽयमारम्भः आम्प्रत्ययो यस्माद्विहितः साधातुराम्प्रत्ययस्येव धातोरनुप्रयुज्यमानस्य कृञ आत्मनेपदं भवति, कृञ इति किम् ईक्षाम्बभूव ईक्षामास, 'लिटस्तझयोरेशिरेच्' ३-४-५१ लिडादेशयोस्तझयोर्यथासंख्यमेशिरेचावित्येतावादेशौ भवतः एधां कृ ए इति स्थिते यण् 'द्विर्वचनेऽचि' १-१-४९ द्विर्वचननिमित्तेऽचिपरे योऽजादेशः सद्विर्वचने कर्त्तव्ये स्थानिवद् भवति, रूपातिदेशोऽयं नियतकालः कृतेद्विर्वचने पुनरादेश एवावतिष्ठते उरत् ७-४-६६ अभ्यासस्येर्वर्णस्याकारादेशो भवति रपरः 'अत आदेः' ७-४-७० । अभ्यासस्यादेरकारस्य दीर्घो भवति लिटि परे,

पपाच पेचतुः पेचुः 'अत एकहल्मध्येऽनादेशादेर्लिटि' ६-४-१२०, किति लिटि परत आदेश आदेर्यस्याङ्गस्य नास्ति तस्यासहाययोर्हलोर्मध्य-गतस्याकारस्यैकारो भवत्यभ्यासलोपश्च । एकहल्मध्य इति किम्तत्सरतुः तत्सुरुः त्सरु छत्मगतौ अनादेशादेरिति किम् बभणतुः नेमुः सेहे सेहाते अनैमित्तिकेन त्वसत्वे भवतापेचिथ पपक्थ 'कृसृभृवृस्तु दुश्रुवो लिटि' ७-२-२३ कृ सृ भृ भृ वृ स्तु द्रु श्रु स्त्रइत्येतेषामेव लिटि परत इडागमो न भवति क्रादय एव लिट्यनिटः ततोऽन्ये लिटि सेट इति वचनादन्येषामिटि प्राप्ते 'अचः स्थास्वत् थल्यनिटो नित्यम्' ७-२-६१ । अजन्तो यो धातुस्तासौ नित्यामनिट् तस्मात् तासाविव थलीडागमो न भवति तास्वदिति किम् लूत्वा लुलविथ' श्र्युकः किति' ७-२-११ इत्यनिट् । नित्यमिति किम् विधोता विधविता विदुधविथ । 'उपदेशेऽत्वतः' उपदेशे यो धातुरकारवांस्तासौ नित्यानिट् तस्मात् तासाविव थलीट् न भवति उपदेश इति किम् कष्टा चकर्षिथ तास्वदित्येव जिप्पक्षति । जग्रहिथ सनि 'गहगुहोश्चे' ७-२-१२ ति सन्यनिट् नित्यमित्येव अत्ता अभिता अनञ्चिथ। 'ऋतो भारद्वाजस्य' ७-२-६३ ऋकारान्तो यो धातुस्तासौ नित्यानिट् तस्मात् तासाविव थलीडागमो न भवति भारद्वाजस्याचार्यस्य मतेनेति नियमात् पक्षे इडागमः थलि च सेटि थलि परत आदेश आदेर्यस्याङ्गस्य नास्ति तस्यासहाययोर्हलोर्मध्यग तस्याकारस्यैकारादेशो भवत्यभ्यासलोपश्च थल्ग्रहणं विस्पष्टार्थम् पपाच पपच 'णलुत्तमो वा' ७-१-९१ उत्तमपुरुषसम्बन्धी यो णल् सवा णिद् भवति णित्कार्यं तत्र वा भवतीत्यर्थः उत्तमविषयेऽपिचित्तव्याक्षेपात् परोक्षता सम्भवत्येव पेचे पेचाते पेचिरे ।

लिटि तावत् प्रवक्ष्यामि पदानयनपद्धतिम् ।
धातोः परं परोक्षे लिडिति लिट् प्रत्यये कृते ।।
तिप्तस्झीत्यादिना पश्चाल्लस्य स्थाने तिबादयः ।
आर्धधातुकसंज्ञात्र लिट् चेति स्यात् पुनः क्रमात् ।।
णलादयस्तिबादीनां नवानां स्युर्लिटो नव ।। इति ।।

धातोः परत्वेन 'परोक्षे लिडि' ति लिट् प्रत्ययः लस्य स्थाने तिबादयः 'लिट् चे' त्यार्धधातुकसंज्ञा आर्धधातुकत्वाच्छबादयो न भवन्ति एषां च लिडादेशानां नवानां 'परम्मैपदाना णलतुसुस्थलथुसणल्वमा' इति यथासंख्यं णलादयः स्युः तेच स्थानिवत्वेनार्धधातुकाः प्रयोजनम् वृध्यादि लकारः स्वरार्थः आदेशदशायामनेकालत्वाद् अनेकाल्शित्सर्वस्येति सर्वस्य भवति आदेशोत्तरकालं णलादयः प्रत्यया एव सकारस्य स्थानिवत्वेन विभक्तित्वात् 'न विभक्तौ तुस्मा' इति प्रतिषेधान्नेत्वम् । मध्यमपुरुषबहुवचनस्य थस्याकारादेशोऽत्र धातोरित्यनवृत्तेस्तस्मात् परस्य विधीयमानोऽकाराआदेः परस्ये ति हल्मात्रस्य थकारस्य अ अ अकारयो 'रतो गुण' इति पररुपत्वम् अ एवं कृते लिटि परस्मैपदे क्रमेण अ अतुस् उस् थ अथुस् अ अ वम इत्येता एव विभक्तयः ।

तझयोरेशिरेचौ स्तस्थासः सेशब्दमादिशेत् ।
कृसे वृसे तथानक्से तदन्येष्विडनन्तरम् ।।
सेशब्दस्येह षत्वं स्यादादेशप्रत्ययादिना ।
षण्णां भवति टेरेत्वं कार्यं टोष्टित आदिना ।। इति ।।

आत्मनेपदे 'लिटस्तझयो' रित्यादिना तझयोः क्रमादेशिरेचित्येतावादेशौ भवतः अनुबन्धयोः शकारचकारयोर्लोपः ए हरे 'थासः से' इत्ययमादेशः डुकृञ् करणे इत्यस्य कृसे वृङ् सम्भक्तावित्यस्य वृसे अशूव्याप्तावित्यस्य यदानक्से इति सिध्यति तदेति त्रयाणामेभ्योऽन्येषां सर्वेषामिडागमानन्तरं चेति लिटि सर्वत्र से इत्यस्य 'आदेशे' त्यादिना षत्वम् ए इरे षे, एभ्योऽन्येषां षण्णां कार्यान्ते 'टित आत्मनेपदानां टेरे' इति टेरेत्वम् एवं कृते लिट्यात्मनेपदे क्रमेण ए आते इरे षे आथे ध्वे ए वहे महे इत्येता एव विभक्तयः ।

असंयोगात्तु लिट् कित् स्यात् तथेन्धीभवतीत्यतः ।
त्रयस्त्रिशत्यतः कत्वं पितोऽन्यत्र लिटो भवेत् ।। इति ।।

भूधातोः 'इन्धिभवतिभ्यां चे'त्यपितो लिटः कित्वम् तदन्येषां चात्र द्वात्रिंशत्संख्यानां 'असंयोगाल्लिट्किति'त्यपितो लिटः कित्वम् तस्माद् धातूनां त्रयस्त्रिंशतिः तिप्सिप् मिबिति त्रिभ्योऽन्यत्र सर्वत्र लिटः कित्वमेव ।

धातुः सेट् चेद्यथान्यायं वलादीनामिडागमः ।
लिटि धातोर्द्विवचनं तत्पूर्वोऽभ्याससंज्ञकः ।।
द्विर्वचस्थानिवद्भावाद् यदि द्विर्वचनेऽचि तत् ।
ह्लादिश्च तथा ह्रस्वाश्चाभ्यासे चर्च जश् पुनः ।।
अस्माद्यत्र विशेषो यस्तत्र सोऽपि विधीयते ।। इति ।।

परस्मैपदे थ व म आत्मनेपदे से ध्वं वहिमहीति सप्तानामेव वलीदित्वम् सर्वत्र द्विर्वचने कार्य 'लिटि धातो' रिति द्विर्वचनम् द्विर्वचने कृते तयोः पूर्वोऽभ्याससंज्ञकः

क्रादिसूत्रोक्तनियमात् कृञवृञावनिटौ लिटि ।
ससुट्कस्य करोतेस्तु सेट्त्वमेव ऽलेटीष्यते ।।
अश्नोते रिङ्विकल्पः स्यात् स्वरतीत्यार्धधातुके ।
अस्मात् थलि विशेषो यः स एवाथ प्रदर्श्यते ।।
भारद्वाजोक्तनियमादनिट्त्वं थलि वै मृङः ।
नहिः चिनोतिः क्रीणातिर्जुहोतिपचिधाञ्श्रुञः ।।
विभाषितेटः सप्त त्सुस्त्रयस्त्रिंशत्यमी थलि ।
एषां तु क्रादिनियमादिटि प्राप्ते वचेर्नहेः ।।
उपदेशेऽत्वतोऽन्येषां त्वचस्तास्वदिति क्रमात् ।
धातूनामिति सप्तानां प्रतिषेधेऽप्युपागते ।।
भारद्वाजोक्त नियमादिङ्विकल्पो भवेत् थलि ।
तस्माल्लिटि द्वावनिटावेक एव विभाषितेट् ।।
अनिटौ थल्यपि द्वौ स्तो विभाषेटस्तु सप्त हि ।
तदन्ये धातवः सेटो भवन्ति लिटि थल्यपि ।। इति ।।

डुकृञ् करणे वृङ् सम्भक्तावित्येतौ लिट्यनिटौ, डुकृञ् करण इत्ययं धातुः ससुट्कश्च सेट् अशूव्याप्तावित्यस्य 'स्वरतिसूती' त्यादिनेड्विकल्प तस्माल्लिटि द्वावेवानिटौ एको विभाषितेट् ,धतूनां त्रयस्त्रिश अन्ये त्रिंशद्धातवो 'नित्यं लिटि सेट' इति लिट्यन्यतरस्याम् थलि योविशेषः स एवाथ प्रदर्श्यते मृङ्प्राणत्याग इत्ययं थल्यनिट् तस्मान्मृङ् प्राणत्यागे डुकृञ् करण इति च द्वावेव थल्यनिटौ , णहबन्धने चिञ् चयने डुक्रीञ् द्रव्यविनिमये हुदानादानयोः डुपचष् पाके डुधाञ् दानधारणयोः षुञ् अभिषव इत्येते सप्त धातवस्थलि विभाषितेटः ,एषां सप्तानां थलि क्रादिनियमादिटि प्राप्ते डुपचष् पाके णह बन्धन इत्येयोरुपदेशेऽत्वत इति प्रतिषेधे च अन्येषां च पञ्चानम'चस्तास्वदिति' प्रतिषेधे च प्राप्ते 'ऋतो भारद्वाजस्ये' ति भारद्वाजनियमादेषां सप्तानां थलीड्विकल्पः तस्मात् थलि धातूनां त्रयस्त्रिंशति द्वावेवानिटौ ौ सप्तविभाषितेटः चतुर्विशतिरन्ये नित्यं सेटः । इति थलि चेड्विभागः।।

अदेर्घस्लादेशे थलीड्विकल्पो न भवति तथाच काशिकावृत्तौ तास्वदिति प्रतिनिर्देशः तासौ स तस्थलि प्रतिषेधार्थः यो हि ता सावसन्नत्वच्च नित्यानिट् तस्य थलि प्रतिषेधो न भवति जघसिथ उवयिथ, उत्तरसूत्रेऽपि तासाविति वर्त्तते, अदादेशो हि घसिः व्येञादेशश्च वयिः लिट्येच न तासाविति ।

धातुवृत्तौ च अचस्तास्वदिति थलीण्निषेधः तासौ सत इत्युक्तम्, तेन घस्लादेशस्य तासावसत्वान्नात्र स निषेधः ।अत एव च तद्विषयो भारद्वाजनियमोऽपि न भवति, यद्वा स्थानिवद्भवादिडत्यत्त्ती ति नित्यमिट् भविष्यति, नन्वस्ति प्रकृत्यन्तरस्य घसेर्यत्र लिङ्गं वचनं वास्ति तत्रैव प्रयोगः न सर्वत्रेति तत्रैव धातावुपपादितत्वात् अतो नास्ति लिटि प्रयोगः इति ।। उवचिथेत्यत्र थलीड्विकल्पो न भवति । तदुक्तं धातुवृत्तौ थलि 'उपदेशेऽत्वत' इतीण्निषेधो न भवति, तत्रोपदेशग्रहणस्थ 'धातूपदेशेऽत्वत' इति व्याख्यानात् अयं चादेशोत्तरकालं धातुः नोपदेश इति अत एव तद्विषयो भारद्वाजानियमोऽपि नि भवति तस्माद्विकल्पाभाव इति ।

षूङ् प्राणिप्रसव इत्ययं धातुर्लिटि नित्यं सेट् तथाच धातुवृत्तौ स्मरति 'सूति सूयतिधूञुदितो' वे ति वलादाविड्विकल्पः लिट्यमुं विकल्पं बाधित्वा पुरस्तात् प्रतिषेधकाण्डारंभसामर्थ्यात् 'श्र्युक किति' ति निषेधप्राप्ते क्रादिनियमान्नित्यमिट् इति भू अ भूअतुसित्यादि,

वलादेरिट् भुवो वुक् स्यात् पुनर्द्विर्वचनं लिटि ।
धातोरनभ्यासस्येति हलादिः शेष इत्यथ ।।
ह्रस्वश्च भवतेरश्चाथाभ्यासे चर्च बभूव सः ।। इति ।।

भू अ इत्यादिषु थवमेत्येतेषां त्रयाणामिट् भू इथ, भू इव, भू इम, पुनरित्यादिषु नवसुं 'भुवो वुग् लुङ्लिटो' ६-४-५० रिति भुवो वुगागमः अनुबन्धलोपः भूव् अ 'लिटि धातोरनभ्यासस्ये' ६-१-५ ति द्विर्वचनम् भूव् भूव् 'हलादि शेष' ७-४-६० इत्यभ्यासस्यादिर्हल् शिष्यते अनादिर्हल् लुप्यते भूभूव् अ 'ह्रस्व' ७-४-५९ इत्यभ्यासाचो ह्रस्वत्वं स्यात् 'भवतेर' ७-४७३ इत्युकारस्याकारः भभूव 'अभ्यासे चर्चे' ५-४-५४ ति जश् बभूव अत्र सर्वत्र बभूवेति प्रकृतिः बभूव बभूवतुः वभूवुः बभूविथ बभूवथुः बभूव बभूविव बभूविम ।

एध् ,एधेर्लिटि कृतेऽन्येभ्यो भेदः स्यात् सोऽथ कथ्यते ।
दीर्घं चेति गुरुत्वे स्याद् धातोराम्प्रत्ययः सच ।।
इजादेरिति सूत्रेण लेर्लुक् स्यादाम इत्यतः ।
आमः कृत्वात् सुबुत्पत्तिरव्ययत्वात् सुपोऽत्र लुक् ।।
आमस्तु स्यादव्ययत्वं पठितत्वात् स्वरादिषु ।
आम्प्रत्ययस्याथ पश्चात् कार्यं स्यात् परतो लिटि ।।
लिट् कृञोऽनुप्रयोगः कृञ्चेति सूत्रतः ।
आम्प्रत्ययवादित्यादिना कृञोऽत्रात्मनेपदम् ।।
वक्ष्यमाणपकारेण चक्र इत्यादयः पुनः ।। इति ।।

एध् ल् 'दीघश्चे' त्येकरास्य गुरुसंज्ञायां 'इजादेश्चे' त्यादिनाम्प्रतययः । अनुबन्धलोपः एध् आम् ल् 'आम्' इति लेर्लुक् एधाम् आमः कृत्प्रत्यत्वात् तदन्तस्य 'कृत्तद्धिते' ति प्रातिपदिकसंज्ञायां सुप् एधां सु आमः स्वरादिषु पाठादव्ययत्वाद् 'अव्ययादाप् सुप' इति सुपो लुक् एधाम् कृभ्वस्तीनामनुप्रयोगे कार्ये एवं 'एधां कृ' इति पदैकदेश आनेतव्यः एधाम् 'कृञ्चानुपयुज्यते लिटि' त्याम्प्रत्ययस्य पश्चाल्लिटि परतः लिट् परस्य कृञाऽनुप्रयोगः। कृञिति प्रत्याहारग्रहणम् तेन कृभ्वस्तयो गृह्यन्ते । तत्र कृ इत्यस्यानुप्रयोगे एधां कृ ल् 'आम् प्रत्ययवत्' कृञोऽनुप्रयोगस्ये ति कृ इत्यस्मादुत्तरस्य लस्य स्थाने तङ् एधां कृतेत्यादि, लिटस्तझयोरि ति तझयोर्यथासंख्यमेशिरे चावित्यादेशौ शकारचकारयोर्लोपः एधां कृ ए इत्यादि शेषं वक्ष्यमाणप्रकारेण एधाञ्चक्रे एधाञ्चक्रात इत्यादि 'कृत्तद्धितसमासाश्च' 'स्वरादि निपातम व्ययः' ।।

अनुप्रयुक्तयोर्कृभ्वस्त्योः परस्मैपदमे हि ।
ततो बभूवेत्यादीनां प्राग्वत् स्यात् प्रक्रिया त्वसेः ।।
वलादिरिट् द्विर्वचनं हलादिः शेष इत्यपि ।
पश्चादत्रात आदेः स्याद् दीर्घो दीर्घः सवर्णकः ।। इति ।।

'कृञ्चानुप्रयुज्यते लिटी'त्यत्र कृञ्ग्रहणे कृतेऽपि 'आम्प्रत्यवात् कृञोऽनुप्रयोगस्ये'त्यत्रापि कृञग्रहणात् कृञ्ग्रहणात् कृञ एव कृञ्, इत्यस्यैवात्मनेपदम् न भ्वस्त्योः । एघां कृञ्चानुप्रयुज्यते लिटि इत्याम्प्रत्ययस्य पश्चाल्लिटि परतो लिट् परस्य भुवोऽनुप्रयोगः भूल् लस्य पूर्ववत् तिबादय इट्च एधां बभूव मकारस्यानुस्वारपरसवर्णो, एधाम्बभूव एधाम्बभूतुरित्यादि एधां 'कृञ्चानुप्रयुज्यते लिटि' इत्याम्प्रत्ययस्यपश्चाल्लिटि परतो लिट्पररस्यासेरनुप्रयोगः अनुबन्धलोपः एघां अस् ल् लस्य तिबादयः तेषां णलादयः पुनस्थवमेत्येतेषां त्रयाणामिट् ,एधां अस् इथ इत्यादि पुनः सर्वत्र 'लिटि धातो' रिति द्विर्वचनम् एधां अस् अस् अ अत्राभ्यासस्कारस्यानादित्वाद् 'हलादिः शेष' इति लोपः एधां

'अत आदे' रित्याभ्यासस्यादेरकारस्य दीर्घः एधामा अस् अ एधामास अत्र एधामासेति सर्वत्र प्रकृतिः । एधामास एधामासतुरित्यादि,

पच् अ इत्यादि,

णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अत इत्यादिना वृद्धिर्यथान्यायमिडागमः ।।
द्विर्वचः स्थानिवद्भावो वृद्धावेवाथ सर्वतः ।
स्याद्धलादि शेष इति कित्सु पञ्चदशस्वथ ।।

अत एकहलाद्येत्वलोपौ था इत्यङ्गस्योपधाया अकारस्य वृद्धिः पाच् अ पच् थेत्यत्र क्रादिनियमादिटि च 'उपदेशेऽत्वत' इतीटप्रतिषेधे च प्राप्ते 'ऋतोभारद्वजस्ये' ति भारद्वाज नियमाद्'आर्धधातुकस्ये' तीट्पक्षे इट् पच् इथ पचथ वमसे ध्वं वहिमही त्येतेषां षण्णां आर्धधातुकस्ये ति नित्यमिडागमः इव इमेत्यादि। इव इमेत्यादिर्वच इति द्विर्वचनमित्यर्थः। पाच् अ इत्यत्र लिटि धातो द्विर्वचने कर्तव्ये द्विर्वचनेऽचि ति स्थानिवत्वाद् द्विर्वचनम् पच् पच् अ कृते द्विर्वचने रादेश एवावतिष्ठते पच् पाच् अ द्विर्वचनेऽची त्यत्राजादेश वृद्धेरन्यत्र पच् अतुसित्यादिषु सर्वत्र 'लिटि धातो रिति' द्विर्वचनम् पच् पच् अतुसित्यादि पुनः सर्वत्र 'हलादिः शेष' इत्यभ्यासस्यादिर्हल् शिष्यते अनादिर्हल् लुप्यते पपाच अ अतुसित्यादि पुनः कित्सु पञ्चदशसु 'अत एकहलि' द्वितीयपकारेऽकारस्यैत्वमभ्यासलोपश्च पेचतुसित्यादि पपचिथेत्थत्र थलि च सेटि ति प्राग्वदेत्वाभ्यासलोपौ पेचिथ पपच् थेत्यत्र 'चोः कु'रिति चकार कुत्वं ककारः 'अनचिचे'ति ककारस्य द्वित्वं वा पपाच पेचतुः पेचिथ पपचथेत्यादि,

नद्, हलादिः शेषोऽनुस्वारसवर्णो च ननन्द सः ।। इति ।।

थवम इत्येतेषां त्रयाणां 'आर्धधातुकस्ये' तीट् । पुनः सर्वत्र 'लिटि धातो' रिति द्विर्वचनम् नद नद् अ इत्यादि 'हलादिः शेष' इत्यभ्यासस्यादिर्हल् शिष्यते

अनादिर्लुप्यते ननन्द अ तृतीयनकारस्यानुस्वारपरसवर्णौ, ननन्द ननन्दतुरित्यादि,

ध्वनस् ,इट् स्याद्वलादेः सर्वत्र पुनर्द्विर्वचनं लिटि ।
धातोरिति हलादिः शेषोऽभ्यासे चर्च नस्यतु ।।
नश्चापदेत्यनुस्वारो दध्वंसे द्वित्वे जश्त्वयोः ।। इति ।।

सेध्वं वहि महीत्येतेषां चतुर्णां 'आर्धधातुकस्ये तीट्' डागमः 'सर्वत्र लिटि धातो' रिति द्विर्वचनं ध्वन्स् ध्वन्स् ए इत्यादि सर्वत्र 'हलादि शेष' इत्यभ्यासस्यादिर्हल् शिष्यते अन्ये हलो निवर्त्तते ध्वं ध्वसे नश्च धध्वंस 'अभ्यासे चर्चे'ति जश्त्वम् धकारस्य द्वित्वजश्त्वे दध्वंसे दध्वंसात इत्यादि।

व्येञ् न स्यादादेच इत्यात्वं नव्यो लिटि निषेधतः ।
णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।।
अचो ञिणिति वृद्धिः स्यात् तत्रायादेश एव च ।
वलादेरिडयादेशस्थलि चाणिति णल्यपि ।।
अथ कित्सु प्रसारः स्याद्वचिस्वपियजादिना ।
स्यात् सम्प्रसारणश्चेति पूर्वरूपं च सर्वतः ।।
द्विर्वचः स्थानिवद्भावः पित्स्वेव न तु कित्स्वयम ।
लिप्यक्यासस्योभये षामिति पित्सु प्रासारण् ।।
स्यात् सम्प्रसारणाच्चेति पूर्वरूपं च कित्स्वयम् ।
एरनेकादिना यण् स्यात् सर्वत्रानचि चेति ।।
विभाषेटो विव्याम व्यति विव्यतुरेव च ।। इति ।।

व्ये 'आदे च उपदेशऽशी'त्वात्वे प्राप्ते 'न व्यो लिटी' ६-४-६ ति प्रतिषेधात्तन्न भवति व्ये अ इत्यादि उत्तमणलि 'णलुत्तमोवे' ति वा णित्कार्यम् तत्र णित्पक्षे प्रथमणलि च 'अचोञ्णिती' ति वृद्धिः व्यै अ अयादेशः व्याय व्येथेत्यत्र 'इडत्यर्त्तिव्ययतीना' ७-२-६६ मिति नित्यमिडागम व्ये इथ वमसे ध्वं

वहि महीत्येषां षण्णां 'आर्धधातुकस्ये'तीडागम इव इत्यादि व्ये इथ व्ये अ इत्यनयोरपदेश व्ययिथ व्ये अतुसित्यादिषु कित्सुपञ्चदशसु 'वचिस्वपियजादीनां किती' ति सम्प्रसारणम् वि ए अतुस् पूर्वरूपत्पं च वि अतुसित्यादि पुनः पित्सु 'लिटि धातो' रिति द्विर्वचनम् विवि अतुसित्यादि अथ पित्सु 'लिट्यभ्यासस्योभयेषा' ६-१-९६ मिति हलादिशेषं बाधित्वाभ्यासयकारस्य सम्प्रसारणम् विए व्यय विए व्ययिथ पूर्वरूपत्वं च विव्याय विव्यय विव्ययिथ पुनरपि वकारस्य सर्वत्र सम्प्रसारणे प्राप्ते 'न समासरणे सम्प्रसारण' मिति प्रतिषेधात् तन्न भवति अथ कित्सु पञ्चदशसु 'एरनेकाच' इत्यादिना यणादेशः विवय् अतुस् इत्यादि सर्वत्र 'अनचिचे' ति वकारस्य द्वित्वम् ध्वमि 'विभाषेट' इति वा मूर्धन्यः विव्याय विव्यतुः विव्युः । विव्ययिथ विव्यिध्वे विव्यिढ्वे इत्यादि 'न व्योलिटि' ६-१-४६ व्येञो लिटि परत आकारोदेश न भवति, 'अचो ञ्णिति' ७-२-११५ 'लिट्यभ्यासस्योभयेषाम्' ६-१-१६ वच्यादीनां ग्रहादीनां च लिटि परतोऽभ्यासस्य सम्प्रसरणं भवति उभयेषां ग्रहणं हलादिशेषमपि बाधित्वा सम्प्रसारणमेव यथा स्यादित्येवमर्थम् ' एरनेकाचोऽसंयोगपूर्वस्ये'तियणादेशः

अद्, घस्लादेशो विकल्पात् स्यादत्तेर्लिटि विवक्षिते ।
णलुत्तमो बात्र णिति प्रथमे णलि च द्वयोः ।।
अत इत्यादिना वृद्धिर्यथान्याय मिडागमः ।
कित्सु षट्सूपधालोपो भवेद् गमहनादिना च ।
कुहोश्चुरिति चुत्वं स्याज्जश्त्वं चाभ्याससूत्रतः ।।
न भवेत् स्थानिवद्भावस्थलि चाणिति णल्यपि ।।
कित्सु षत्वं सकारस्य शासिवस्यादिना च तत् ।
खरि चानचि चेति स्तो जघासान्नं बुभुक्षितः ।। इति ।।

अद् 'लिट्यन्यतरस्या' २-४-८० मित्यदेर्घस्लादेशोऽन्यतरस्याम् अनुबन्धलोपः घस् ल् लस्य तिबादयः तेषां णलादयश्च घस् अ इत्यादि उत्तमणलि

'णलुत्तमो वे ति' णित्कार्यम् तत्र णित्पक्षे प्रथमणलि च 'अत उपधायाः' ७-२-११६ इति वृद्धिः घास् अ घसे स्थानिवद्भावाद् इडत्यर्त्ति व्यातीना मिति नित्यमिट् घस् इ थ वमयो 'रार्धधातुकस्ये तीट्' घस् इ व, घस् इम कित्सु षट्सु 'गमहने' ६-४-९५ त्यादिनोपधालोपः घस् अतुसित्यादि थलि उत्तमणत्यणिति च 'लिटि घातो रिति द्विर्वचनम्' घस घस् इथ घस् घस् अ अन्यत्र सर्वत्र लिटि धातो रिति द्विर्वचने 'द्विर्वचनेऽची' ति स्थानिवद्भावः । घस् घस् अ घस् घस् अतुसित्यादि कृते द्विर्वचने पुनरादेश एवावतिष्ठते घस् घस् अ घस् घस् अ घघस् अतुसित्यादि 'कुहोश्चु' रित्यभ्यासघकारस्यचुत्वं झकारः झघास झघस् अतुस् 'अभ्यासे चर्च'ति जश्त्वं जकारः जघास् अ जघस् अतुसित्यादि पुनः कित्सु षटसु शासिवसिघसीनाम्चेति सकारस्य कोः परत्वात् षत्वं जघष् अतुस् घकारस्य खरिचे ति चर्त्वम् अतुस् अनचिचे ति ककारस्य द्वित्वम् जक्षतुस् जघास जक्षतुः जक्षु जघसिथ जक्षथुः जक्ष जघास जघस जक्षिव जक्षिव 'लिट्यन्यतरस्याम्' २-४-४० लिटि परतोऽदेर्घसादेशो भवत्यन्यतरस्याम् 'गमहनजनखनघसां लोपः क्ङित्यनङि' ६-४-९५ गमहनजनखनघसेत्येतेषामुपधाया लोपो भवत्यजादौ क्ङित्यनङि परतः । 'शासिवसिघसीनां च' ५-३-६० शासि विसि घसीत्येतेषां निमित्तादुत्तरस्य सस्य मूर्धन्यादेशो भवति ।

अद्, इडागमो घस्लभावे द्विर्वचश्च हलादि च ।
दीरर्घोऽत आदेर्दीर्धः सवर्णश्चादहरोविषम् ।। इति ।।

थलि 'इडत्यर्तीति' नित्यमिट् वमयो'रार्धधातुकस्ये' ति नित्यमिट् सर्वत्र द्विर्वचनम् अद् अद अ इत्यादि 'हलादिः शेषः' अ अद् अ, 'अत आदे' रित्यभ्यासस्यादेरकारस्य दीर्घः आ अद् अ सवर्णदीर्घः आद आदतुः आदुरित्यादि,

शी, इट् पुनर्द्विर्वचो ह्रस्व एरनेकाचो ऽनचीति च ।
विभाषेटो द्वित्वजश्त्वे शिश्ये विष्णुर्वटच्छदे ।। इति ।।

शी ए इत्यादिषु से ध्वं वहि महीत्येतेषां चतुर्णा 'आर्धधातुकस्ये'तीट् सर्वत्र 'लिटि धातो रिति' द्विर्वचनम् शीशी ए इत्यादि 'ह्रस्व' इत्यभ्यासाचो ह्रस्वत्वम् शिशीए 'एरनेकेच' इति यण् शिशिय् ऐ 'अनचिचे' ति द्वित्वम् शिश्श्य्ए ध्वमि 'विभाषेट' इति धकारस्य वा मूर्धन्यः शिश्ये शिश्याते शिश्यिरे शिश्यिषे शिश्याथे शिश्यिध्वे शिश्यिढ्वे शिश्ये शिश्यिवहे शिश्यिमहे,

ब्रु, आर्धधातुकसंज्ञे तु प्रत्ययेऽथ विवक्षिते ।
ब्रुवो विचिरिति प्रोक्तो वच्यादेशो भवेद् ब्रुवः ।।
णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अत इत्यादिना वृद्धिर्वलादीनामिडागमः ।।
वचिस्वपियजादीनामिति कित्सु प्रसारणम् ।
स्यात् सम्प्रसारणाच्चेति पूर्वरूपं च सर्वतः ।।
द्विर्वचः स्थानिवद्भावो वृद्धावेवाथ सर्वतः ।
स्याद्धलादिः शेष इति पुनः पित्सु प्रसारणम् ।।
लिट्यभ्यासस्योभयेषां पूर्वरूपं प्रसारणात् ।
सवर्णदीर्घः कित्सु स्यादुवाच हरिरर्जुनम् ।। इति ।।

ब्रु, 'ब्रुवो वचि' २-४-५३ रिति वचिः इकार उच्चारणार्थः वच् ल् लस्य तिबादयः 'लिट् चे' ३-४-११५ त्यार्धधातुकसंज्ञा तिबादीनां णलादयः । वच् अ इत्यादि उत्तमणलि 'णलुत्तमो वे' -ति वा णित्कार्यम् तत्र णित्पक्षे प्रथमणलि च 'अत उपधाया' इति वृद्धिः वाच अ पुन थवम सेध्वं वहि महीत्येतेषां सप्ताना 'मार्धधातुकस्ये'तीट् कित्सु पञ्चदाशु 'वचि स्वपीति' ६-१-१५ सम्प्रसारणम् उ अच् अतुसित्यादि 'सम्प्रसारणाच्चे ति' पूर्वरूपत्वं उच् अतुसित्यादि । पुनः वाच् अ इत्यत्र स्थानिवत्त्वाद् द्विर्वचनम् वच् वच् अ कृते द्विर्वचन आदेश एव वच् अ वृद्धेन्यत्र सर्वत्र द्विर्वचनम् मव उच् उच् अतुसित्यादि अथ सर्वत्र हलादिः शेषः ववाच ववच उउच् अतुस् पुनः पित्सु लिट्यभ्यासस्ये ति सम्प्रसारणम् उअवाच्

'सम्प्रसारणाच्चे ति' पूर्वरूपत्वम् उवाच उवच उवचिथ कित्सु पञ्चदशसु सवर्णदीर्घः अचतुसित्यादि उवाच ऊचतुः ऊचुः उवचिथेत्यादि ऊचे ऊचाते इत्यादि,

आम्प्रत्ययो जुहोतेर्वा भवेल्लिटि परे सति ।
सूत्रेण भीह्रीभृहुवां श्लुवच्चेति श्रुवत्वतः ।।
होरत्र श्लाविति द्वित्वं लेर्लुक् स्यादात्म इत्यतः ।
कुहोश्चुरित्यभ्यासस्य हकारस्य झकारता ।।
अभ्यासे चर्च जश्त्वं च सार्वधात्वादिना गुणः ।
अवादेशः क्रमादेभिर्जुहवामिति सिध्यति ।।
आमः कृत्वात् सुबुत्पत्तिरव्ययत्वात् सुपोऽत्र लुक् ।
कृञस्त्वनुप्रयोगः स्यात् कृञ्चानुप्रादिसूत्रतः ।।
आम्प्रत्ययवदित्यादिना भवेयुस्तिबादयः ।
वक्ष्यमाणप्रकारेण चकारेत्यादयस्तथा ।।
पूर्वोक्तवद् बभूवेति तथैवासादयः पुनः ।। इति ।।

हुल् 'भीह्री' ३-१-३५ वाम्प्रत्ययः अनुबन्धलोपः हुआम् ल् अनेनैव सूत्रेण श्लुवत्कार्ये 'श्ला' विति द्वित्वम् हुहु आल् 'आम' इति लेर्लुक् हुहु आम् 'कुहोश्च', रित्यभायसहुकारस्य चुत्वं झकारः झुहु आम् 'अभ्यासे चर्चे' ति जश्त्वं जुकारः जुहु आम् 'सार्वधातुके' ति गुणः जुहो आम् अव् जुहवाम् आमः कृ तदन्तस्य 'कृत्तद्धितेति' प्रातिपादिकसंज्ञायां सुप् जुहवाम् आमः स्वरदिषु पाठादव्ययत्वाद् 'अव्ययादापसुप' इति सुपोलुक् जुहवां, कृभ्वस्तीनामनुप्रयोगे कार्ये सत्येवं जुहवामिति पदैकदेश आनेतव्यः जुहवाम् 'कृञ्चे' ३-१-४० त्यादिना प्रत्ययस्य पश्चाल्लिटि परतो लिट्परस्य कृञोऽनुप्रयोगः कृञिति प्रत्याहारग्रहणम् तेन कृभ्वस्तयो गृह्यन्ते जुहवां कृल् आम्पत्ययवत् कृञोऽनुप्रयोगस्ये ति नियमात् पूर्ववदित्यनुवृत्तेः कृञः क इत्यस्य परस्मैपदम् जुहवां कृल् लस्य तिबादयः तेषां णलादयश्च जुहवां कृ अ इत्यादि शेषं वक्ष्यमाणप्रकारेण कृञः

भ्वस्त्योः पूर्वोक्तवत् जुहवाञ्चकार जुहवाञ्चक्रतुः जुहाञ्चक्रुरित्यादि जुहवाम्बभूव जुहवाम्बभूवतुः रित्यादि जुहवामा स जुहवामासतुः त्यादि 'भीह्रीभृहुवां श्लुवच्च' ३-१-३९ ञिभी भये ह्री लज्जायाम् भृज् धारणपोषणयोः हुदानादानयोरित्येतेषां लिटि परत आम्प्रत्ययो भवत्यन्यतरस्याम् श्लाविव चाम्सिन् कार्यं भवति, द्विर्वचननिमित्तं च गुणावादेशौः

हु आम्प्रत्ययाभावे,

णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अचोञ्णिति वृद्धिः स्यादावादेश इडागमः ।।
थल्द्वयेऽण्यल्यणित्पक्षे गुणोऽवादेश एव च ।
कित्सूवङ् स्थानि वद्भावाद् द्विर्वचः सर्वतोऽत्र तु ।।
अनिट् थलित्ववादेशः स्थानिवत्त्वं च नो भवेत् ।
तत्राभ्यासस्य तु ह्रस्व इति ह्रस्वोऽथ सर्वतः ।।
चुत्वं कुहोश्चुरभ्यासे चर्च जश्त्वं जुहाव सः ।। इति ।।

हु अ इत्यादि, उत्तमणलि 'णलुत्तमो वे' ति णित्कार्यं वा भवति । तत्र णित्पक्षे प्रथमणलि च 'अचो ञ्णिती' तिवृद्धि हौ अम् अवादेश हाव अ इत्यादि हु थेत्यत्र क्रादिनियमादिट् च 'अचस्तास्वदि'तीट् प्रतिषेधे च प्राप्ते 'ऋतो भारद्वाज्यस्ये' ति भारद्वाजनियमादिड्विकल्पः तस्मादार्धधातुकस्येति लेट् हु इ थ ,हुथ वमयो 'रार्धधातुकस्ये'तीड् इव हुइम पुनः हुइथ हुथ हुअ इत्येतेषां त्रयाणां 'सार्वधातुकार्धधातुकयो' रिति गुणः होइथ होथ हो अ पुन हो इथ हो इत्यनयोरत् हव् इथ, हव् अ कित्सु षट्सु 'अचि श्न्वि' त्यादिनोवङ् हुव् अतुसित्यादि अनिट् थलोऽन्यत्र सर्वत्र स्थानिवत्वाद् द्विर्वचनम् हुहुअ हुहु अतुसित्यादि, कृते द्विर्वचने पुनरादेश एव हुहाव हुहु वतुसित्यादि होथेत्यत्र द्विर्वचनमेव होहोथ 'ह्रस्व' इत्यभायसाचो ह्रस्वत्वम् हुहोथ पुनः सर्वत्र 'कुहोश्चु' रित्यभ्यासहकारस्य चुत्वं झकारः झुहावेत्यादि 'अभ्यासे चर्चे'ति झकारस्य जश्त्वं जकारः जुहाव जुहुवतुः जुहुवः जुहविथ जुहोथ जुहुवथुः जुहुव जुहाव जुहव जुहुविव जुहुविम ।।

हा, इडागमो बलादेः स्यादातो लोपस्तु सर्वतः ।
द्विर्वचः स्थानिवद्भावादभ्यासस्य भवेत् पुनः ।।
ह्रस्वः कुहोश्चुत्वं च हकारस्य झकारता ।
आक्यसे चर्च जश्त्वं च विभाषेटो दिवं जहे ।। इति ।।

हा ए इत्यादिषु सेध्वं वहिमहीत्येतेषां चतुर्णा 'आर्धधातुकस्ये' तीट सर्वत्र 'आतो लोप इटि चे' ६-४-६५ ति हकार आकारस्यलोपः हु ए इत्यादि, सर्वत्र स्थानिवत्वाद् द्विर्वचनम् हाहा ए कृते द्विर्वचन आदेश एव हाहए इत्यादि सर्वत्र 'ह्रस्व' इत्यभ्यासाचो ह्रस्वत्वम् हहे 'कुहोश्चु' रिति चुत्वं झकारः झहे 'अभ्यासे चर्चः' जहे ध्वमि 'विभाषेट' इति वा धस्य मूर्धन्यः जहे जहाते जहिरे ज्'ाहिषे जहाथे जहिद्वे जहे जहिवहे जहिमहे जहिमहे ।। 'आतो लोप इटि' ६-४-६४ इत्यजादावार्धधातुके क्ङिति परत आकारस्य लोपो भवति ।।

धा, णल्यात औणल इति णल औकारता भवेत् ।
वृद्धिरेचीति वृद्धिश्च यथान्यायमिडागमः ।।
आतो लोप इटीति स्यात् थलि सेटि च कित्सु च ।
द्विर्वचः स्थानिवद्भाव् सर्वत्र ह्रस्व इत्यपि ।।
अभ्यासे चर्च थल्यानिटि स्थानिवत्त्वं न सम्बवेत् ।
गुहाश्रमं समासाद्य जटां दाशरथिर्दधौ ।। इति ।।

धा इत्यादिषु प्रथमणल्युत्तमणलि च 'आत औ णल' ७-१-३४ इति णल औकारादेशः धाऔ 'वृद्धिरेचि' धौ ,धाथे त्यत्र क्रादिनियमादिटि च 'अचस्तास्वदि' तीटप्रतिषेधे च प्राप्ते भारद्वाजनियमादिड्विकल्पः वम सेध्वं वहि महीत्येतेषां षण्णा'मार्धधातुकस्ये' तीट् आगमः कित्सु पञ्चदशु थलीट् पक्षेच 'आतो लोप डरि चे ति धकारे आकारस्य लोपः ध् अतुसित्यादि अनिट थलोऽन्यत्र सर्वत्र स्थानिवत्वाद् द्विर्वचनम् धाधा औ, कृते द्विर्वचन आदेश एव धाध् औ धाध् अतुसित्यादि धाथेत्यत्र द्विर्वचनमेव, धाधाथ स्वत्र 'ह्रस्व' इत्यभ्यासाचो ह्रस्वत्वम्

धध् औ धध् अतुसित्यादि, 'अभ्यासे चर्चे' ति जश्त्वंम् दधौ दधतुः दधुः दधिथ दधाथ दधथुः दध दधौ दधिव दधिम दधे दधाते दधिरे दधिषे दधाथे दधिध्वे दधे दधिवहे दधिमहे 'आत औ णलः' ७-१-३४ आकारान्तादङ्गादुत्तरस्य णल औकारादेशो भवति ।

दिव्, इडागमः पुनः कित्सु पुगन्तेत्यादिना गुणः ।
द्विर्वचः स्थानिद्भावाद्धलादिः शेष इत्यपि ।।
गुणभावात् स्थानिवत्वं न स्यात् कित्सु दिदेव सः ।। इति ।।

दिव् अ इत्यादिषु 'थवम'इत्येतेषां त्रयाणा'मार्धधातुकस्ये' तीट् पित्सु त्रिषु 'पुगन्ते'ति गुणः देव् अ देव् इथ तेषु त्रिषु स्थानिवत्वाद् द्विर्वचनम् दिव् दिव् अ इत्यादेश दिव् दिव् इथ कृते द्विर्वचन आदेश एव दिव् देव् अ दिव् देव् इथ कित्सु षट्सु द्विर्वचनमेव दिव् दिव् अतुसित्यादि अन्यत्र सर्वत्र 'हलादिः शेषः' दिदेव दिदितुः दिदिवुः दिदेविथ दिदिवथुः दिदिव, दिदेव दिदि दिदिविव दिदिविम।

सू, इडागमो वलादीनां सर्वत्रोवङचिश्न्विति ।
द्विर्वचः स्थानिवद्भावाद् ह्रस्वश्चादेशसूत्रतः ।।
षत्वं विभाषेट इति देवकी सुषुवे हरिम् ।। इति ।।

सेध्वं वहिमहीत्येतेषां चतुर्णा 'मार्धधातुकस्ये' तीट् सर्वत्र'चि श्नुधात्वि'त्युवङ् सुव् ए इत्यादि सर्वत्र स्थानिवत्वाद द्विर्वचनम् ,सुसूए कृते द्विर्वचन आदेश एव सूसुव् ए 'ह्रस्व' इत्यभ्यासाचो ह्रस्वः सुषुवे इत्यादि 'आदेशे' ति द्वितीयसकारस्य षत्वम् ध्वमि 'विभाषेट' इति वा मूर्धन्यः सुषुवे सुषुवाते सुषुविरे सुषुविषे सुषुवाथे सुषुविद्वे सुषुविध्वे, सुषुवे सुषुविवहे सुषुविमहे,

नह्, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अत इत्यादिना वृद्धिर्यथान्यायमिडागमः ।।
अनिट् थलिनहो धः स्यात् थस्य दत्वं झषस्तथोः ।
झलां जश् झशि जश्त्वं च द्विर्वचः सर्वतोऽत्र तु ।।

स्थानिवत्त्वं न सर्वत्र वृद्धावेव तदिष्यते ।
सर्वत्रापि हलादिः शेषः कित्वे त्वत एकहल् ।।
मध्येऽनादेश इत्येत्वलोपौ थलि च सेटितौ ।
विभाषेटो ननाहाथ नेहतुर्नेहुरित्यपि ।। इति ।।

उत्तमणलि 'णलुत्तमो वे' ति णित्कार्यविकल्पः अत्र णित्पक्षे प्रथमणलि च जह् अ इति स्थिते 'अत उपधाया' इति वृद्धिः नाह् अ नह थेत्यत्र क्रादिनियमा दिटिच 'उपदेशेऽत्वत' इतीट्प्रतिषेधे च प्राप्ते भारद्वाजनियमादा'र्धधातुकस्ये'ति पक्षे इडागमः नह् इथ नहथ पुनः वमसेध्वं वहिमहीत्येतेषां षण्णा'मार्धधातुकस्ये'तीट् प्रतिषेधे च प्राप्ते भारद्वाजनियमादार्धधातुकस्येडिति पूर्वधकारस्य जश्त्वं च नह् ध नाह अ इत्यत्र स्थानि द्विर्वचनम् नह् नह् अ कृते द्विर्वचन आदेश एव, नह् नाह् अ वृद्धेरन्यत्राष्टादशसु द्विर्वचनमेव। नह् नह् अतुसित्यादि नद् नद् ध पुनः सर्वत्र हलादिशेषः नानाह् अ । ननह् अतुसित्यादि कित्सु पञ्चदशसु अत एकेति एत्वम् अभ्यासलोपश्च ,नेह् अतुसित्यादि । ननह् इथेत्यत्र थलि च सेटी त्यङ्गस्यैत्व अप्यासलोपौच नेह् इथ, ध्वमि 'विभाषेट' इति वामूर्धन्यः, ननाह नेहतुः नेहुः नेहिथ ननद्ध नेहथुः नेह, ननाह ननह नेहिव नेहिम नेहे नेहाते नेहिरे नेहिषे नेहाथे नेहिध्वे नेहे नेहिवहे नेहिमहे ।

सु, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अचो ञ्णितीति वृद्धिः सायादवादेश इडागमः ।।
थल्द्वये णत्यणित्पक्षे सार्वधत्वादिनागुणः ।
अवादेशश्च श्यादचि श्नित्यादिना ह्युवङ् ।।
द्विर्वचः स्थनिवद्भावात् षत्वमादेशसूत्रतः ।
अनिट् थलि त्ववादेशः स्थानिवत्त्वं च नो भवेत् ।।
तत्राभ्यासस्य तु ह्रस्व इति ह्रस्वः सुषाव सः ।। इति ।।

उत्तमणलि वा णित्कार्यम् तत्र णित्पक्षे प्रथमणलिच 'अचोञ्णिती' ति वृद्धिः सौ अ आवादेशः साव अ, सुथेत्यत्र 'कादिनियमादि' टिच 'अचस्तास्वादि' ति प्रतिषेधे च प्राप्ते भारद्वाजनियमादिटो विकल्पः । वमयोः 'सार्वधातुकस्येति' नित्यमिट् पुनः सुइथ सुथ उत्तमणत्यणिति च त्रिषु 'सार्वधातुके' ति गुणः सो इथ सो अ पुनः सेट उत्तमणत्यणिति च अव् सव् इथ सव् अकित्सु षट्सूवङ् । सुव् अतुसित्यादि अनिट् थलोऽन्यत्र स्थानिवत्वाद् द्विर्वचनम् । सुसुअ इत्यादि कृते द्विर्वचन आदेश एव सुसाव् अ सुसव् अतुसित्यादि, अनिट् थलि सोथ इति स्थिते द्विर्वचनमेव सोसोथ 'ह्रस्व' इत्यभ्यासाची ह्रस्वः सुसोथ सर्वत्र आदेशे ति द्वितीय सकारस्य षत्वमम् सुषाव सुषुवतुः सुषविथ सुषोथ सुषुवथुः सुषुव सुषाव सुषाव सुषव सुषुविव सुषुविम ।।

अश् द्विर्वचो लिटि धातोः स्याद्धलादिः शेष इत्यादि ।
अत आदेरथाश्नोतेश्चेति चत्वारि सर्वतः ।।
विकत्पादिट् पुनः सेध्वं चानचोरनिटोर्द्वयोः ।
भवेद् प्रश्चादिना षत्वं तयोराधे षढोरिति ।।
आदेशेत्यादिनां षत्वं द्वितीयेतु ष्टुना ष्टुता ।
झलां जश् झशि जश्त्वे न षकारस्य डकारता ।।
आषाढमासे सम्पाप्ते रवं वलाहक आनशे ।। इति ।।

'अशू' ऊकार इड्विकल्पार्थः अश् ए इत्यादिषु सर्वत्र 'लिटि धातो' रिति द्विर्वचनम् अश् अश् ए इत्यादि 'हलादिः शेषः' अअश् ए 'अत आदे' रित्यभ्यासाकारस्य दीर्घः आ अश् ए 'अश्नोतेश्चे' ७-४-७२ ति दीर्घीभूतादभ्यासादुत्तरस्याश्नोतेरङ्गस्य नुडागमो भवति । टित्वादादिः आन् अशू,एवं सर्वत्रानशिति पदैकदेश आनेतव्यः से ध्वम् वहिमहीत्येतेषां चतुर्णां 'स्वरतिसूती'त्यादिना वा इडागमः पुनः सेध्वमित्यनयोरिडभावे आनश् से आनश् ध्वमिति स्थितयोः 'व्रश्चे'त्यादिना सस्य षत्वं आनष्

से,आनष् ध्वम् ,पुनानष् से इत्यत्र 'षढो कसी'ति ,षकारस्य ककार,आनक् से 'आदेशे'ति षत्वं आनक्षे,आनष् ध्वमित्यत्र 'ष्टुनाष्टु'रिति धकारस्य ढकारः आनष् ढ्वम् 'झला'मिति षस्य डःआनड् ढ्वम् आनढ्वम् ,आनशे आनशाते आनशिरे ,आनशिषे आनक्षे आनशाथे आनशिढ्वे,आनढ्वे आनशे आनशिवहे आनशिमहे ,इडभावे 'अनचिचो'ति शकारस्य द्वित्वं,आनश्वहे आनश्महे,'अश्नोतेश्च'७-४-७२दीर्घीभूतादभ्यासादुत्तरस्याश्नोतेरङ्गस्य नुडागमो भवति।

चि, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अचोञ्णिति वृद्धिः स्यादायादेश इडागमः ।।
थत्द्वये णत्यणित्पक्षे सार्वधात्वादिना गुणः ।
अयादेशश्च पित्स्च स्थानिवद्द्विर्वचोऽत्रतु ।।
न भवेत् स्थानिवद्भावो ह्रस्वस्तु स्यादनिट् थलि ।।
पुनः कित्सु यणादेश एरनेकाच आदिना ।
सर्वत्राथ विभाषा चेर्विभाषेटश्च वै द्वमि ।।
चिकाय च चिचायाथ चिक्ये चिच्येऽर्थमर्जुनः ।। इति ।।

उत्तमणलि 'णलुत्तमो वे' ति वा णित्कार्यम् तत्र णित्पक्षे प्रथमणलि च 'अचो ञ्णिती' ति वृद्धिः चै अः आयादेशः चाय् अ चिथेत्यत्र क्रादिनियमादिटि च 'अचस्तास्वदि' तीट्प्रतिषेधे च प्राप्ते भारद्वाजनियमादिड्विकल्पता वमसेध्वं वहिमहीत्येतेषां षण्णां नित्यमिट् चिइथ, चिथ चिअ इत्येतेषां त्रयाणां 'सार्वधातुके' तिगुणः चेथेत्यादि सेट् थलि णत्यणिति च अय् चय् इथ चय् अ अनिट् थलं वर्जयित्वा त्रिषु पित्सु स्थानिवत्वाद् द्विर्वचनम् चि चीत्यादि कृते द्विर्वचन आदेश एव चिचाय चिचय चि चयिथ अनिट् थलि कित्सु पञ्चदशसु च द्विर्वचनमेव चैचेथ चिचि अतुसित्यादि चेचेथेत्यत्र'ह्रस्व' इत्यभायसाचो ह्रस्वत्वम् चिचेथ कित्सु पञ्चदशसु 'एरनेकाचोऽसंयोग पूर्वस्ये' ति यण् चिचय् अतुसित्यादि

सर्वत्र 'विभाषा चे' रित्याभ्यासात् परस्थ चकारस्य वा कुत्वम् कित्सु पञ्चदशसु 'अनचिचे' ति चकारकारयोर्द्वित्वम् ध्वसि 'विभाषेट' इति वामूर्धन्यः चिकायचिक्यतुः चिक्युः चिकयिथ चिकेथ चिक्यथुः चिक्य चिकायचिकयचिक्यतुः चक्युः चिकयिथ चिकेथ चिक्यथुः चिक्य चिकायचिकयचिक्यिव चिक्यिम चिक्ये चिक्याते चिक्यिरे चिक्यिषे चिक्याथे चिक्यिद्वे चिक्यध्वे चिक्ये चिक्यिवहे चिक्यिमहे चिचाय चिच्यतुः चिच्युरित्यादि चिच्ये चिच्याते चिच्यिर इत्यादि 'विभाषा चे' । ७-३-५५ सन्लिटोरभ्यासादुत्तरस्य चिनोतेऽगस्य्वभाषा कवर्गः ।

तुद्, गुणः पित्सु पुगन्तादिर्वलादीनामिडागमः ।
स्थानिवत्त्वाद् द्विर्वचनं हलादिः शेष एव च ।।
कित्सु न स्थानिवद्भावस्तुतोद रिपुमर्जुनः ।। इति ।।

पित्सु त्रिषु युगन्तेति गुणः तोद् अ तोद् थ पुनः थवम इत्येतेषां त्रयाणा मार्धधतुकस्ये तीटागमः पित्सु त्रिषु सथानिवत्वाद् द्विर्वचनम् तुद् तुद् अ तुद् तुद् इथ कृते द्विर्वचन आदेश एव तुद अ तुद् तोद् इथ कित्सु षट्सु द्विर्वचनमेव तुद् तुद् अतुसित्यादि सर्वत्र हलादिः शेषः तुतोद तुतुदतुः तुतुदुः तुतोदिथ तुतुदथुः तुतुद तुतोद तुतुदिव तुतुदिम ।।

मृ, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अचो ञ्णितीति वृद्धिः स्यादणित्पक्षे च थल्यपि ।।
गुणः स्यात् सार्वधात्वादिर्वमयोः स्यादिडागमः ।
कित्स्विको यणचीति स्यात् स्थानिवद्विर्वचो ह्युरत् ।।
हलादिः शेषोऽत्र थलि स्थानिवत्वमुरच्च न ।
अचो रहाभ्यां खरि च ममाराजौ दशाननः ।। इति ।।

उत्तमणलि वा णित्कार्यम् तत्र णित्पक्षे प्रथमणलि च ञ्णितीति वृद्धिः मार अ उत्तममणल्यणणिति थलि च सार्वधातुके ति गुणः मर्अमरथ वसयो रार्धधातुकस्ये

तीट् मृ इव मृइम कित्सु षट्सु इको यणचीति यण् मर् अतुसित्यादि थलं विना सर्वत्र स्थानिवत्वाद् द्विर्वचनम् मृमृअ इत्यादि कृते द्विर्वचन आदेशं एव मृमार अ मृमर् अतुसित्यादि ममर् थेत्पत्र द्विर्वचनमेव मर् मर् थ थलं विना सर्वत्र उरदि ७-४-६६ यभ्यासर्कारस्याकरो रपरः मर् मार, मर् मर् अतुसित्यादि सर्वत्र हलादिः शेषः ममार ममर् अतुसित्यादि कित्सु अनचि चे ति मकारस्य द्वित्वम् मम् मर् अतुस् ममर् थेत्पत्र अचो रहाभ्या मिति थस्य द्वित्वम् ममर् थ् थ, खरि चे ति पूर्वथकारस्य चर्त्वं तकारः ममर् तथ ममार मम्रतुः मम्रुः ममर्थ मम्रथुः मम्र, ममार ममर मम्रिव मम्रिम ।

मुच्, पुगन्तादिगुणः पित्सु वलादीनामिडागमः ।
द्विर्वचः स्थानिवद्भावः पित्स्वेव न तु कित्सु सः ।।
सर्वत्रापि हलादिः शेषो मुमोच च रुरोध च ।
युयोज च भुजेस्तु स्यादभ्यासे चर् बुभोज च ।। इति ।।

'मुच्' अ 'रुध्' अ 'युज्' अ 'भुज्' अ इत्येषां चतुर्णामेकपकार एव प्रक्रियाक्रमः भुजेस्तु 'अभ्यासे चर्चे'ति जश्त्वं चकार्यम् चतुर्णां पित्सु त्रिषु 'पुगन्ते' तिगुणः मोच् अ मोच् थ पुनः थवमसेध्वं वहिं महीत्येतेषां सप्ताना'मार्धधातुकस्ये' तीट् मोच् अ मोच् इथेत्यनयोः स्यानिवत्वाद् द्विर्वचनम् मुच् मुच् अ मुच् मुच् इथ कृते द्विर्वचन आदेश एव मुच् मोच् अ मुच् मोच् इथ कित्सु पञ्चदशसु द्विर्वचनमेव, मुच् मुच् अतुसित्यादि सर्वत्र 'हलादिः शेषः' भुभोजेत्यादिषु 'अभ्यासे चर्चे' ति जश्त्वं च, मुमोच मुसुचतुः मुमुचुः मुमोचिथ मुमुचथुः मुमुच ममोच मुमुचिव मुमुचिम । मुमुचाते मुमुचिरे मुमुचिरे मुमुचिषे मुमुचाथे मुमुचिष्वे मुमुचे मुमुचिवहे मुमुचिमहे।

बुभोज बुभुजतुः बुभुजुः बुभुजे बुभुजाते बुभुजिरे ।
युयोज युयुजतुः युयुजुः युयुजे युयुजाते युयुजिर इत्यादि ।।

तनु, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अत इत्यादिना वृद्धिर्वलादीनामिडागमः ।।
द्विर्वचः स्थानिवद्भावो वृद्धावेवाथ सर्वतः ।
हलादिः शेषोऽथ कित्सु त्वत एकहलादि च ।।
पुनस्थलि च सेटीति कृष्णो मायां ततान हि ।। इति ।।

उत्तमणलि 'णलुत्तमो वे' ति णित्कार्यं वा भवति तत्र णित्पक्षे प्रथमणलि च तन् अ इति स्थिते 'अत उपधाया' इति वृद्धिः तान् अ थवमेत्येतेषां त्रयाणा'मार्धधातुकस्ये' तीट् तान् अ इत्यत्र स्थानिवत्वाद्विर्वचनम् तन् तन् अ कृते द्विर्वचन आदेश एव तन् तान् अ वृद्धेरन्यत्र सर्वत्र द्विर्वचनमेवः तन् तन् अतुसित्यादि सर्वत्र 'हलादिः शेषः' ततान, ततन् अतुसित्यादि, कित्सु षट्सु अत एके हलम् ध्येनादेशः तदनाकारस्यैत्वं अभ्यासलोप तेन ततन तेनतुः तेनुः तेनिथ तेनथुः तेन ततान ततन तेनिव तेनिम,

मन् मेने मेनात इत्यादौ प्राग्वलादेरिडागमः ।
लिटि धातोर्हलादिः शेषोऽत एकहलादि च ।। इति ।।

सेध्वं वहि महीत्येतेषां चतुर्णं 'आर्धधातुकस्ये' तीट् सर्वत्र द्विर्वचनम्, मन मन् ए इत्यादि सर्वत्र 'हलदिः शेषः' ममन् ए सर्वत्र हलदिः शेषः ममन् ए सर्वत्र 'अत एके' त्यादि मैत्वाभ्यासलोपौ मेने मेनाते मेनिर इत्यादि,

कृ, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अचो ञ्णितीति वृद्धिः स्यादाकारो रपरो हि सः ।।
थलि णत्यप्यणित्पक्षे सार्वधात्वादिना गुणः ।
कित्यजादिषु सर्वत्र स्यादिको यणचीति यण् ।।
द्विर्वचः स्थानिवद्भावस्त्वजादावेव नो हलि ।
उरद्धलादिः शेषश्च कुहोश्चुश्चापि सर्वतः ।।

थलि तूरच्च न भेद भवेद्दित्वं खरीति चर् ।
यथायोगं चानचि चेतीणः षीध्वं चकार सः ।। इति ।।

उत्तमणलि णित्कार्यं वा भवति तत्र णित्पक्षे प्रथमणलिच 'अचोञ्णिती'ति वृद्धिः, कार् अ थल्युत्तमणल्यणिति च 'सार्वधातुके' ति गुणः कर् थ, कर् अ कित्यजादिषु नवसु 'इको यणची' ति यण् कार अतुसित्यादि पुनरजादिषु सर्वत्र स्थानिवत्वाद् द्विर्वचनम् । कृ कृ अ इत्यादि कृते द्विर्वचन आदेश एव कृकार् अ कृकर् अतुसित्यादि हलादिषु सप्तसु परेषु द्विर्वचनमेव कर् कर् थ कृ कृ वेतादि थलं विना सर्वत्र 'उरदि' ति ककार ऋकारस्याकारो रपरः । कर् कार् अ इत्यादि, सर्वत्र हलादिः शेषः ककारेत्यादि सर्वत्र 'कुहोश्चु' रित्यभ्याससकारस्य चकार चकारेत्यादि । थलि चकर् थ इति स्थिते 'अचो रहाभ्या मिति थस्य द्वित्वम् चकर् थ् थ, 'खरिचे' ति पूर्वयस्य चर्त्वं चकार्त्थ, यथायोगं 'अनचिचेति' ककारस्य द्वित्वम् ध्वमि 'इणः षीध्व' ५-३-७५ मित्यादिना धकारस मूर्धन्यः चकार चक्रतुः चक्रुः चकर्त्थ चक्रथुः चक्र चकार चकर चकृव चकृम ।। चक्रे चक्राते चक्रिरे चक्रिरे चक्रिषे चक्राथे चक्रिद्वे चक्रे चकृवहे चकृमहे ।।

कृ, सम्पूर्वस्य करोतेश्च प्रक्रियाथ प्रदर्श्यते ।
णलुत्तमो वात्र णिर्तति प्रथमे णलि च द्वयोः ।।
अचो ञ्णितीति वृद्धिः स्यात् पुनर्द्विर्वचनादयः ।
द्विर्वचः स्थानिवद्भावो वृद्धावेवाथ सर्वतः ।।
उरद्धलादिः शेषश्च कुहोश्चुस्य पुरोक्तवत् ।
संम्पर्युपेभ्य इत्यादिना कात्पूर्वः सुडागमः ।।
इडागमः ससुट्कस्य कृञो वक्तव्यः सूत्रतः ।
नश्चापदेत्यनुस्वारः पुनः परसवर्णता ।।
वृद्धेरन्यत्र सर्वत्र गुण स्यादत आदिना ।
विभाषेटो ध्वमि तदा सञ्चस्कारादयः क्रमात् ।। इति ।।

संकृ अ इत्यादिषु उत्तमणलि 'णलुत्तमोवेति णित्कार्यं वा भवति तत्र णित्पक्षे प्रथमणलि च 'अचो ञ्णिती ति वृद्धिः संकार् अ इत्यादि, सर्वत्र 'हलादिः शेषः संस्कार् अ इत्यादि सर्वत्र 'कुहोश्चु रित्यभ्यासस्य ककारस्य चकारः संचकार् अइत्यादि सम्पर्युपेभ्यः 'करोतौ भूषणे ६-१-१३६ इति कात्पूर्वः सुट् अनुबन्धलोपः संचस्कार् अ, इत्यादि अत्र क्रादिनियमे कृञोऽसुट इति वक्तव्य मिति वचनात् ससुट्कस्य कृञ् इडागमो भवति । ऋतो भाद्वाजस्यैतदप्यसुट एवेष्यते ।। इति ।।

'आर्धधातुकस्येड्वलादे इति वलादेरिटागमः चस्कर् इथेत्यादि सर्वत्र मकारस्यानुस्वारपरसवर्णौ, वृद्धेरन्यत्र सर्वत्र सञ्चस्क अतुसित्यादिषु 'ऋतश्च संयोगादेर्गुण ७-४-१० इति गुणः सञ्चस्कर् अतुसित्यादि, क्ङिति चे ति गुणप्रतिषेधोऽत्र वाध्यते अणित्सु सर्वत्र सञ्चस्करिति प्रकृतिः णिति तु पूर्वविप्रतिषेधेन वृद्धिरेवेष्यते तेन णितिसञ्चस्कारिति प्रकृतिः ध्वमि 'विभाषेट इति वा मूर्धन्यः सञ्चस्कार सञ्चकरतुः सञ्चस्करुरित्यादि सञ्चस्करे सञ्चस्कराते सञ्चस्करितरे सञअचस्करिषे सञ्चस्कराथे सञ्चस्करिद्वे सञ्चस्करिध्वे इत्यादेश 'ऋतश्च संयोगादेर्गुणः ७-४-१० ऋकारान्तस्य संयोगदेरगुणो भवति लिटि परतः प्रतिषेधविषयेऽस्यारम्भः । संयोगादेर्गुण विधाने संयोगोपधग्रहणं कर्त्तव्यम् कृञ्चर्थम् तन्मध्यपतितस्तद्ग्रहणेन मृह्यते ।।

क्री, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अचो ञ्णितीति वृद्धिः स्यादायादेश इडागमः ।।
थत्द्वये णत्यणित्पक्षे सार्वधात्वादिना गुणः ।
अयादेशस्च कित्सु स्यादचि श्न्वित्यादिना त्वियङ् ।।
स्थानिवत्वाद् द्विर्वचनं हलादिशेष इत्यपि ।
ह्रस्वः कुहोश्चुर्द्वित्वं च सूत्रेणानाचिचेति तत् ।।
अनिट् थलि त्वयादेशः स्थानिवत्वं च नो भवेत् ।
स्वर्णं दत्व वणिग्वासश्चिक्राय बुधवासरे ।। इति ।।

उत्तमणालि णित्कार्यं वा भवति तत्र णित्पक्षे प्रथमणलि च 'अचो ञ्णिती ति वृद्धिः क्रै अ आय् क्राय् अ, आय् अ क्रिथेत्यत्र 'क्रादिनियमा' दिटि च 'अच स्तास्व प्रतिषेध प्राप्ते भारद्वाज नियमादिड्विकल्पः वमयोरार्धधातुकस्ये तीट् क्री इथ क्रीथ क्रीय इत्ये त्रिषु 'सार्वधातुके ति गुणः के इथ क्रे इथ क्रेअ सेट् थत्युत्तम णल्युणिति च अय क्रय् इथ कय् अ कित्सु षट्सु अचिश्नुधात्वित्यादि क्रिय् अतुसित्यादि अनिट् थलोऽन्यत्र सर्वत्र स्थानिवत्वद् द्विर्वचनम् क्रीक्री अ इत्यादि कृते द्विर्वचने पुनरादेश एववतिष्टते क्रीक्राय् अ क्री क्रिय् अतुसित्यादि क्रीक्रयिथ क्री क्रयिथ क्रीक्कय, अनिट् थलि क्रे थेति स्थिते द्विर्वचनम् क्रेक्रे थ पुनः सर्वत्र हलादिः शेषः कीक्राय की क्रिय अतुस् अनिट् थलि क्रेक्रेथ पुनः सर्वत्र ह्रस्वः किक्रायेत्यादि सर्वत्र कुहोश्चु रित्याससकारस्य चकारः अनचिचेति ककारस्य द्वित्वम् चिक्राय चिक्रियतुः चिक्रियुः चिकयिथ चिक्रेथ चिक्रियथुः चिक्रिय चिक्राय चिग्क्रयचिक्रयिव चिक्रयिम ।

वृ, इको यणच्यजादौ स्यात् क्रादित्वादिण्न सम्भवेत् ।
द्विर्वचः स्थानिवद्भावस्त्वजादावेव नो हलि ।।
सर्वत्र रपरस्तूरद्धलादिः शेष इत्यपि ।
इणः षीध्वं ध्वमि तदा वव्रे वव्रात इत्यपि ।। इति ।।

वृ ए इत्यादिष्वजादिषु विभक्तिषु परत इको यणची ति यण् । व् र् ए इत्यादि पुनरजादिष्वेव स्थानिवत्वाद् द्विर्वचनम् वृ वृ ए । कृते द्विर्वचन आदेश एव नृ व् र् ए इत्यादि हलादिषु विभक्तिषु परतो द्विर्वचनमेव वृ वृ त्सेत्यादि, सर्वत्राभ्यासस्योरत् वर् वरए वर् वृसे, सर्वत्र हलादिः शेषः व व् व् र् ए, ध्वमि इणः षीध्व मिति मूर्धन्यः वव्रे वव्राते वव्रिषे वव्राथे वव्रिढ्वे वव्र इत्यादि ।।

ग्रह्, णलुत्तमो वात्र णिति प्रथमे णलि च द्वयोः ।
अत इत्यादिना वृद्धिर्वलादीनामिडागमः ।।
कित्सु ग्रहिज्यावयीति प्रसारः सम्प्रसारणात् ।
द्विर्वचः स्थानिवद्भावो वृद्धावेवाथ पित्स्विह ।।

लिट्यभ्यासस्योभयेषां पूर्वरूपं प्रसारणात् ।
सर्वत्र रपरस्तूरद्धलादि शेष इत्यापि ।।
कुहोश्चुश्च विभाषेट पित्सु त्वनाचिचेति च ।
शुभे मुहूर्त्ते रुग्मिण्याः पाणिं जग्राह माधवः ।। इति ।।

ग्रह् अ इत्यादिषूत्तमणलि णलुत्तमो वे ति णित्कार्यं वा, तत्र णित्पक्षे प्रथमणलिच अत इत्युपधाय वृद्धिः ग्राह अ थवमसेध्वं वरि महीत्येषां सप्तानां आर्धधातुकस्ये कित्सु पञ्चदशसु ग्रिहिज्यावयीत्यादिना सम्प्रसारण् गृ अह् अतुसित्यादि पूर्वरूपत्वम् । गृह अतुसित्यादि ग्राह् अ इत्यत्र लिटि धातो रिति द्विर्वचनमेव गृह् गृह् अतुस् इथ ग्रह् ग्रह् अ अध पित्सु लिट्यभ्यासस्योभयेषा मिति हलादिशेष बाधित्वाभ्यासस्य सम्प्रसारणम् गृ अह् ग्रह् गृ अह् ग्रह् ग्रहिथ पूर्वरूपत्वम् गृह् ग्राह् गृह्ग्रह् मृह्ग्रहिथ सर्वत्र उरदि ति गकार ऋकारस्याकारो रपरः गरह ग्राहेत्यादि सर्वत्र हलादिः शेपः गग्रहेत्यादि कुहोश्चु रित्याभ्यासगकारस्य जकारः ध्वमि वामूर्धन्यः पित्सु अनचि चे ति गकारस्य द्वित्वम् जग्राह जगृहतुः जगृहुः जग्रहिथ जगृहथुः जगृह जग्राह जग्रह जगृहिव जगृहिम, जगृहे जगृहाते

चुर्, सनादिधातुसंज्ञान्तं सार्वधातुकवल्लिटि ।
पुनर्लिटि कृते धातोर्णिचिश्चोपरि पूर्ववत् ।।
आम्प्रत्ययो भवेत् कास्प्रत्ययादामेति सूत्रतः ।
आम् इत्यथलेर्लुक् स्यादयामेत्यादिना तु णेः ।।
अयादेशः कृतेष्वेषु चोरयामिति सिध्यति ।
एवमेव हि पाल्यर्च्योस्तयोर्न गुणसम्भवः ।।
आमः कृत्वात् सुबुत्पत्तिरव्ययत्वात् सुपोऽत्र लुक् ।
आम्प्रत्ययस्याथ पश्चात् कार्यः स्यात् परतो लिटि ।।
लिट्परस्य कृञोऽनुप्रयोगः कृञ्चेति सूत्रतः ।
आम्प्रत्ययवदित्यादिना कृञस्तूभयं पदम् ।।
पुनरुक्तप्रकारेण चकारेत्यादयः क्रमात् ।। इति ।।

चुर्, 'सत्त्यापपाश' त्यादिना स्वार्थे णिच् अनुबन्धलोपः चुर् इ चुरि 'पुगन्ते' ति गुणः चोरि ल् कास्प्रत्ययादाममन्त्रे लिटीत्याम् चोरि आं ल् 'आम' इति लेर्लुक् चोरि आम् 'अयामन्तात्वाप्येल्विष्णुषु ६-४-५५ इति णेरयादेशः 'पुगन्ते' ति गुण इत्येव विशेषः आमः कृत्त्वात् तदन्तस्य 'कृत्तद्धित' त्यादिना प्रातिपदिकसंज्ञायां सुप् चोरयां सु, पालयां सु, अर्चयांसु आमः स्वरादिषु पाठादव्ययादाप्सुपो लुक् चोरयां पालयां अर्चयाम् कृभ्वस्तीनामनुप्रयोगे कार्ये एवं चोरयामित्यादयः पदैकदेशा आनेतव्याः चोरयामिति स्थिते 'कृञ्चानुप्रयुज्यते लिटि' त्याम्प्रत्ययस्य पश्चाल्लिटि परतो लिट् परस्य कृञोऽनुप्रयोगः कृञिति प्रत्याहारग्रहणम्, तेन कृभ्वस्तयो गृत्ह्यन्ते चोरयां कृल् 'आम्प्रत्ययवदि' ति नियमात् पूर्ववदित्यनुवृत्तेः कृञः कृ इत्यस्योभयपदित्वम् चोरयां कृल् लस्य तिबादयः । तेषां णलादयश्च । चोरयां कृ इत्यादि चोरयां कृ ए इत्यादि च । शेषं पूर्ववत् 'कास्प्रत्ययादाममन्त्रलिटि' ३-१-३५ कासृ शब्दकुत्सायम् ततश्च प्रत्ययान्तेभ्यो धातुभ्य आम्प्रत्ययो भवति लिटिपरतोऽमन्त्र विषये अकारो मकारपरित्राणार्थः शकन्ध्वादिषु पररूपं वक्तव्यम् । कास्यनेकाच इति वक्तव्यम् चुलुम्पाद्यर्थम् शेषः चुलुम्पाञ्चकार चकासञ्चकार दरिद्राञ्चकार । चुलुम्पतेर्धातुष्वपरिपठितस्यापि कात्यायनवचनप्रामाण्याद् धात्वुत्वं वेदितव्यम् ।।

आमोऽमित्वमदन्तत्वादगुणत्वं विदेस्तथा,
आस्कासोराम्विधानाच्च पररूपं कतन्तवत् ।। इति ।।

'अयामन्तात्वाय्येन्विष्णुषु' ६-४-५५ आम् अन्त आलु इ अ इष्णु इत्येतेषु परतो ऩेरयादेशो भवति । नेति वक्तव्ये अयादेशवचनमुत्तरार्थम् ।। चोरयाञ्चकार चोरयाञ्चक्रतुः चोरयाञ्चक्रे चोरयाञ्चक्राते इत्यादि । चोरयाम्बभूव चोयम्बभूवतुरित्यादि, चोरयामास चोरयामासतुः चोरयामासुरित्यादि ।

पालयाञ्चकार पालयाञ्चक्रतु रित्यादि पाल पाञ्चक्रे पालयाञ्चक्राते इत्यादि पालयाम्बभूव पालयाम्बभूवतुः त्यादि पालयामाम पालयामासतुः रित्यादि।

अर्चयाञ्चकार अर्चयाञ्चक्रतु रित्यादि अर्चपाञ्चके अर्चयाञ्चक्राते इत्यादि अर्चयाम्बभूव अर्चयाम्बभूवतुः रित्यादि । अर्चयामास अर्चयामासतु रित्यादि । इति लिट् प्रक्रिया ।।

अथ लुङ् प्रक्रिया ।

अभूत् अभूतां अभूवम् 'लुङ् '३-२-११० भूतेऽर्थे वर्त्तमानाद् धातोर्लुङ्प्रत्ययो भवति स्मोत्तरपदे लङ् च -३-१७५ । स्मशब्दोत्तरे माङ्चुपपदे धातोलुङ्प्रत्ययो भवति चकाराल्लङ् च । 'च्लि लुङि' ३-१-४३ । धातोश्च्लिप्रत्ययो भवति लुङि परतः 'आर्धधातुकं शेषः' ३-४-११८ तिङः शितश्च वर्जयित्वा योऽन्यो धातुविहितः प्रत्ययः सशेषः सआर्धधातुकसंज्ञो भवति 'च्लेः सिच् '३-१-१-४४। च्ले सिजादेशो भवति । 'गातिस्थाघुपाभूभ्यः परस्मैपदेषु सिचः' २-४-७७ गति स्थाघुपापू इत्येतेभ्यः परस्य सिचो लुक् परस्मैपदेषु परतः गापाग्रहणं नामेण्पिबत्योर्ग्रहणार्थम् । 'भूसुवोस्तिङि', ७-३-५५ भू भू इत्येतयोस्तिङि सार्वधातुके परेगुणो न भवति । एधिष्ट एधिषातां ऐधिष्ठाः ऐधिषाथां ऐधिध्वम् । ऐधिषि ऐधिष्हि ऐधिष्महि । 'धि च' ५-२-२५ धकारादौ प्रत्यये परतः सकारस्य लोपो भवति माभवान् विमना भूत् मास्म स ऐधिष्ट 'न माङ्योगे' ६-४-७४ । लुङ्लङ्लृङ्क्षु यदुक्तं न माङ्यो मे न भवति अपाक्षीत् अपाक्तां अपाक्षुः अपक्त अपक्षातां अपक्षत 'वदव्रजहलन्तस्याच' ७-२-३ । वदव्रज्योर्हलन्तानां चाङ्गानामचः स्थाने वृद्धिर्सवति परस्मैपदे सिचि परत 'अतो हलादेर्लघो' रिति विकल्पबाधनार्थं वदव्रज्योर्ग्रहणम् 'अस्तिसिचोऽपृक्ते' ७-३-९६ अस्तोरङ्गात् सिजन्ताच्चोत्तरस्यापृक्तप्रत्ययस्य सार्वधातुकस्येडागमो भवति 'झलो झलि' ५-२-२६ झल उत्तरस्य सकारस्य लोपो भवति झलि परतः 'सिजभ्यस्तविदिभ्यश्च' ३०८-१०९ सिचोऽभ्यस्तसंज्ञकेभ्यो वेत्तेश्चोतरस्य ङिल्लकारसंबन्धिनो झेर्जुसादेशो भवति ।

लुङि तावत् प्रवक्ष्यामि रूपानयनपद्धतिम् ।
लुङित्यनेन धातोर्लुङ् लस्य स्थाने तिबादयः ।।
मध्ये धातु विभक्त्योश्च्लि प्रत्ययाश्च्लि लुङीति सः ।
लुङादीनां चतुर्णांतु च्लि तास्यादौ कृते सति ।।
स्यादार्धधातुकं शेष इति संज्ञा पुनर्भवेत् ।
प्रायशश्च्लेः सिजादेशः च्लेः सिजित्यमुना हि सः ।। इति ।।

'लुङि' ति धातोर्लुङ्प्रत्ययः अनुबन्धलोपः लस्य तिबादयः तेषामनुबन्धलोपः 'च्लिलुङी' ति धातोः परत्वेन च्लिप्रत्ययः 'आर्धधातुकं शेष' इत्यार्धधातुक संज्ञा पुनर्यत्र च्लेरङादेशः चङादेशो वा ततोऽन्यत्र सर्वत्र 'च्लेः सिजि' ति च्लेः सिच् अनुबन्धलोपः एतत् सर्वं लुङि सर्वत्र कार्यम्,

घसेर्मुचेश्र च्लेरङ् स्यात् षुषादिद्युतसूत्रतः ।
वचेरस्यतिसूत्रेण च्लेरङादेश इष्यते ।।
रुधेर्युजेश्च वा च्लेरङिरितो वेति सूत्रतः ।
च्लेश्चङेव चुरादीनां णिश्रिद्रुभ्य इतीह सः ।।
अङ्चङौ यत्र न स्यातां च्लेः सिजत्रेति दृश्यताम् ।। इति ।।

षुषादिद्युतादिद्लृदितः परस्मैपदेषु पुषादिभ्यो द्युतादिभ्यो लृदिद्भ्यश्चोत्तरस्य च्लेरङादेशो भवति परस्मैपदेषु परतः, ङकार 'ऋदृशोऽङि गुण' इति विशेषणार्थः 'अस्यति वक्तिख्यातिभ्योऽङ्' ३-१-४२ असु क्षेपणे वच परिभाषणे ब्रूञादेशो वा ख्याप्रकथने, चक्षिङादेशो वा इत्येतेभ्यः च्लेरङादेशो भवति कर्त्तृवाचिनि लुङि परतः । 'इरितो वा' ३-१-५७ इरितो धातोः परस्य च्लेर्वाङादेशो भवति परस्मैपदे परतः 'णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्' ण्यन्तेभ्यो धातुभ्यः परस्य च्लेश्चङादेशो भवति, कर्तृवाचिनि लुङि परतः

धातुः सेट् चेद्यथान्यायं पुनः सिच इडागमः ।
एषः सार्वत्रिको न्यायः इड्विभागस्तथोच्यते ।। इति ।।

एधतिध्वंसतिमनिशीङ् नदिग्रहिदिविस्तनिः ।
एतेष्टौ लुङि सेटः स्युरार्धधात्वादिनेड्विधिः ।।
स्तुसुधूञ्भ्यः षुञो नित्यं व्येञो यमरमादिना ।
दशैते धतवो नित्यं लुङि सेटो यथाविधि ।।
स्वरतीत्यादिनाश्नोतेर्लुङि षूङश्च वेड्विधिः ।
वृङस्तु लिङ्सिचोरात्मनेपदेष्विति वेड्विधिः ।।
एते त्रयो विभाषेटो लुङि सेटस्त्रयोदश ।
त्रयस्त्रिंशति धातूनां विंशतिस्त्वपरेऽनिटः ।। इति ।।

एध वृद्धौ ध्वन्सु गतौ च मनु अवबोधने शीङ् स्वप्ने टुणदि समृद्धौ ग्रह उपादाने दिवु क्रीडा गतिषु तनु विस्तारे इत्येतेष्टौ लुङि सेटः एषामष्टाना'मार्धधातुकस्ये'तीट् षुञभिषव इत्यस्य न''स्तुसुधूञ्भ्यः परस्मपैदेष्वि'तीट् व्येञ् संवरण इत्यस्य 'यमरमनमातां सक् चे' ६-२-७३ ति धातो सकागमे इडागमश्च इत्येते दश धातवो लुङि नित्यं सेटः। अशूव्याप्तौ षूङ् प्राणिप्रसव इत्यनयोः 'स्वरतिसूती त्यादिना विभाषेट् वृङ् सम्भक्तावित्यस्य 'लिङ्सिचोरात्मनेपदेष्वि' ति वेट् एते त्रयो वेटः तस्माल्लुङि त्रयोदश धातवो भवन्ति सेटः धातूनां त्रयस्त्रिंशतिभ्योऽन्ये विंशतिरनिटः इति लुङि 'स्तुसुधूञ्भ्यः परस्मैपदेषु '७-२-७२ एतेभ्यः परस्य सिच इट् ,परस्मैपदेषु परतः । 'यमरमनमातां सक्च' ७-२-७३ यमरमनमेत्येतेषामाकारान्तानां च सगागमो भवति परस्मैपदपरे सिचिपरतः चकारात् सिच इडागमः ।

पचिर्नदिर्व्येञ् हुदिहुवो नहिः षुञ्चिञ् तुदिर्भुजिः ।
तनिः कृञ् क्रीङ् ग्रहिश्चैव धातवः स्युञ्चतुर्दश ।।
अङ्भावे रुधश्चापि युजिश्चापि क्रमादिति ।
धातुभ्यः षोडशेभ्यस्तित्सिपोरीडागमो भवेत् ।। इति ।।

डुपचष् पाके, डुणदिसमृद्धौ, व्येञ् संवरणे ,हुदानादानयोः, दिवु क्रीडाविजिगीषागतिषु ,णह बन्धने षुञ् अभिषवे, चिञ् चयने ,तुदव्यथने ,भुज पालनाभ्यवहारयोः, तनु विस्तारे ,डुकृञ् करणे ,डुक्रीञ् द्रव्यविनिमये । ग्रह उपादान इति चतुर्दश रुधिर् आवरणे ,युजिर् योग इत्यनयोरङभाव इति धातुभ्यः षोडशेभ्यः परयोस्तिप्सिपोरस्तिसिचोऽपृक्त इतीट् भवति,

इटः परस्यलोपः स्यात् सिच ईटि परे सति ।
झर्परस्य सिचो लोपो भवेज्झलि परे सति ।।
धि चेति ध्वमि सिज्लोषो द्वित्वजश्त्वे च तत्र तु ।। इति ।।
इटईटि ५-२-२५, इट उत्तरस्य सिचो लोपो भवति ईटि परतः ।।
भू, भूवः परस्मै गातिस्थेत्यादिना लुक् सिचो भवेत् ।
झोऽन्तश्च तत्राप्यमि च भुवो वुग् लुङ्लिटोरिति ।।
भुवो वुगागमः पश्चादितश्च त्रिष्विलोपता ।
पुनरन्तेस्तकारस्य संयोगान्तस्य लोपता ।।
अयोध्यायामभूद्राजा श्रीमान् दशरथात्मजः ।। इति ।।

भू । 'लुङि'ति लुङ्प्रत्ययः अनुबन्धलोपः भूल् लस्य तिबादयः तस्तस्थमिपां क्रमेण तान्तन्तामः 'च्लि लुङी' ति च्लिप्रत्ययः । भू च्लि ति भूच्लि तामित्यादि 'आर्धधातुकं शेष' इत्यार्धधातुकसंज्ञा 'च्लेः सिजि'ति च्लेः सिच् अनुबन्धलोपः भूसति भूस् तामित्यादिषु नवसु 'गाति स्थाघुपाभूभ्य सिचःपरस्मैपदेष्वि'ति भू इत्येतस्यात् परस्य सिचोलुक् । भूति भूतामित्यादि, झेरन्तादेशः भू अन्ति भूअमित्यनयोः 'भुवोवुग् लुङ्लिटो' रिति भूवो वुक् उकार उच्चारणार्थः । ककारो देशविध्यर्थः । भूव् अन्ति भूव् अं ,भूति भूवन्ति भूसीत्येतेषां त्रयाणां 'इतश्चे'तीकारलोपः भूत् भूवन्त भूस् 'नित्यं ङित' इति वस्मसोः सलोपः अभूवन्त् इत्यत्र 'संयोगान्तस्ये' ति तकारलोपः लुङ्लदित्यादिनाङ्गानामट् अभूवन्त् इत्यत्र 'संयोगान्तस्य'ति तकारलोपः अभूत् अभूतां अभूवन् इत्यादि

एध्, झस्यात्मनेपदेष्वत् स्यात् पुनः सिच इडागमः ।
ध्वमोऽन्यत्राथ षत्वं स्यात् तथासित्यनयोः ष्टुता ।।
ष्टुना ष्टुरित्यथैधिष्ट व्रजे वारिजलोचनः ।। इति ।।

एध, लुङ् अनुबन्धलोपः एध् ल् तङ्, एधत 'च्लि लुङी' ति धातोः च्लिप्रत्ययः एध् च्लि त आर्धधातुक मित्यार्धधातुकसंज्ञा चो सिच् अनुबन्धलोपः एध् स इत्यादिषु 'झस्य आत्मनेति' अत् इत्य एध् अत नवसु 'आर्धधातुकस्ये' तीट् एध् इस् व ध्वमि' धिचे' ति सिचोलोपः एधिध्वम् द्वितीयधस्य द्वित्वजश्चत्वे एधिध्वम् ध्वमोऽन्यत्र सर्वत्र सकारस्य 'आदेशप्रत्ययो' रिति षत्वम् तथासित्यनयोः 'ष्टुनाष्टु' रिति ष्टुत्वम् सर्वत्र 'आडजादीना' मित्यङ्गस्याट् 'आटश्च' ति वृद्धिश्च एधिष्ट एधिषातां ऐधिषतेत्यादि ।।

पच्, पचेः परस्मै वृद्धिः स्याद्वदव्रजहलादिना ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।
तान्तन्तेषु परेषु स्याज्झलो झलि सकारलुक् ।
सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेश एव च ।।
पुनः सर्वत्र चोः कुत्वं सकाराणां षक ारता ।
कस्य त्वनचि च द्वित्वं चापाक्षीन्नार्यौदनम् ।। इति ।।

तस्थस्थमिपां क्रमेण तान्तन्तामः पच् स् ति पच् स् तामित्यादिषु नवसु 'वदव्रजे' ति वृद्धिः पाच् स् तीत्यादि तिप्सिपोरिकारलोपः पाच् स् त् 'अस्तिसिचोऽपृक्त' इति तिप्सिपोरीट् पच् सीत् पाच् सीस् तान्तन्ते ति त्रिषु परतो 'झलो झली' ति सकारलोपः पाच् तामित्यादि 'सिजभ्यस्तविदिभ्यश्चे' ति झेर्जुस् जकारलोपः, पाच स् उस् सर्वत्र 'चोः कु' रितिचकारस्य ककारः पाक् सी तित्यादि षण्णां सकाराणां षत्वं स्यात् सर्वत्र 'अनचिचे' ति ककारस्य द्वित्वम् 'नित्यमि' ति वस्मसोः सलोपः अङ्गानामट् अपाक्षीत् अपाक्तां अपाक्षुरित्यादि,

पच्, झस्यात्मनेपदेष्वत् स्यात् तथासित्यनयोर्द्वयोः ।
झलो झलीति सिज्लोपः प्राग्वद् ध्वमिधिचेतिस ।।
पुनः सर्वत्र चोः कुत्वं सकाराणां षकारता ।
ध्वमोऽन्यत्र त्वनचि च ध्वमि जश्त्वमपक्त सा ।। इति ।।

पच् स् त इत्यादिषु 'झस्यात्मनेपदेष्वनत' इति पच स् अत तथासित्यनयोः परतः 'झलो झली' ति सिज्लोपः पच् त पच् थास् ध्वमि 'धि चे' ति सस्य लोपः। पच् ध्वम् सर्वत्र 'चोः कु' रिति कुत्वम् षण्णां सकारणां षत्वम् । ध्वमोऽन्यत्र 'अनचिचे' ति ककारस्य द्वित्वम् ध्वमि 'झला' मिति कस्य जकारः अङ्गानामट् अपक्त अपक्षातामित्यादि ।

नन्द्, सिजभ्यस्तेति झेर्जुस् स्यात् पुनः सिच इडागमः ।।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।
इट ईटीति सिज्लोपस्तयोरेव भवेदथ ।।
वक्तव्यादत्र सिज्लोपस्यासिद्धत्वं न सम्भवेत् ।
तस्मात् सर्णदीर्घोऽत्र सस्य षत्वं च सप्तसु ।।
त्रयाणां तु ष्टुना ष्टुत्वमनन्दीद्वायुनन्दनः ।। इति ।।

नन्द् सित्यादिषु झेः 'सिचभ्यस्ते' ति जुस् नन्द् स् उस् सर्वत्र आर्धधातुकस्ये तीट् तिप्सिपोः सकारलोपः सारलोपः 'अस्ती'त्यादिना सिच ईट् नन्दि स ईत् नन्दिस् ईस् 'इट ईटी' ति सिज्लोपः नन्दि ईत् नन्दि ईस् 'सिज्लोप एकादेशे सिद्धो वाच्यः' इति सिज्लोपस्य 'पूर्वत्रासिद्ध' मित्यसिद्धत्वाभावाद् 'अकः सवर्णे'इति सर्णदीर्घः नन्दीत् नन्दीस् तस्थस्थमिपां क्रमेण तान्तन्तामः यथायोगं षत्वष्टुत्वे वस्मसोः सस्य लोपः । चि परस्मैपदपरे हलन्तस्याङ्गस्य वृद्धिर्नभवति । दीधीवेवीटाम् दीधीवेव्योरिटश्च ये गुणवृद्धी प्राप्नुतः ते न भवतः ।।

ध्वंस्, झस्यात्मनेपदेष्वत् स्यात् पुनः सिच इडागमः ।
षत्वष्टुत्वे यथायोगमध्वंसिष्ट व्रजं हरिः ।। इति ।।

ध्वंस् स् तेत्यादिषु‘ झस्यात्’ सर्वत्र ‘आर्धधातुकस्ये’ तीट् ध्वंस् इस् त ध्वंसिस् तेत्यादि ध्वमि ‘धिचे’ ति सिज्लोपः ध्वंसिध्वम् धकारस्य द्वित्वजश्त्वे, ध्वंसिध्वम् यथायोगं षत्वष्टुत्वे अङ्गानामडागमः अध्वं सिष्ट अध्वं सिषातासित्यादि अत्र सर्वत्राडागमानन्तरं ध्स्य द्वित्वजश्च्त्वे कार्ये ।।

व्ये, एत आत्वं भवेत् व्येञः प्रत्यये विषयेऽशिति ।
धातोर्लुङ् लस्य तिङ् धातोः परश्चलिश्च्लेश्च सिच् पुनः ।।
सगागमः परस्मै स्याद् धातोः सिच इडागमः ।
एतद्वयं त्वेकसूत्रेण स्याद्यमरमादिना ।।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।
इट ईटीति सिज्लोप तिप्सिपोरेव भवेदिह ।।
सवर्णदीर्घो झेर्जुश्च सिजभ्यस्तेति सूत्रतः ।
षत्वष्टुत्वे यथायोगमव्यासीच्चन्द्रमा रविम् ।। इति ।।

व्ये, ‘आदेच’ इत्यात्वम् व्या लुङ् लस्यतिबादयः व्याति तिसिपोरिकारलोपः व्यात् च्लेः सिच् व्यास् इस् त् व्यास् इस् स् ‘अस्तिसिचोरि’ ति तिब्सिपोरीट् व्यास् ई स् ‘इट ईटी’ति सलोपः व्यास् ईईत् ,व्यास् इ ईस् सिज्लोपस्य वक्तव्यतः सिद्धत्वात् सवर्णदीर्धः । व्यासीत् व्यसीस् ‘सिजभ्यस्ते’ ति झेर्जुस् व्यास् इस् उस् व्यासिसुस् तस्थस्थमिपां क्रमेण तान्तन्तमः यथायोगं षत्वेष्टुत्वे वस्मसोः सलोपः अङ्गानामट् ‘अनचिचे’ ति वस्य द्वित्वम् अव्यासीत् अव्यासिष्टां अव्यासिष्टां अव्यासिषुरित्यादि व्यास् त ‘झस्यात्मनेपदेष्वत् स्यादव्यास्त शशिनं तमः ।। इति।।

‘आत्मनेपदेष्वनत’ इति झस्य अत् आदेशः,ध्वमि ‘धिचे’ ति सिचोलोपः धकारस्य द्वित्वजश्त्व अङ्गानामट् अव्यास्त अव्यासातामित्यादि ।

अद्, लुङ्सनोरित्यदेर्घस्लादेशो लुङि विवक्षिते ।
पश्चाल्लुङ् स्यात् तिबाद्यस्य घसेश्च्लिप्रत्ययस्ततः ।।

स्यात् पुनश्च्लेरङादेशः पुषादिद्युतसूत्रतः ।
झोऽन्तश्चातो गुणे च स्यादितश्चेकारलुक् त्रिषु ।।
संयोगान्तस्य लोपोऽन्तेरमि पूर्वः परे त्वमी ।
अतो दीर्घो यञीति स्याद्वस्मसोः परतो घस्लृ ।। इति ।।

अद्, 'लुङ्सनो' रित्यदेर्धस्लृ लृकारोऽङर्थ, घस् 'लुङि' ति धातोर्लुङ्प्रत्ययः घस् ल् लस्य तिबादय घस् तीत्यादि च्लि लुङि । घस् च्लि ति 'पुषादी' त्यादिना च्लेरङ् घस् अङ्ित ङकार 'ऋद्दशोऽङि गुण' इति विशेषणार्थ घस् अति, इत्यादि, झेरन्तादेशः।

झोऽन्तश्चातो गुणे च स्यादितश्चेकारलुक् त्रिषु ।
संयोगान्तस्य लोपोऽन्तेरमि पूर्वः परे त्वमिं ।।
वस्मसोः स्यादतो दीर्घस्त्ववोचत् स्यादवोचताम् ।। इति ।।

ब्रू, 'ब्रुवो वचि' रिति वचिरादेशः वच् 'लुङि' ति लुङ् वच् ल् लस्य तिबादयः वच् ति च्लि लुङि वच् च्लि ति 'अस्यतिवक्ति' इत्यादिनाअङ् वच् अति 'वच उमि' ७-४-२० ति वचोऽङ्गस्योमागम उमो मित्वादन्त्यादचः परोभवति मकारलोपः वउच् अति, 'आद्गुण' इति गुणः वोच् अतीत्यादि, अत्र परस्मैपदे आत्मनेपदे च वोच इति पदैकादेश एवमानेतव्य अथ परस्मैपदे वोचतीत्यादीषु झोऽन्त इति झेरन्तादेश वोच अन्ति 'अतो गुण' इति पररूपत्वम् वोचन्ति पुनः वोचति वोचन्ति वोचसीत्येषां त्रयाणां 'इतश्चे' ती कारलोपः तस्थस्थमिपां क्रमेण तामादयः । वोच अमित्यत्र 'अमिपूर्व' इति पूर्वरूपत्वम् वोचम् वस्मसो परत 'अतो दीर्घो यञी'ति दीर्घः नित्यमित्यादिना वस्मसोः सस्य लोपः अङ्गानामट् अवोचन्तेत्यत्र 'संयोगान्तस्य लोप' इति तकारस्य लोपः अवोचत् अवोचतां अवोचन् इत्यादि ।

वोचत्, आतो ङितश्च लोपो व्योराद्गुणो झोऽन्त इत्यपि ।
अतो गुणोऽतो दीर्घो यञ्यवोचत भारतीम् ।। इति ।।

वोच आतामित्यत्र 'आतो ङित' इत्याकारस्येय् इत्ययमादेशः वोच इय् ताम् । लोपो व्योर्वली ति यकारलोपः वोच इताम् 'आद्गुण' इति गुणः । वोचेताम् एवं वोचेथाम् इट्यप्याद्गुणः झस्य'झोऽन्त' इत्यन्तादेशः वोच अन्त 'अतोगुण' इति पररूपत्वम् वोचन्त वहिमह्यो'रतो दीर्घो यञी' ति दीर्घः अङ्गानामट् अवोचत अवोचेतां इत्यादि ।। 'वच उम् '७-४-२० वचोऽङ्गस्योमागमो भवति अङि परतः ।।

हु, सर्वत्रङ्गस्य वृद्धिः स्यात् सिचि वृद्धिः परेति सा ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।
सिजाभ्यस्तेति झर्जुस् स्यात् सर्वत्रापि षकारता ।
तान्तन्तानां ष्टुना ष्टुः स्यादहौषीदनले हविः ।। इति ।।

हु स् तीत्यादिषु नवसु 'सिचि वृद्धिः परस्मैपदेष्वि' त्यङ्गस्य वृद्धिः हौ स् तीत्यादि तिप्सिपो 'रितश्चे' ति लोप इकारस्य हौस् त् हौस् स् 'अस्तिसिचोपृक्ते'तीट् हौस् ई त् हौस् ईस् 'सिजभ्यस्त' ति 'झेर्जुस् 'हौस् उस् तस्थस्थमिपां क्रमेण ताङतन्तामः सिचः सकार स्ते ति झे जुस् षैस् उस् तस्यस्थमिपां क्रमेण तान्तन्तामः सिचः सकारस्य सर्वत्र 'आदेशप्रत्ययो' रिति षत्वम् तान्तन्तां 'ष्टुनाष्टु रिति ष्टुत्वम् नित्यमित्यादिना वस्मसोः सकारस्य लोपः अङ्गानामट् अहौषीत् अहौष्टां 'सिचि वृद्धिः परस्मैपदेषु '७-२-१ परस्मैपदपरे सिचि परत इगन्ताङ्गस्य वृद्धिर्भवति गुणस्यापवादः।।

हा, झस्यात्मनेपदेष्वत् स्यादहास्त सुकृती द्वित्वमृशीत ।। इति ।।

हास् तेत्यादिषु झस्य 'आत्मनेपदेष्वनत'इत्यत् ध्वमि 'धिचे' ति सि लोपः धकारस्य द्वित्वजश्त्वे अङ्गानामट् अहास्त अहासातामित्यादि ।।

धा, गातिस्थेति सिचो लुक् स्यात् तिप्सिपोरितश्च लुक् ।
आत् इत्यत्र झेर्जुस् स्यात् तत्रैव पररूपता ।।

भवेदुस्यापदान्तादित्यमि पूर्वः परे त्वमि ।
कृष्णोऽधाद् गुरवे पुत्रमाहृत्य यमसादनात् ।। इति ।।

धा स् तीत्यादिषु नवसु 'दाधाघ्वदाबि' १-१-२० ति धेत्यस्य घुसंज्ञकत्वाद् 'गातिस्थे'ति सिचो लुक् धातीत्यादि तिप्सिपोरिकारलोपः । धात् धास् आत् इति झेर्जुसादेशः जाकरलोपः धा उस् 'उस्यपदान्तादि ६-४-९६' ति पररूपत्वम् धुस् तस्थस्थमिपां क्रमेण तान्तन्तामः । धा अमित्यत्र 'अमिपूर्व' इति पूर्वरूपत्वम् 'नित्यं ङित' इति वस्मसोः सकारस्य लोपः अङ्गानामडागमः अधात् अधातां अधुरित्यादि ।' आतः' ३-४-११० आकारान्तात् सिजन्तादुत्तरस्य झेर्जुस् ।

धा, स्थाघ्वोरित्यात्मने धातोरिकारः सिज् भवेत् ।
तथासोः परयोह्रस्वादिङ्गादिति सलोपता ।।
झस्यात्मने त्वत् षत्वं चाथेणषीध्वं तादधित ।। इति ।।

धास् तेत्यादि 'स्थाघ्वोरिच्चे' १-२-१६ ति घुसंज्ञकस्य धा इत्यस्येकारादेशः सिच्च किद्भवति आत्मनेपदेषु परतः धिस् तेत्यादि, तथासित्यनयोः परयोः 'ह्रस्वादङ्गादि' ५-२-२७ ति सिचोलोपः धित धि थास् ,झस्यात्मनेपदेष्वत इति अतादेश धिस् अत , धिसत ध्वमि 'धिचे' ति सिचो लोपः धिध्वम् 'इण' इत्यादिना ध्वमो धकारस्य वा ढत्वम् दकारस्य जश्त्वे आदेशे सकारणां यथायोगं षत्वम् अङ्गानामडागमः अधित अधिषातां इत्यादि अधिढ्वम् 'स्थाघ्वोरिच्च' १-२-१६ तिष्टतेर्धातोर्घुसंज्ञकानां चोकारादेशो भवति सिच्च किद् भवत्यात्मनेपदेषु परतः 'ह्रस्वादङ्गात् '५-२-२६ ह्रस्वान्तादङ्गादुत्तरस्य सिचः सकारस्य लोपो भवति झलि परतः ।।

दिव्, पुगन्तेति गुणोऽङ्गस्य पुनः सिच इडागमः ।
इल्लोपस्तिप्सिरोपस्तिसिचे तीडागस्तयोः ।।
इट ईटीति सिज्लोपस्तयोरेव भवेदिह ।
सवर्णदीर्घो झेर्जुश्च सिजभ्यस्तेति सूत्रतः ।।
षत्वष्टुत्वे यथायोगमदेवीद् देवकीसुतः ।। इति ।।

दिव् स् तीत्यादिषु सर्वत्र 'पुगन्तलघूपधस्य चे'ति देव् स् तीत्यादि, 'आर्धधातुकस्येडि'ति सर्वत्र सिच इडागम इस् तीत्यादि तिप्सिपोरिकारलोपः देविस् स् तिप्सिपो 'रस्ती 'त्यादिनेट् देविस् ई त्, देविस् ईस्, अनये' रिट ईटी' ति सिचोलोपः देवि ई त् देवि ईस् सर्णदीर्धः । देवीत् देवीस् 'सिचभ्यस्ते' ति झेर्जुस् देविस् उस् देविसुस् तस्थस्थामिपां क्रमेण तान्तन्तामः यथायोगं षत्वष्टुत्वे वस्मसोः सकारस्य लोपः अट् अदेवीत् अदेविष्टां अदेविषुरित्यादि ।

सू, स्वरतीत्यादिना वेट् स्यात् सर्वधात्वादिना गुणः ।
अवादेशश्च झस्यात् स्यादात्मनेपदे .... ।।
विभाषेटो यथायोगगं षत्वष्टुत्वेऽसविष्ट सा ।। इति ।।

सू स तेत्यादिषु नवसु 'स्वरतिसूती' त्यादिना वा सिच इडागमः सू इस् तेत्यादि, नवसु सार्वधातुकेति गुणः सो इस् त अवादेश सविस् ते त्यादि, झस्यात् ध्वमि 'धि चे 'ति सिज्लोपः सविध्वम् 'विभाषेट 'इति वा मूर्धन्यः द्वित्वजश्त्वे यथायोगं षत्वष्टुत्वे असावेष्ट असविषातां असविढ्वम् असविध्वम् ।

सू, अनिटि स्यादिणः षीध्वमवादेशो न सम्भवेत् ।
अन्यत् सर्वं प्राग्वदेव कौसल्यासोष्ट राघवम् ।। इति ।।

सूस् तेत्यादिषु नवसु 'सार्वधातुके ति गुणः सोसत इस्यात् सोस् अत ध्वमि' धिचे ति सिज्लोपः सोध्वम् धकारस्य मूर्धन्यः दकारस्य द्वित्वजश्त्वे यथायोगं षत्वष्टुत्वे अट् असोष्ट असोषातामित्यादि असोढ्वम्

नह्, नहः परस्मै वृद्धिः स्याद्वदव्रजहलादिना ।
हकारस्य धकारः स्यान्नहो ध इति सर्वतः ।।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।
सिजभ्यस्तेति झेर्जुस् स्यात् तान्तन्तेषु झलोझलि ।।
इतिलोपः सिचस्तेषां तकाराणां झषस्तथोः ।
इति धत्वं ततोऽत्रैव जश्त्वं स्यात् पूर्वधस्य तत् ।।
अन्येषु षट्सु चर्त्वं स्यादनात्सीत् गोपिका हरिम् ।। इति ।।

नह् स् तीत्यादिषु नवसु 'वदव्रजे'ति नकारे अकारस्य वृद्धिः । नह् स् तीत्यादिषु नवसु 'नहोध' इति हकारस्य धः नाध् स् ति इत्यादि तिप्सिपो 'रितश्चे'तीकारलोपः नाध स् त् नाध् स् स् 'अस्ती' त्यादिना सिच ईट् नाध् स् ईत् नाध् स् ईस् 'सिजभ्यस्ते' ति झेर्जुस् नाध स् उस् तस्थस्थमिपां क्रमेण तान्तन्तामः एतेषु त्रिषुपरतः 'झलो झली' ति सलोपः । नाध् तामित्यादि 'झषस्तर्थोर्धोऽधः' इति तकाराणां धकारादेशः नाध् धाम्, नाध् धं, नाध् ध एषु त्रिषु त्रिषु 'झलांजश्झशी'ति पूर्वधकारस्य जश्त्वम् नाद् धामित्यादि एभ्योऽन्येषु षट्सु 'खरि चे' ति धकारस्य चर्त्वम् नात्सीदित्यादि, नित्यमिति वस्मसोः सकारस्य लोपः अङ्गानामडागमः अनात्सीत् अनाद्धां अनात्सुः अनात्सीः अनाद्धं अनाद्ध, अनात्सं अनास्त्व अनात्स्म परस्मैपदेरूपम् ।

नह्, हकारस्य धकारः स्यान्नहो ध इति सर्वतः ।
झस्यात्मनेष्वत् स्यात् तथासित्यनयोर्द्वियोः ।।
झलो झलीति सिज्लोपः स्यात् तकारथकारयोः ।
धत्वं झषस्तथोस्तत्र जश्त्वं स्यात् पूर्वधस्य तत् ।।
अन्येषु षट्सु चर्त्वं स्याद् हस्यानद्ध बलिं हरिः। इति ।।

नह् स् तेत्यादिषु नवसु 'नहो ध' इति हकारस्य धः नध् स् त 'आत्मनेपदेष्वनत' झकारस्यात् नध् स् अत तथासित्यनयोः परतः 'झलो झली' ति सिज्लोपः नध् त नध् थास् 'ध्वमिचे' तिसिलोपः नद्ध्वम् तथासित्यनयोः 'झष' इत्यादिनाधत्वम् अनयोर्ध्वमि च 'झलां जश्झशी'ति पूर्वधकारस्य जश्त्वम् अन्येषु षट्सु धकारस्य 'खरिचे' ति चर्त्वम् अङ्गानामडागमः अनद्ध अनत्सातां अनत्सत अनद्धाः अनत्साथां अनध्वम् अनत्सि अनत्स्वहि अनत्सहि ।

सु, वदव्रजेति वृद्धिः स्यात् सर्वत्रेडागमः सिचः ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।

इट ईटीति सिज्लोपस्तयोरेव भवेदिह ।
सवर्णदीर्घे झेर्जुस् स्यात् सिजभ्यस्तविदीति सः ।।
अवादेशस्तु सर्वत्र षत्वष्टुत्वे यथाविधि ।
असावीत्यसाविष्टां विप्राः सोममसाविषु ।। इति ।।

सु स् तीत्यादिषु नवसु 'वदव्रज'हलन्तस्याच इति उकारस्य वृद्धिः सौस् तीत्यादि । सर्वत्र स्तुसुधञ्चयः परस्मैपदेष्वि ७-२-७२ ति सिच इडागमः सौ इति तिप्सिपोरिकारलोपः सौ इस् त् सौ इस् स् 'अस्ति' रिडागमः सौ इस् ईत् सौ इस् ईस् अनयो रिट ईटी ति सिजलोपः सौ इ ईत् सौ इईस् सवर्णदीर्घः सौ ईत् सौईस् सिजभ्यस्ते ति झेर्जुस् सर्वत्रावादेशः सावित् तस्थस्थमिपां क्रमेण तामादयः यथायोगं षत्वष्टुत्वेः' नित्य' मित्यादिना वस्मसोः सस्य लोपः अङ्गानामडागमः । असावीत् असाविष्टां असाविषुरित्यादि,

अश्, स्वरतीत्यादिना वेट् स्याज्झस्यात् स्यादात्मनेपदे ।
अष्टासु षत्वं षत्वं तु द्वयोराशिष्ट खं घनः ।। इति ।।

अस् स् तेत्यादिषु नवसु स्वरती त्यादिना सिचो वेट् , अश् इस्तेत्यादि, झस्याकारः अश् इस् अत ध्वमि धिचे ति सिज्लोपः अशिध्वम, धकारस्य द्वित्वजश्त्वे ध्वमोऽन्यत्र सर्वत्र 'आदेशति' सकारस्य षत्वम् तथासित्यनयोः' ष्टुना ष्टु'रिति ष्टुत्वम् अङ्गानामाट् वृद्धि अशिष्ट आशिषातां आशिषत आशिष्टाः आशिषाथां आशिध्वम्, आशिषि आशिष्वहि आशिष्महि ।

अश्, झस्यात्मनेपदेष्वत् स्यात् तथासित्यनयोर्द्वयोः ।
झलोझलीति सिज्लोपो धिचेति ध्वमि पूर्ववत् ।।
भवेत् व्रश्चादिना षत्वं सकारस्यात्र सर्वतः ।
भवेत् तथा ध्वमोऽन्यत्र षढोः कः सीति षस्यकः ।।
तेषु षत्वं सकारस्य स्यादादेशेति सूत्रतः ।
तथास्ध्वमा ष्टुना ष्टुत्वं द्वमि षस्य डकारता ।।
झलां झश् झशिसूत्रेणाथाष्टाक्षातां तथाक्षत ।। इति ।।

इडभावे अश् स् तेत्यादिषु झस्यात्मनेपदेष्वित्यतः अश्स् अत तथोसित्यनयोः 'झलो झली' ति सिज्लोपः अश् त अश् थास् ध्वमि 'धि चेति सिज्लोपः अश् ध्वम् सर्वत्र शकारस्य 'व्रश्चे'त्यादिना षत्वम् । अष् तेत्यादि, तथा स् ध्वमिति त्रिभ्योऽन्यत्र 'षढोः कः सी' ति धकारस्य ककार अक् स् आतामित्यादि, एषु षट्सु सकारस्य 'आदेश'ति षत्वम् अक् ष् आतामित्यादि, तथास् ध्वमित्येतेषां त्रयाणां 'ष्टुना ष्टु'रिति ष्टुत्वम् अषट अष् झस् अष् ढ्वम् अष् ढ्वमित्यत्र 'झला' मिति षस्यडः । अढ्वम् अङ्गानामाड्वृद्धी । आष्ट आक्षातां आक्षत आष्ठाः आक्षाथां आड्ढ्वम्, आक्षि आक्ष्वहि आक्ष्महि,

चि, सिचिवृद्धिः परस्मैपदेष्विति स्यान्नवस्वपि ।
इलोपस्तिप्सिपोरस्तिसि चेतीडागममस्तयोः ।।
सिजभ्यस्तेति झेर्जुस् स्यात् षत्वष्टुत्वे यथाविधि ।
स्यादचैषीदचेष्टां च क्रमेणाचैषुरित्यपि ।। इति ।।

चिस तीत्यादिषु नवसु 'सिचिवृः परस्मैपदेष्वि'ति चैस् तीत्यादि । तिप् सिपो' रितश्चेति' लोपः चैस् त् चैस् त् चैस् स् 'अस्ति' इति तयोरिडागमः चस् ईत् वैस् ईस् 'सिजभ्यस्ते' ति झोर्जुसादेशः चैस् ईत् वैस् ईस् 'सिजभ्यस्ते' ति झेर्जुसादेशः चैस् उस् तस्थस्थमिपां क्रमेण तामादयः यथायोगं षत्वष्टुत्वे वस्मसोः सलोप अट् अचैषीत् अचैष्टां अचैषुः । अचैषीः अचैष्टं अचैष्टः अचैष अचैष्व अचैष्म ।

चि, सर्वत्र सार्वधात्वादिर्गुणो झस्यादथात्मने ।।
षत्वष्टुत्वे यथायोगमिणः षीध्वमचेष्ट सः ।। इति ।।

चिस् तेत्यादिषु नवसु 'सार्वधातुके' ति गुणः चैस् तेत्यादि झस्यात् चेस् अत ध्वमि' धि चे' ति सिचो लोपः चेध्वम् 'इण' इत्यादिनामूर्धन्यः । यथायोगं षत्वष्टुत्वे अङ्गानामडागमः अचेष्ट अचेष्टतां अचेषत अचेष्ठाः अचेषाथां अचेढ्वम् अचेषि अचेष्वहि अचेष्महि ।।

तुद्, तुदेर्न वसु वृद्धिः स्याद् वदव्रजहलादिना ।
इलोपस्तिप्सिचेतीडागमस्तयोः ।।
सिजभ्यस्तेति झेर्जुस् स्यात् तान्तन्तेषु झलोझलि ।
इति लोपः सकारस्य सर्वत्र खरि चेति चर् ।।
अतौत्सीदित्यतौत्तां च तथातौत्सुः परे रिपुन ।। इति ।।

तुद् स् तीत्यादिषु नवसु 'वदव्रजहलन्तस्याच' इति वृद्धिः तौद्सति इलोपः। 'अस्तिसिचोऽपृक्ते' ति ईडागमश्च तौद् स् ईत् तौद् स् ईस् झेर्जुस् तौद् स् उस् तस्थास्थमिपां क्रमेण तान्तन्तामः न्तन्तेषु परत 'झलो झली' ति सिज्लोपः सर्वत्र दकारस्य 'खरि चे' ति चर्त्वम् 'नित्यं ङित' इति वस्मसोः सकार लोपः अङ्गनाम्अट् अतौत्सीत् अतौत्तां अतौत्सुः ।

मृ, अत्रोश्चेति सिचः कित्वाद् वृद्धिनैव भवेतन्मृङः ।
तथासित्ययोह्रस्वादङ्गादिति सकारलुक् ।।
झस्यात्मनेपदेष्वत् स्यात् षट्सु सस्य सस्य षकारता ।
इणः षीध्वं द्वित्वजश्त्वे रावणोऽमृत सङ्गरे ।। इति ।।

मृस् तेत्यादिषु 'उश्चे' १-२-१२ सिचः कित्वाद् वृध्यभावः । तथासित्यनयोः 'ह्रस्वादङ्गादि' ५-२२७ ति सिचो लोपः मृत मृथास् झस्यात् मृस् अत ध्वमि 'धिचे' ति सिज्लोपः मृध्वम् 'इण' इत्यादिना धस्यढः तस्य द्वित्वजश्त्वे त थास् ढ्वमिति त्रिभ्योऽन्यत्र सकारस्य 'आदेशप्रत्ययो' रिति षत्वम् अट् अमृत अमृषातामित्यादि, अमृढ्वम्,

मुच्, च्लेः परस्मा अङादेशः स्यात् पुषादिद्युतादिना ।
झोऽन्तश्चातो गुणे तत्रैवेतश्चेकारलुक् त्रिषु ।।
सयोगान्तस्य लोपोऽन्तेरमि पूर्वः परे त्वमि ।
अतो दीर्घो यञीति स्याद्वस्मसोरमुचद्व्रतम् ।। इति ।।

मुच् च्लि तीत्यादिषु नवसु 'पुषादिद्लृतितश्च' ३-१-५५ च्लेरङादेश मुच् अ तीत्यादि झेरन्तादेश मुच् अन्ति 'अतोगुण' इति पररूपत्वम् मुचन्ति पुनः मुचति मुचन्ति मुचसीत्येतेषां त्रयाणमिकारलोपः मुचत् मुचन्त् मुचस् तस्थस्थमिपां क्रमेण तामादयः तामादयः मुच् अमित्यत्र पूर्वरूपत्वम् वस्मसोः परत 'अत' इत्यादिना दीर्घः वस्मसोः सकारलोपः अट् मुचन्तित्यत्र संयोगन्तलोपः अमुचत् णसुचतामित्यादि,

मुच्, गुणाभावः सिचः कित्वाल्लिङ्सिचाविति सूत्रतः ।
तथासित्यनयोरत्र झलो झलि सकारलुक् ।।
झस्यात्मनेपदेष्वत् स्याच्चोः कुत्वं सर्वतो भवेत् ।
षट्सु षत्वं सस्य कस्य ध्वमि जश्त्वममुक्त सः ।। इति ।।

मुच् स् तेत्यादिषु 'लिङ्सिचावात्मनेपदेष्वि' १-२-११ ति सिच कित्वं गुणाभावः मुच् स् त, तथासित्यनयोः परतो 'झलो झली' ति सिलोपः ध्वमि' धि च' तिसिचो लोपः झकारस्यात् अत् मुच् स् अत सर्वत्र 'चोः कु'रिति चकारस्य कुत्वमुक्त ,सकाराणां षण्णां आदेशेत्यादिना षत्वम् मुक्ध्वमित्यत्र 'झला'मित्यादिना जश्त्वम् अङ्गानामट्, अमुक्त अमुक्षातां अमुक्षतेत्यादि,

रुध् रुधेर्वा च्लेरङादेश इतीरितो वेति सूत्रतः ।
झोऽन्तश्चातो गुणे तत्रैवेतश्चेकारलुक् त्रिषु ।
संयोगान्तस्य लोपेऽन्तेराम पूर्वः परे त्वमि,
अतो दीर्घो यञीति स्याद्वस्मसोररुधत् पुरीम् ।। इति ।।

रुध् च्लि तीत्यादिषु 'इरितोवे'३-१-५७ ति वा च्लेरङादेशः रुध् अतीत्यादि, झेरन्तः पररूपत्वं च रुधति रुधन्ति रुधसीत्येतेषां त्रयाणामिकारलोपः तस्थस्थमिपां क्रमेण तान्तन्तामः रुध् अमित्यत्र 'अमि पूर्व' इति पूर्वरूपत्वम् वस्मसोः परत 'अतो दीर्घो यञी' ति दीर्घः' नित्यं ङित' इति वस्मसोः सकार लोपः अङ्गानामट् अरुधन्तित्यत्र तकारस्य 'संयोगान्तस्येति' लोपः अरुधत् अरुधतां अरुधन् इत्यादि,

अङ्भावे रुधेर्वृद्धिर्वदव्रजहलादिना ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।
झलो झलीति सिज्लोपस्तान्तन्तेषु परेष्वथ ।
झषस्तथोर्धोऽध इति तकाराणां धकारता ।।
तेषु पूर्वधकाराणां झलां जश् झशि जश् पुनः ।
सिजभ्यस्तेति झेर्जुस् स्यादरौत्सीत् षट्सु चर्त्वतः ।। इति ।।

रुध् स् तीत्यादिषु नवसु 'वदव्रजहलन्तस्याच' इति हलन्तस्याचो वृद्धिः रौध् सति तिप्सिपोरिकारलोपः अस्तीत्यादिना तयोरिडागमो भवति, हौध् स् ईत् हौध् स् ईस् तस्थस्थमिपां क्रमेण तामादयः । तामादिषु परतः' झलो झली'ति सिचोलोपः 'झषस्तथोर्धोऽध' इति तान्तन्तानां धत्वम् तेषु पूर्वधकाराणां 'झला मि'त्यादिना जश्त्वम् अन्येषुषट्सु धकारस्य 'खरि चे' ति चर्त्वम् 'सिजभ्यस्ते' ति झेर्जुस् 'नित्यमिति वस्मसोः सकारलोपः अङ्गानामट् अरौत्सीत् अरौद्धां अरौत्सुः अरौत्सीः अरौद्धं अरौद्ध अरौत्सं अरौत्स्व अरौत्स्म ।

रुध्, गुणाभावः सिचः कित्वाल्लिङ् सिचाविति सूत्रतः ।
झलो झलीति सिज्लोपस्तथासित्यनयोर्द्वयोः ।।
झषस्तथोर्धोऽथ इति धकारस्तथयोर्भवेत् ।
अत्र ध्वमि च जश्त्वं च भवेत् पूर्वधस्य तत् ।।
झस्यात्मनेपदेष्वत् स्यात् षट्सु चर्त्त्वमरुद्धसः ।। इति ।।

रुध् स् तेत्यादिषु 'लिङ्सिचा' वित्यादिना सिचः कित्वात् न गुणः, तथासित्यनयोः परतः' झलो झली' ति सिचो लोपः तत्र 'झष' इत्यादिना तकारथकारयोर्धकारादेशः ध्वमि' धिचे' ति सिज्लोपः रुध् ध् रुध् धस् रुध् ध्वमित्येतेषु त्रिषु ''झला' मिति पूर्वधस्यजश् अन्येषु षट्सु धकारस्य 'खरिचे' ति चर्त्वम् 'आत्मने'इत्यादिना झस्यादित्ययमादेशः अट् अरुत्सत अरुद्धाः अरुत्साथां अरुध्वमित्यादि ।

भुज्, भुजेः परस्मै वृद्धिः स्याद्वदव्रजहलादिना ।
इलोपस्तिप्सिपोरस्तिसि चेतीडागमस्तयोः ।।
झलो झलीति सिज्लोपस्तान्तन्तेषु परेषु सः ।
सिजभ्यस्तेति झेर्जुस् स्यात् कुत्वचर्त्वे च सर्वतः ।।
षट्स्वादेशेति षत्वं स्यादभौक्षीत् सगरो भुवम् ।। इति ।।

भुज् स् तीत्यादिषु नवसु 'वद्व्रजे'ति वृद्धिः भौज् स् तीत्यादि तिप्सिपो 'रितश्चे' तीकारलोपः 'अस्तिसिच' इत्यादिना ईडागमः भूज् स् ई ति तस्थस्थमिपां क्रमेण तान्तन्तामः तान्तन्तदिषु परतः' झलो झली' ति सिचो लोपः 'सिजभ्यस्ते' ति झेर्जुस् भौज् स् उस् सर्वत्र जकास्य' चोः कु' रिति कुत्वं गकारः गकारस्य 'खरिचे' ति चर्त्वम् तान्तन्तेभ्योऽन्येषु षट्सु 'आदेशे' त्यादिना षत्वम् 'नित्यं ङिन' इति वस्मसोः सकारस्य लोपः अङ्गानामट् अभौक्षीत् अभौक्ता अभौक्षुरित्यादि,

भुज्, झलो झलीति ति सिज्लोपस्तथासिनयोर्द्वयोः ।
झस्यात्मनेपदष्वत् स्याच्चोः कुः कुत्वं नवस्वपि ।।
चर्त्वे ध्वमं विनाष्टासु षट्सु ष्सु षत्वमभुक्त सः ।। इति ।।

भुज् स् ते त्यादिषु तथासित्यनयोः परतः 'झलो झली'ति सिचो लोपः ध्वमि 'धिचे' ति सिचो लोपः 'आत्मनेपदेष्वि' ति झस्यात्, सर्वत्र 'चोः कु' रिति कुत्वम् जकारस्य गकारध्वमोऽन्यत्र सर्वत्र गस्य खरिचे ति चर्त्वम् सकाराणां षण्णां 'मादेशे' त्यादिना षत्वम् । अङ्गानामट् अभुक्त अभुक्षातामित्यादि,

युज्, युजेर्विकल्पाच्चलेरङ् स्यादिरितो वेति सूत्रतः ।
झोऽन्तश्चातो गुणे तत्रैतश्चेकारलुक् त्रिषु ।।
संयोगान्तस्य लोपोऽन्तेरमि पूर्वः परे त्वमि ।
अतो दीर्घो यञीति स्याद्वस्मसोः परतोऽयुजत् ।। इति ।।

युज् च्लितीत्यादौ इरितो वे ति च्लेर्वाङ् । युज् अति झेरन्तः । अतोगुण

इति पररूपत्वम् ,युज् ति युजन्ति युज् सीत्येतेषां त्रयामितश्चेतीकारलोपः । तस्थस्थमिपां क्रमेण तामादयः, युज् अमित्यत्र अमि पूर्व इतिरूपत्वम् युजम्, वस्मसोः परत अत इत्यादिना दीर्घः वस्मसोः सकारलोपः अट् अयुजन्तित्यत्र संयोगान्तस्ये ति सस्य तकारस्य तकारस्य लोपः अयुजत् अयुजतामित्यादि,

युज्, अङभावे भवेद् वृद्धिर्वदव्रजहलादिना ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।
झलो झलीति सिज्लोपस्तान्तन्तेषु परेषु सः ।
सिजभ्यस्तेति सेर्जुस् स्यात् कुत्वचर्त्वे च सर्वतः ।।
षट्स्वादेशेति षत्वं स्यादयौक्षीत् पाण्डवो रथम् ।। इति ।।

युज् स् तीत्यादिषु नवसु 'वदव्रजेत्यादिना' वृद्धिः यौज् स् तीत्यादि, तिप्सिपोरिलोपः 'अस्ती' त्यादिनेट् यौज् स् ईत् यौज् स् ईस् तस्थस्थमिपां क्रमेण तामादयः । तामादिषु परतः 'झलोझली'ति सिचो लोपः झोर्जुस् सर्वत्र जस्य कुत्वचर्त्वे सकाराणां षण्णां षत्वम् नित्याहिव इति वस्मसोः सकारस्य लोपः सर्वत्राङ्गस्याट् अयौक्षीत् अयौक्तां अयौक्षुरित्यादि,

अभुक्तेति यथा तद्वदयुक्तेति च दृश्यताम् ।। इति ।।

अयुक्त अयुक्षातां अयुक्षत, अयुक्थाः अयुक्षाथां अयुग्ध्वम्, अयुक्षि, अयुक्ष्वहि अयुक्ष्महि,

तन्, प्रागार्धधातुकस्येति भवेत् सिचि इडागमः ।
अतो हलादेरिति वा वृद्धिरत्र भवेत् पुनः ।।
इलोपस्तिप्सिपोरस्तिसि चे तीडागमस्तयोः ।
इट ईटीति सिज्लोपस्तयोरेव भवेदिह ।।
सवर्णदीर्घो झेर्जुस् स्यात् सिजभ्यस्तेति सूत्रतः ।
सस्य षत्वं त्रिषु ष्टुत्वमतानीदर्जुनो यशः ।। इति ।।

तन् स्तीत्यादिषु नवसु आर्धधातुकस्येति सिच इट् अतोहलादेर्लघोरिति विकल्पेन वृद्धइश्चातानीत्तथासोः परतः वथासाहचर्यादात्मनेपदे तशब्दसय ग्रहणम्। अनुदात्तोपदेशवनतितनोत्यादी नामनुनासिकलोपोः झलि क्ङि ति, ६-४-३६ अनुदात्तोपदेशानामनुनासिकान्तानां वनतेस्तनोत्यादीनां चानुनासिकलोपो भवति झलादौ क्ङिति प्रत्यये परतः ।

कृ, कृञःपरस्मै वृद्धिः स्यात् सिचि वृद्धीति सूत्रतः ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।
सिजभ्यस्तेति झेर्जुस् स्यात् षत्वं च स्यान्नवस्वपि ।
तान्तन्तानां ष्टुना ष्टुत्वमकार्षीद्राघवः क्रतुम् ।। इति ।।

कृस् तीत्यादिषु नवसु 'सिचिवृद्धिः परस्मेपदे'ष्विति वृद्धिः कार् स् तीत्यादि। तिप्सिपोरिकारलोपः 'अस्ती'त्यादिनेट् कार् स् ई ति कार् स् ई स् झेर्जुस् कार स् उस् तस्थस्थमिपां क्रमेण तान्तन्तामः सर्वत्र सिचः सकारस्य आदेशप्रत्ययो रिति षत्वम् तामादीनां ष्टुना ष्टुरिति ष्टुत्वम् वस्मसोः सस्य लोपः अङ्गानामट् अकार्षीत् अकार्ष्टां अकार्षुः अकार्षीः अकार्ष्टं अकार्ष्ट अकार्षं अकार्ष्व अकार्ष्म।।

कृ, गुणाभवः सिचः कित्वाल्लिङ्सिचाविति सूत्रतः ।
तथासित्यनयोर्हस्वादङ्ग दिति सकारलुक् ।
झस्यात्मनेपदेष्वत् स्यादिणः षीध्वमयाकृत ।इति ।

कृस् तेत्यादिषु तथासित्यनयोः परतो' ह्रस्वादङ्गादि' ५-२-२७ ति सिचो लोपः । कृत कृथास् झस्यात् कृस् अत ध्वमि' धिचे' ति सिचो लोपः 'इणः षीध्व' मित्यादिना धस्य मूर्धन्यः सकारस्य यथायोगं षत्वम् अङ्गानामट् अकृत अकृषातां अकृढ्वमित्यादि ।

क्री , क्रिञश्चाप्यथः वृद्धिः स्यात् सिचि वृद्धिति सूत्रतः ।
इलोपस्तिप्सिपोरस्तिसिचेतीडागमस्तयोः ।।
सिजभ्यस्तेति झेर्जुस् स्यादक्रैषीद् द्विषत्वयोः ।। इति ।।

क्री स् तीत्यादिषु नवसु 'सिची' त्यादिना वृद्धिः क्रैस् ईस् झेर्जुस् क्रैस् उस् तस्थस्थमिपां क्रमेण तान्तन्तामः यथायोगं षत्वष्टुत्वे 'नित्यंङित' इति वस्मसोः सलोपः अङ्गानामट् ककारस्य 'अनचि चे'ति द्वित्वम्, अक्रैषीत् अक्रैष्टां अक्रैषुरित्यादि,

> वृ, इडागमो विकल्पात् स्याल्लिङ्सिचोरिति सूत्रतः ।
> इटो दीर्घो विकल्पात् स्याद् वृतो वेत्यमुना हिसः ।।
> सार्वधात्वादिना पश्चात् तयोः स्याद्रपरोगुणः ।
> झस्यात्मनेपदेष्वत् स्याद्विभाषेटोऽवरिष्ट च ।।
> षत्वष्टुत्वे यथायोगं दीर्घाभावेऽवरिष्ट च ।। इति ।।

वृस् तेत्यादिषु नवसु लिङ्सिचो रात्मनेपदिष्व ७-२-४२ ति सिचो वेट् इडागमः पुनः वृतो वे ७-२-३५ तीटो वा दीर्धः वृ ईस् तेत्यादि अत्रोभयत्रापि सार्वधातुकार्धधातुकयोरिति गुणो रपरः वर् ईस् त वर् इस् ते त्यादि, झस्यात् ध्वमि धिचे ति सिचो लोपः विभाषेट इति वा मूर्धन्यः द्वित्वजश्त्वे यथायोगं षत्वष्टुत्वे अङ्गानामटागमः अवरीष्ट अवरीषातां अवरीषत अवरीष्टाः अवरीषाथां अवरीढ्वं अवरीध्वम् अवरीषि अवरीष्वहि अवरीष्महि,

> अत्रोश्चेति सिचः कित्वाद् गुणाभावोऽनिटो वृङः ।
> तथासित्यनयोर्ह्स्वादङ्गादिति सकारलुक् ।।
> षट्सु षत्वमिणः षीध्वंलुङ्लिटामित्यथावृत ।। इति ।।

इडभावे वृस् तेत्यादिषु उश्चे ति सिचः कित्वाद् गुणाभावः वृस् त वृस् थसित्यनयोः ह्रस्वदिति सकारलोपः ध्वमि धिचे ति सिचो लोपः इणः षीध्व मिति मूर्धन्यः अन्येषु षट्सु सकारस्य षत्वम् अङ्गानामटागमः अवृत अवृत अवृषातां अवृढ्वमित्यादि,

> ग्रह्, इडागम इटो दीर्घः स्याद् ग्रहोऽलिटिसूत्रतः ।।
> षत्वषुत्वे क्रमाद्रामः सीतायाः पाणिमग्रहीत् ।। इति ।।

ग्रह् स् तीत्यादिषु नवसु आर्धधातुकस्येति सिच इटागमः ग्रह् इस् ति, वदव्रजे ति वृद्धौ प्राप्तायां हम्यन्तक्षणे त्यादिना प्रतिषेधः ग्रह् इसति ग्रहोऽलिटि दीर्घ ७-२-३६ इतीटो दीर्घः ग्रह् ईस् ति तिप्सिपोरिकारस्य लोपः अस्तीत्यादिना तयोरीट् इट ईटी तिसिचो लोपः सवर्णदीर्घश्च झेर्जुसादेशः तस्थस्थमिपां क्रमेण तान्तन्तामःमादयः यथायोगं षत्व्टुत्वे वस्मसोः सस्य लोपः अङ्गानामट् गकारस्य अनचिचेति द्वित्वम् अग्रहीत् अग्रहीष्टांइत्यादि हम्यन्तक्षणश्वसजागृणिश्व्येदिताम् ७-२-५ हकारमकारयकारान्तानां क्षणश्वसजामृणिश्वीत्येतेषामेदितां चेडादौ सिंचि परस्मैपदेपरे वृद्धिर्म भवति,

ग्रह्, इडागम इटो दीर्घः स्याद् ग्रहोऽलिटिसूत्रतः ।
झस्यात्मनेपदेष्वत् स्यात् षत्वष्टुत्वे यथाविधि ।।
विभाषेटो ध्वमि हरिस्त्वग्रहीष्ट श्रियः करम् ।। इति ।।

ग्रह् स् ते त्यादिषु आर्धधातुकस्ये ति सिच इटागमः ग्रह् इस् त ग्रहो लिटि दीर्घ इतीटो दीर्घः ग्रह् ईस् तेत्यादि इडागमेन कित्वस्यानवकाशान्न स्मप्रसारणम्। झस्य आत्मनेपदेष्वित्यत् ध्वमिधि चे ति सिचो लुक् विभाषेट इति वा मूर्धन्यः यथायोगं षत्वष्टुत्वे, अङ्गानामटागमे अनचि चे ति गकारस्य द्वित्वम् अग्रहीष्ट अग्रहीषातामित्यादि, अग्रहीध्वं अग्रहीढ्वमित्यादि ।

चुर् सनादिधातुसंज्ञान्तं प्राग्वल्लुङ्प्रत्ययः पुनः ।
तिङादयश्लिश्चलेश्चङ् स्याण्णिश्रिद्रुसुभ्य इतीहसः ।।
पुनस्त्रिष्वपि णेर्लोपो भवेण्णेरनिटीति सः ।
चोरिपाल्योस्तूपधाया ह्रस्वः स्याण्णौ चङीति सः ।।
चङीत्यथ द्विर्वचनं त्रयाणां स्यादथाद्ययोः ।
हलादिः शेष इति च पुनः पालेस्तु कथ्यते ।।
तत्राभ्यासस्य सन्वत्वात् सन्वल्लध्विति सन्यतः ।
इत्यभ्यासात इत्वं स्यात् पुनरप्याद्ययोर्द्वयोः ।।

दीर्घो लघोरित्यभ्यासस्य पुनर्दीर्घ इष्यते ।
अर्चेर्द्विर्वचने कार्ये णिलोपः स्थानिवत्त्वतः ।।
अजादेस्तु द्वितीयस्य तत्र रेफस्य चामते ।
नन्द्रा इति निषेधेन रेफो नात्र द्विरुच्यते ।।
चूचुर स्यात् पीपल च ह्यर्चिचः स्युस्तिबादिभिः ।। इति ।।

चुरस्तेये चुर अकार उच्चारणार्थः चुर् सत्त्यापपाशे त्यादिना स्वार्थे णिच्प्रत्ययः अनुबन्धलोपः चुरइ, पुगन्तेत्यादि गुणः चोरि सनाद्यन्ता इति धातुसंज्ञायां लुङ् चोरिल् लस्य तिबाजयः । चोरितीत्यादि च्लिलुङी ति धातोश्लिप्रत्ययः चोरिच्लिति णिश्चद्रुस्रुभ्यः कर्त्तरि चङि ३-१-४५ ति च्लेश्चङ् अनुबन्धानां लोपः । चोरि अ ति णेरनिटी ६-४-५९ ति णेर्लोपः चोर् अतिणौ चङ्युपधाया ह्रस्व ७-४-१ इति ओकारस्य ह्रस्व उकारः चुर् अति चङी ६-१-११ ति द्विर्वचनम् चुर् चुर् अति हलादिः शेषः चुचुर् अति दीर्घो लघो ७-४-५४ रित्यभ्यासस्य दीर्घः एषु कृतेषु, चूचुरति चूचुरतसित्यादयः सिध्यन्ति ।

पाल रक्षणे पाल् सत्त्याय पाशे ति स्वार्थेणिच् पाल् इ सनादि धातुसंज्ञायां लुङ् इति लुङ् पाल् इल् पाल् इति च्लि लुङी ति धातोश्च्लिः । पाल् इ च्लिति णिश्रीत्यादिना च्लेश्चङादेश सिचोऽपवादः अनुबन्धलोपः पाल् इ इति 'णेरनिटी' ति णेलोपः पाल् अति 'णौ च ङी' ति ह्रस्वः पल् अति'चङी ति द्विर्वचनम् पल् पल् अति' हलादिः शेषः' पपल् अति 'सन्वल्लघुनि चङ्परेऽनग्लोपे' ७-४-९३। इत्यभायासस्य स्त्वद्भावात् 'सन्यत'७-४-७९ इत्यभ्यासाकारस्येकारदेशः, पिपल् अति'दीर्घोलघो रित्यभ्यासस्य दीर्घः । एषु कृतेषु पीपलति पीपलत सित्यादयः सिध्यन्ति,

अर्च पूजायाम् अकार उच्चारणार्थः अर्च् 'सत्यापपाशे' ति स्वार्थे

णिच् अर्चि सनाद्यन्ता इति धातु संज्ञायां लुङ् अर्चि ल् लस्य तिबादयः अर्चि तीत्यादि च्लिप्रत्ययः अर्चि च्लि ति, 'णिश्री'त्यादिनाच्लेश्चङ् अर्चि अति

'णेरनिटी' ति णेलोपः अर्च् अति 'चङी' ति द्विर्वचने कर्त्तव्ये 'द्विर्वचनेऽची' ति णिलोपस्य स्थानिवद्भावाद'जादेर्दितीस्येति' द्वितीयस्यैकाचो द्विर्वचनं स्यात्, तत्र रेफस्यापि द्विर्वचने प्राप्ते 'नन्द्राः संयोगादय' ६-१-३ इति प्रतिषेधात् सन् द्विरुच्यते अर् चिचि अति कृते द्विर्वचने पुनरादेश एवावतिद्यते अर् चिचति 'अचो रहाभ्या' मिति पूर्वचकारस्य द्वित्वम् एषु कृतेषु अर्चिवति अर्चिचतसित्यादयः सिद्ध्यन्ति ।' णिश्रिद्रुस्रुभ्यः कर्तरि चङ् '३-१-४५ ण्यन्तेभ्यो धातुभ्यः श्र्यादिभ्यश्च परस्य च्लेश्चङादेशो भवति, कर्तृवाचिनि लुङि परतः परतः णौचङ्युपधाया ह्रस्वः ७-९-चङ्परे णौ परतो यदङ्गं तस्योपधाया ह्रस्वो भवति, चङि ६-१-११ चङि परतोऽनभ्यासस्य धातोरवयवस्य प्रथमस्यैकाचो द्वितीयस्य वा यथायोगं द्वेभवतः । 'सन्वल्लघुनि चङ्परेऽनग्लोपे' ७-४-९३ लघुनि धात्वक्षरे परतोयोऽभ्यासस्तस्य चङ्परे णौ परतः सनीव कार्यं भवति, अनग्लोपे 'सन्यतः' ७-४-७९ सनि परतोऽकारान्तस्याभ्यासस्येकारो भवति 'दीर्घो लघोः' ७-४-९४ लघोरभ्यासस्य दीर्घो भवति लघूनि चङ्परेऽनग्लोपे 'अजादेर्द्वितीयस्य' ६-१-२ अजादेर्धातोरवयवस्य द्वितीयस्यैकाचो द्वे भवतः 'नन्द्राः संयोगादयः' ६-१-३ नकारदकार रेफा द्वितीयस्यैकाचोऽवयवभूताः संयोगादयो न द्विरुच्यन्ते ।

झोऽन्तश्चातो गुणे चेति झस्य झेश्च भवेद् द्वयम् ।
स्यात्तिबन्तिसिपामेर्लुगितश्चेत्यमुना हि सः ।।
संयोगान्तस्य लोपोऽन्तेरमि पूर्वः परे त्वमि ।
आतो ङित्तश्च लोपो व्योराद्गुणश्चात्मनेपदे ।।
सूत्रत्रयं द्व्यर्थयोः स्यादिटि चाप्याद्गुणो भवेत् ।
अतो दीर्घो यञीति स्यादुत्तमे तूभयोरपि ।।
द्व्यर्थबह्वर्थयोश्चैतत् स्युरचूचुरदादयः ।। इति ।।

झेर्झस्यान्तादेश 'अतो गुण' इति पररूपत्वं च, ति अन्ति सीत्येतेषा त्रयाणामितश्चेतीकारलोपः अन्तित्यत्राङ्गस्याट् संयोगान्तस्य तकारस्य लोपः

तस्थस्थमिपां क्रमेण तान्तन्तमः परस्मैपदोत्तमैकवचने अमि पूर्व इति पूर्वरूपत्वम् आतामाथामित्यनयोः आतोङित इत्याकरस्ये य् ,लोपो व्योर्वलीति यलोपः गुणश्च इत्यप्याद्गुणः उभयत्रोत्तमद्विवचनबहुवचनयो रतो दीर्घो यञी ति दीर्घः वस्मसोः सकारस्य लोपः अन्तेरन्यत्र सर्वत्राङ्गस्याट् अचूचुरत् अचूचुरत अपीपलत् अपीपलत आर्चिचत् आर्चिचत् आर्चिचत ।।

अथ लुट्प्रक्रिया

भविता भवितारौ भवितारः 'अनद्यतने लुट्' ३-३-१५ भविष्यदनद्यतनेऽर्थे वर्त्तमानाद् धातोर्लुट्प्रत्ययो भवति स्यतासी लृलुटोः । लृ इति लृङ्लृटोः सामान्यग्रहणम् तस्मिन् लुटि परतो यथासंख्यं धातोः स्यतासीत्येतौ प्रत्ययौ भवतः तासेरिदित्करणमनुनासिकलोपप्रतिषेधार्थम् ,मन्ता संमन्ता 'लुटः प्रथमस्य डारौरसः' २-४-५५ लुडादेशस्य प्रथमपुरुषस्य यथासंख्यं डारौंरस इत्येते आदेशा भवतन्ति डकारष्टिलोपार्थः तासस्त्योर्लोप इति वर्त्तमाने 'रि च' ७-४-५१ रेफादौ प्रत्यये परतस्तासेरस्तेश्च सकारस्यलोपो भवति 'तासस्त्योर्लोपः' ७-४-५० तासेरस्तेश्च सकारस्यलोपो भवति सकारादौ प्रत्यये परतः । एधितां एधितारौ एधितारः एधिताहे 'ह एति' ७-४-५२ तासेरस्तेश्च सकारस्य हकारादेशो भवत्येकारादौ प्रत्यये परतः वक्ता नन्दिता ध्वंसिता संख्याता अत्ता अतिशयिता पक्ता होता हाता प्रणिधाता 'नेर्गदनदपतपद घुमास्यति हन्तियातिवातिद्रातिप्सातिवपति वहतिशाम्यति चिनोतिदेग्धिषु च' ५-४-१७ उपसर्गान्निमित्तादुत्तरस्य नेर्नकारस्य णकारादेशो भवति गदादिषु परतः देविता सविता सोता परिणद्धा अभिषोता अशिता अष्टा निश्वेता वोत्ता मर्त्ता मोक्ता रोद्धा भोक्ता योक्ता तनिता मनिता कर्त्ता त्रेता वरिता वरिता ग्रहिता चोरयिता पालयिता अर्चयितेत्याद्यशेषं समुन्नेयम्,

लुटि तावत् प्रवक्ष्यामि पदानयनपद्धतिम् ।
तत्रानद्यतने लुट् स्यादिति लुट्प्रत्यये कृते ।।

तिप्तस्झीत्यादिना पश्चाल्लस्य स्थाने तिबादयः ।
धातोः स्यतासी लृलुटोरिति तासौ कृते पुनः ।।
प्रथमस्योभयत्रापि वचनानां यथाक्रमम् ।
डारौरसो भवन्तीह लुट इत्यादिसूत्रतः ।।
तत्रैकार्थे टिलोपष्टेरिति तासेर्भवेदयम् ।
द्व्यर्थबह्वर्थयोरत्र सलोपः स्याद्रि चेति सः ।।
थासः स इति थासः से मध्यमैकार्थयोः पुनः ।
तासेः सकारलोपः स्यात् तासस्त्योरिति सूत्रतः ।।
ध्वमि तासेः सकारस्य भवेल्लोपो धि चेति सः ।
धकारस्य द्वित्वजश्त्वे भवे तामिति केचन ।।
धिचेत्यनेन सिज्लोप एव स्यादिति यन्मतम् ।
तन्मते ध्वमि तासेस्तु सकारस्य दकारता ।।
भवेज्झलां जश् झशीति रूपभेदो हि नानयोः ।
धातुः सेट् चेत् तदुक्तेन सूत्रेणेडागमो भवेत् ।।
पुनर्धातुरिगन्तश्चेत् सार्वधात्वादिना गुणः ।
लुधूपधो यदिगुणः पुगन्तेत्यादिना भवेत् ।।
पुनरेचोऽयवायाव इति स्यात् सति सम्भवे ।
आथामित्यादि पञ्चानां टेरेत्वं टित आदिना ।।
इट एत्वं ह एतीति तासेः सस्य हकारता ।। इति ।।

'अनद्यतने लुङि'ति धातोर्लुट्प्रत्ययः लस्य तिबादयः 'स्यतासीलृलुटो' रिति धातोः परत्वेन तासिप्रत्यः तासेरिदित्करणं तु अनुनासिकलोपप्रतिषेधार्थम् इकार उच्चारणार्थः इति केचित्

'लुटः प्रथमस्य डारौरस' इति परस्मैपद आत्मनेपदेच प्रथमपुरुष स्यैकादिवचनानां यथाक्रमं डारौरस इत्येत आदेशः डकारष्टिलोपर्थः थासः स

इति 'थाप्तः से' इत्ययमादेशः उभयत्रापि मध्यमैकवचने 'तासस्त्योर्लोप' इति तासेः सकारस्य लोपः ध्वमि थासेः सकारस्य 'धि चे' ति लोपः धकारस्य द्वित्वजश्च्त्वे च येषां धिचे ति सिलोप एवः न त कारमात्रस्येति तत्पक्षः तत्पक्षेऽप्यत्र सकारस्यान्तरतम्याज्जशत्वेन दकारे रूपभेदः धातुः सेट् से च् त् तासेरिडागमः गुणसम्भवे तदुक्तेन सूत्रेण गुणावादेशादयः । आथामित्यादीनां पञ्चानां टित इट एत्वे कृते तासेः सकारस्य ह एती ति हकारादेशः ।

भूरेधिर्नन्दतिर्ध्वंसिर्मत्तिवृङ्तनयो दिविः ।
लुटिसेटो ह्यमी शीङ् च ग्रहिचोर्यर्चिपालयः ।।
इति त्रयोदशामीषामार्धधात्वादिनेङ्विधिः ।
स्वरतीत्यादिनाश्नोतेर्लुटि षूङ्श्चवेङ्विधिः ।।
त्रयस्त्रिंशति धातूनामनिटोऽष्टादशापरे ।। इति ।।

भूसत्तायाम् एध वृद्धौ टुणादि समृद्धौ ध्वन्सु गतौ च मनु अव बोधने वृङ् सम्भक्तौ तनु विस्तारे दिवु क्रीडा गतिषु शीङ्स्वप्ने, ग्रह उपादाने चुरस्तेये पाल रक्षणे अर्च पूजायमित्येतेत्रयोदश धातवो लुटि नित्यं सेटः एषामा'र्धधातुकस्ये'ति इडागमः अशू व्याप्तौ षूङ् प्राणिप्रसव इत्यनयोः 'स्वरतिसूती'त्यादिना वेट्, इटागमः धातूनां त्रयस्त्रिंशति एभ्यः पञ्चदशभ्योऽन्येऽष्टादश धातवो लुट्यनिटः।

भू, 'अनद्यतने लुट्' भूल् लस्य तिबादयः भूतीत्यादि, स्यातासी लृलुटोः धतोस्तासि प्रत्ययः इकार उच्चारणार्थ इति केचित् भू तास् तीत्यादि 'लुटः प्रथमस्ये'ति प्रथम पुरुषस्य वचनानां क्रमेण डारावादयो भवन्त्यादेशः डकारष्टिलोपार्थः। भूता तस् तासि, भूतास् तस् रौ भूतास् रौ, 'रिचे' ति सकारलोपः भूतारौ इट गुणावादेशौ भवितारौ भूतास् झि रस् भूतास् रस् सलोपः भूतारस् गुणावदेशे भवितारस् रुत्वविसर्गौ भवितारः भूतास् सि तासस्त्योर्लोपः इति पूर्वसकारस्य लोपः भूतासि इड् गुणावादेशः भवितासि भवितास्थ भवितास्थ, भवितास्मि भवितास्वः भवितास्मः ।

एध् 'अनद्यतने लुट्' लस्य तङ् स्यातासी लृलुटोरि ति तासिः एध् तास् त 'लुट प्रथमस्य' इति डा आदेशानन्तरं प्रत्ययत्वात् चुटू इतीत्संज्ञा सकारलोपः एध् तास् त 'आदे'रिति टिलोपः एध् तास् आताम् 'लुटः प्रथमस्ये'ति रौ, एध् तास् रौ 'रिचे' ति सस्य लोपः एध् तारौ इट् एधितारौ एध् झ तासिः एध् तास् झ रस् एध् तास् इस् 'रिचे' ति स्स्य लोपः एधितारस् इट् एधितारः 'थासः से' एध् से 'तासस्त्यो' रिति पूर्व सकारस्य लोपः इट् एधितासे एध् आथास् तासिः एध् तास् आथाम् इट् एधितासाथाम् टेरेत्वम् एधितासाथे, एध् तास् ध्वस् इट् एधितास् ध्वम् 'धिचे' तिराकारलोपः एधिताध्वम् धस्य द्वित्वजश्त्वे, एधिताध्वम् टेरेत्वम् एधिताध्वे अथवा एधितास् ध्वमिति स्थिते 'झला' मित्यादिना सस्य जश्त्वे सत्यान्तरतम्याद्दकारः, एधिताद् ध्वम् एधिताद्ध्वम् । टेरेत्वम् एधिताध्वे, एध् इ स्यातासी ति तासिः एध् तास् इ इडागमः । एधितास् इ टेरेत्वम् एधितास् ए हु एती ति सस्य हकारादेशः । एधिताहे एधितास्वहे एधितास्महे एवमुत्तरत्रापि नेयम्।

अस्माद्यत्र विशेषो यस्तत्र सोऽपि विधीयते ।
पचिर्वचिर्भुजिस्तद्वद् युजिश्च मुचिरित्यपि ।।
पञ्चानामिह कुत्वं स्याच्चो कुरित्यमुना हि तत् ।
भुजेर्युजेश्चापि पुनश्चर्त्वं च खरि चेति तत् ।।
पञ्चस्वेषु ककाराणां द्वित्वं चानचि चेति तत् ।। इति ।।

पच् त आ 'चोः कुः' पक्तारौ पक्तारः पक्तासीत्यादि । पक्ता पक्तारौ पक्तारः पक्तासे पक्तसाथे पक्ताध्व इत्यादि । नन्दिता नन्दितारावित्यादि ध्वंसिता ध्वसितारौ ध्वसितारः ध्वंसितासे ध्वंसितासाथे ध्वंसिताध्व इत्यादि,

व्येञस्त्वादेच इत्यात्वं प्रत्यये विषयेऽशिति ।। इति ।।

व्ये, 'आदेच' इत्यादत्वम् व्या, पुनः क्रमेण लुडादयः व्याता व्यातारौ व्यातारः व्यातासि, व्यातासे व्यातासाथ इत्यादि ।।

अदेस्तु देश्चत्त्वं स्यात् खरि चेत्यमुना हि तत् ।। इति ।।

अद् त् आ अद् ता खरिचे ति दकारस्य चर्त्वम् अता अत्तारवित्यादि, शी लुडादयः शीत् आ इट् शी इत् आ 'सार्वधातुकार्धधातुकयो' रिति गुणः शे इत् आ अय् शयिता शयितारौ शयितार इत्यादि,

ब्रुवो वचिः वच् पुनः क्रमेण लुडादयः वच् त् आ 'चोः कुः' वक्ता वक्तारौ वक्तारः वक्तासि वक्तासे वक्तासाथे इत्यादि, हुत् आ 'सार्वधातुके' ति गुणः होता होतारौ होतार इत्यादि, होता होतारौ होतारः होतासे होतासाथे होतध्व इत्यादि । धाता धातरौ धातारः धतासे धातासीत्यादि प्रणिधाता दाधाध्वदावि ति घुसंज्ञायां 'नेर्गदनदपतपदे' त्यादिना न स्य णत्वम् प्रणिधाता प्रणिधातारावित्यादि 'नेर्गदनदपत पदघुमास्यति हन्तियाति वातिद्रातिप्साति वहतिशाम्यतिचिनोतिदेग्धिषु च', ५-४-१७ उपसर्गस्थान्निमित्तस्य नेर्नकारस्य णकारादेशो भवति गदादिषु परतः ।

दिव् इत् 'पुमन्तलघूपधस्य चे' ति गुणः देविता देवितारौ देवितारः देवितासि देवितास्थः देवितास्थ देवितास्मि देवितास्वः देवितास्मः ।

सू, स्वरत्यादित्वाद्विभाषितेट् सू इ ति आ सूत् आ 'सार्वधातुकेति' गुणः सो इता सोता तत्राव् सविता सवितारावित्यादि । अनिटि सोता सोतारौ सोतार इत्यादि,

नह्, धत्वं नहो हकारस्य नहो ध इति वै पुनः ।
झषस्तथोर्धोऽध इति तकाराणां धकारता ।।
तत्र पूर्वधकाराणां झलां जश् झशि जश् भवेत् ।। इति ।।

नह् त् आ 'नहो ध' इति हकारस्य धकार धकारः नध् त् आ झषस्तथोर्घोऽध इति तकारस्य धकारः नध् ध् आ झला मिति पूर्वधकारस्य जश्त्वं दकारः नद् ध् आ नद्धा नद्धारौ नद्धारः नद्धासि, नद्धा नद्धारौ नद्धारः नद्धासे नद्धासाथे नद्धाध्व इत्यादि,

सु त् आ सार्वधातुके तिगुणः सोता सोतारावित्यादि,
अश्नोतेरिड्भावेतु षत्वं व्रश्चादिना पुनः ।
ताकराणां भवेत् ष्टुत्वं ष्टुना ष्टुरिति सूत्रतः ।। इति ।।

अश् त् आ 'स्वरति' त्यादिना वेट् सेटि अशिता अशितारौ अशितारः अशितासे, अनिटि अश् त् आ व्रश्चादिना षत्वम् अष् त् आ 'ष्टुना ष्टु' रिति ष्टुत्वम् अष्टा अष्टारौ अष्टार इत्यादि,

चित् आ 'सार्वधातुके' तिगुणः चेता चेतारौ चेतारः चेतासि, चेताचेतारौ चेतारः चेतासे चेतासाथे चेताध्व इत्यादि ।

तुद् त् आ 'पुगन्ते' ति गुणः तोद् त् आ 'खरि चे' ति चर्त्वं तः । तोत्ता तोत्तारावित्यादि,

मृ, 'अचो रहाभ्या'मिति द्वित्वं स्यात् तकाराणां मृङः कृञः ।। इति ।।

मृत् आ गुणः द्वित्वम् मर् त् आ मर्त्ता मर्त्तारावित्यादि, मुच् त् आ चोरिति कुत्वम् द्वित्वम् मोक्ता मोक्तारावित्यादि,

रुधेर्झषस्तर्थोर्धोऽधस्तकाराणं धकारता ।
तत्र पुर्वधकारणां झलां जशिति जश् भवेत् ।।
पुनः पुगन्तलघ्वादिसुत्रेणेह गुणो भवेत् ।। इति ।।

रुध् त् आ 'झष' इति ताकराणां धकारः रुध् ध् आ 'झला'मिति पूर्वधकाराणां दः । रुद् ध आ गुणः रोद्धा रोद्धारौ रोद्धारः, रोद्धासि रोद्धासे रोद्धासाथ इत्यादि,

भुज् त् आ 'चोः कः' भुज् ग् आ, भुग् त् आ 'खरि च' भुक् त् आ 'अनचि च' 'पुगन्तेति' गुणः भोक्ता भोक्तारौ भोक्तारः भोक्तासि भोक्ता भोक्तारौ इत्यादि, युज् त् आ 'चोः कुः' युग् त् धा 'खरिच' युक् त् आ 'पुन्तेति' गुणः,

'अनचिच', योक्ता योक्तारौ योक्तासि, योक्तास इत्यादि, तनिता तनितारौ तनितारः तनितासि सनिता मनितारावित्यादि, कृत् आ 'सार्वधातुके' ति गुणो रपरः कर् त् आ तकारस्य द्विः, कर्त्ता कर्त्तारौ क र्त्तारः, कर्त्तासि कर्त्तासे कर्त्तासाथ इत्यादि, क्री त् आ गुणः क्रेता क्रेतारौ क्रेतारौ क्रेतारः क्रेतासि, इत्यादि, वृङ्सत्विटो वा दीर्घः स्याद् वृतो वेत्यमुना हिसः ।। इति ।।

वृ इ त् आ वृतो वे तीटो वा दीर्घः वृ ई त् आ 'सार्वधातुके' ति गुणः रपरः वर् ई ता वरीता वरीतारौ वरीतारः वर् ई ता वरीतारौ वरीतारः वरीताम इत्यादि, वरिता वरितारावित्यादि,

'ग्रहोऽलिटी'ति दीर्घः स्यात् ग्रहिधातोरिटश्च सः इति ।ग्रह् इत् आ दीर्घः, ग्रहीता ग्रहीतारावित्यादि ग्रहीतासीत्यादि,

सनादिधतुसंज्ञान्तं प्राग्वदेव चुरादिषु ।
प्राक्रिया स्यादिहोक्तेन मार्गेणैव ततः परम् ।। इति ।।

चुर् 'सत्यापपाशे' त्यादिना स्वार्थे णिच् चुर् इ 'पुगन्ते' ति गुणः । चोरि, 'सनाधन्ता धातव' इति धातुसंज्ञायाम् 'अनद्यतने लुट्' चोरि ल् लस्य तिबादयः चोरि ति 'स्यतासी' ति तासिः चोरि तास् ति लुटः डारौरसः चोरितास् आ 'टे' रिति टिलोपः चोरित् आ इट् चोरिइत् आ, गुणः चोरे इता अय् चोरयिता एवं पालयिता अर्चयिता च ,तयोः 'पुगन्ते'ति गुणो न संभवतीत्येव विशेषः । चोरयिता चोरयितारावित्यादि, पालयिता पालयितारावित्यादि अर्चयिता अर्चयितारावित्यादि आत्मनेपदे अर्चयिताअर्चयितारावित्यादि । इति लुट् प्रक्रिया।।

अथ लृङ्प्रक्रिया।

अभविष्यत् अभविष्यतां अभविष्यन्नित्यादि 'लिङ्नमित्ते लृङ् क्रियातिपत्तौ' ३-३-१३९ 'हेतुहेतुमतोर्लिङि' त्येवमादिर्लिङ्निमित्तम् हेतुः कारणम् हेतुमत् फलम्

तस्मिन् लिङ्निमित्ते भविष्यति काले वर्त्तमानाद् धातोर्लृङ्प्रत्ययो भवति क्रियातिपत्तौ सत्याम् दक्षिणेन चेदयास्यत् न शकटं पर्याभविष्यत् अभोक्ष्यत भवान् घृतेन यदि मत्समीप आसिष्यत ऐधिष्यत, अपक्ष्यत अनन्दिष्यदित्यादि नेयम् ।

अथातो लृङि वक्ष्यामि पदानयनपद्धतिम् ।
लिङ्निमित्ते लृङिति च भूते चेति च सूत्रतः ।।
धातोर्लृङ्प्रत्ययः पश्चाल्लस्य स्थाने तिबादयः ।
धातो स्यप्रत्ययः पश्चात् स्यतासी लृलुटोरिति ।।
धातुः सेट् चेत् स्यशब्दस्य यथान्यायमिडागमः ।। इति ।।

'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' 'भूतेचे' ति धातोर्लृङ्प्रत्ययः लस्य तिबादयः 'स्यतासी' ति धातोः स्य प्रत्ययः लृ इति लृङ् लृटोरुत्सृष्टानुबन्धयोः सामन्येन ग्रहणम् धातुः सेट्चेत् तदुक्तेन सुत्रेणेस्य इत्यस्येडागमो भवति ।

भूरेधिर्नन्दतिर्ध्वं सिर्मनिस्तनिरथो दिविः ।
शीङ् ग्रहिश्चाथ चोर्यर्चिपालयो द्वादशेति ये ।।
स्यादार्धधातुकस्येडित्यादेनौषामिडागमः ।
मृङः क्रञो वृङ्श्च स्यादृद्धनोः स्य इतीड्विधिः ।।
इति पञ्चदशानां च लृङि नित्यमिडागमः ।
स्वरतीत्यादिनाश्नोतेर्लुङि षूङश्च वेड्विधिः ।।
त्रयस्त्रिशतिधातूनां लृङ्यन्ये षोडशोनिटः ।
इड्विभागस्त्वेवमेव लृट्यपीह भविष्यति ।। इति ।।

भूसत्तायाम् एध वृद्धौ टुणादि समृद्धौ ध्वन्सु गतौ च मनु अवबोधने तनु विस्तारे दिवु क्रीडा गतिषु शीङ्स्वप्ने ग्रह उपादाने चुर स्तेये अर्च पूजायाम् पाल रक्षणे इति द्वादशानामार्धधातुकस्येतीट् मृङ् प्राणत्यागे डुकृञ् करणे वृङ् सम्भक्तावित्येतेषां त्रयाणां 'ऋद्धनो स्ये' ७-२-७० इतीट् लृङिति पञ्चदशानां नित्यमिट् अशूव्याप्तौ षूङ् प्राणिप्रसवे इत्यनयोः स्वरती त्यादिना वेट् धातूनां

त्रयस्त्रिंशति एभ्य सप्तदशभ्योऽन्ये षोडशधातवो लृङ्यनिटः लृट्यप्येवमेवेड्विभागः 'ऋद्धनोः स्येः' ७-२-७० । ऋकारन्तानमङ्गानां हन्तेश्च स्ये परत इडागमो भवति ।

पुनर्धातुरिगन्तश्चेत् सार्वधात्वादिना गुणः ।
लघूपधो यदि गुणः पुगन्तेत्यादिना भवेत् ।।
पुनरेचोऽयवायाव इति स्यात् सति सम्भवे ।
झोऽन्तश्चातो गुणे चेति झस्य झेश्च भवेद् द्वयम् ।।
स्यात् तिबन्तिसिपामेर्लुगितश्चेत्यमुना हि सः ।
संयोगान्तस्य लोपोऽन्तेरमि पूर्वः परे त्वमि ।।
आतो ङितश्च लोपो व्योराद्गुणश्चात्मनेपदे ।
सूत्रत्रयं द्व्यर्थयोःस्यादिटि चाप्याद्गुणो भवेत् ।।
अतो दीर्घो यञीति स्यात् पदयोरुभयोरपि ।
उत्तमद्व्यर्थबह्वर्थयोश्चैवायं लृङीष्यते ।।
स्यशब्दस्येण्कवर्गाभ्यामुत्तरत्वे षकारता ।। इति ।।

भू, 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' 'भूते चे' ति धातोर्लुङ्प्रत्ययः लस्य तिबादयः भूल् भूति 'स्यतासी'ति स्यप्रत्ययः भूस्य तीत्यादि आर्धधातुकस्येति स्यशब्दस्येट् भू इस्य ति, 'सार्वधातुकार्धधातुकयो' रिति गुणः भो इ स्य ति अवादेशः । भविस्यति, 'आदेशप्रत्यययो' रिति षत्वम् भविष्यति, तस्थस्थमिपां क्रमेण तान्तन्तामः झेरन्तादेशः 'अतोगुण' इति पररूपत्वम् भविष्यति भविष्यन्ति भविष्यसीत्येषां त्रयाणां 'इतश्चे' तीकारलोपः भविष्यन्त इत्यत्राङ्गस्याडागमः तकारस्य संयोगन्त लोपः भविष्य अमित्यत्र 'अमिपूर्व' इति पूर्वरूपत्वम् वस्मसो परत 'अतो दीर्घो यञी' ति दीर्घ 'नित्यमिति' वस्मसोः सकारस्य लोपः अभविष्यन्नित्यतोऽन्यत्र 'लुङ् लङ् लृङ्ष्वडुदात्त' इत्यङ्गस्याडागमः अभविष्यत् अभविष्यतां अभविष्यन्नित्यादि,

एध् ल् लस्य तङ् एध् त 'स्यतासी' ति स्यप्रत्ययः एध् स्यत इट् एधिस्यत षत्वम् एधिष्यत अङ्गानामाड्वृद्धी, ऐधिष्येतां ऐधिष्यन्तेत्यादि, एवमुत्तरत्रापि नेयम् ।

अस्माद्यत्र विशेषो यस्तत्र सोऽपि विधीयते ।
पचिर्वचिर्भुजिस्तद्वद्युजिश्च मुचिरित्यपि ।।
पञ्चानामिह कुत्वं स्याच्चोः कुरित्यमुना हि तत् ।
भुजेर्युजेश्चापि पुनश्चर्त्वं च खरिचेति तत् ।।
पञ्चस्वेषु ककाराणां द्वित्वं चानचि चेति तत् ।। इति ।।

पच् स्य ति चोः कुः अपक्ष्यत् अपक्ष्यतामित्यादि अपक्ष्यत अपक्ष्येतां अपक्ष्यन्तेत्यादि अनन्तिष्यत् अनन्दिष्यतामित्यादि । अध्वंसिष्यत अध्वंसिष्येतामित्यादि,

'एत आत्वं भवेद् व्येञः प्रत्यये विषयेऽशिति' ।। इति ।।

अव्यास्यत् अव्यास्यतां अव्यास्यन्नित्यादि अव्यास्यत अव्यास्येतां अव्यास्यन्तेत्यादि,

'अदेस्तु दे रुधेस्चापि चर्त्वं स्यात् खरिचेति तत्' ।। इति ।।

आत्स्यत् आत्स्यतां आत्स्यन्नित्यादि शी इ स्यत गुणायदेशौ अशयिष्येत अशयिष्येतां अशयिष्यन्तेत्यादि,

आर्धधातुकसंज्ञेतु प्रत्ययेऽथ विवक्षिते ।।
ब्रुवो वचिरिति प्रोक्तो वच्यादेशो भवेद् ब्रुवः ।। इति ।।

वच् स्य ति 'चोः कुः' चोः कुः अवक्ष्यत् अवक्ष्यतां इत्यादि, अवक्ष्यत अवक्ष्येतां इत्यादि,

हु स्यति 'सार्वधातुकेति' गुणः अहोष्यत् अहोष्यत् अहोष्यतां अहोष्यन्नित्यादि, अहास्यत अहास्येतां इत्यादी अधास्यत् अधास्यतामित्यादि, दिव् इ स्य ति 'पुगन्ते' ति गुणः अदे विष्यत् अदेविष्यतामित्यदि । सू स्यत 'स्वरती' त्यादिना विकल्पेन इ, सू इ स्य त 'सार्वधातुके' तिगुणः, अवादेशः असविष्य असविष्येतामित्यादि अनिटि विषयेऽवादेशे न स्यात् असोष्यत असोष्येतां इत्यादि ।

'धत्वं नहो हकारस्य नहो ध इति चर् पुनः' ।। इति ।।

नह स्य ति 'नहोध' इति हकारस्य धकारः 'खरिचे' वि चर्त्वञ्च अनत्स्यत् अनस्यतो इत्यादि अनत्स्यत अनत्स्यत इत्यादि, सुस्यति 'सार्वधातुकेति' गुणः असोष्यत् असोप्यतामित्यादि, 'अश् अदित्वङ्विकत्प अश्नोतेरिङ्भावेतु षत्वं व्रश्चादिना पुनः' ।। इति ।।

अश स्य ति 'षढो कः सी' ति सूत्रेण षकारस्य ककारता इति सेटि आशिष्या आशिष्ये तामित्यादि आक्ष्यत आक्ष्येतामित्यादि, चिस्यति 'सार्वधातुके' ति गुणः अचेष्यत् अचेष्यता मित्यादि । अचेष्यत अचेष्येतां इत्यादि,

तुद् स्यति 'पुगन्ते' तिगुणः तोद् स्यति 'खरिचे' ति चर्त्वम् अतोत्स्यत् अतोत्स्यतां इत्यादि, मृस्य ति 'ऋद्धनोः स्य' इती मृ इ स्य ति 'सार्वधातुके' ति गुणो रपरः मर् इ स्य ति मरिस्यति अमरिष्यत् अमरिष्यतां इत्यादि,

मुच् स्यति 'पुगन्ते' ति गुणः मोच् स्य ति, चोः कुः षत्वं अमोक्ष्यत् अमोक्ष्यतां अमोक्ष्यत अमोक्ष्येतां इत्यादि, रुध् स्यति, 'पुगन्ते' ति गुणः 'खरि चे' ति चर्त्वम्, अरोत्यत् अरोत्यतां इत्यादि, अरोत्स्यत अरोत्स्येतां इत्यादि,

भुज् स्य ति, 'पुगन्ते' ति गुणः भोज् स्य ति 'चोः कुः' 'खरिचे' ति चर्त्वं अभोक्ष्यत् अभोक्ष्यतां अभोक्ष्यत अभोक्ष्येता मित्यादि अयोक्ष्यत् अयोक्ष्यतां इत्यादि अयोक्ष्यत अयोक्ष्येतामित्यादि,

अतनिष्यत अतनिष्येतामित्यादि अमनिष्यत अमनिष्येतामित्यादि, कृ स्य ति 'ऋद्धनोः स्ये' इति इडागमः कृ इ स्य ति 'सावधातुके' ति गुण रपरः कर् इ स्यति करिष्यति अकरिष्यत् अकरिष्यतामित्यादि, अकरिष्यत अकरिष्येतामित्यादि,

क्री स्य ति 'सार्वधातुके' ति गुणः अक्रेष्यत् अक्रेष्यतामित्यादि, वृङस्त्विटो वा दीर्घः स्याद् वृतो वेत्यमुना हिसः ।। इति ।।

'वृ स्यत, 'ऋद्धनो स्य'ती डागमः वृ इस्यत 'वृतो वे' तीटो वा दीर्घः 'सार्वधातुके'तिगुणो रपरः वर् ई स्य वर् इस्यत, अवरीष्यत अवरीष्येतां अवरीष्यन्त अवरिष्यत अवरिष्येतां इत्यादि,

'ग्रहो ऽलिटीति दीर्घः स्याद् ग्रहिधातो रिटश्च सः' ।। इति ।।

ग्रह् स्य ति 'आर्धधातुकस्ये' तीट् ग्रह् इ स्य ति 'ग्रहोऽलिटी' ति इटो दीर्धः अग्रहीष्यत् अग्रहीष्यताम् इत्याह अग्रहीष्यन् अग्रहीष्यतेत्यादि, सनादिधातुसंज्ञान्तं सार्वधातुकवल्लृडि । प्रक्रिया स्यादिहोक्तेन मार्गेणाथ चुरादिषु।।

चुर् 'सत्यापपाशे' ति स्वर्थे णिच् चुर् इ 'पुगन्ते' ति गुणः चोरि 'सनाद्यन्ता धातव' इति धातुसंज्ञायां 'लिङ्निमित्ते' त्यादिना लृङ् चेरिल् लस्य तिबादयः चोरिति 'स्यतासी' ति स्यप्रत्ययः चोरिस्यति 'आर्धधातुकस्येडि'ति इडागमः चोरिट् स्यति 'सार्वधातुके' ति गुणः चोरे इ स्यति अयादेश अचोरयिष्यत् अचोरयिष्यतां अचोरयिष्यतां अचोरयिष्येतामित्यादि, पाल्यर्च्योः 'पुगन्ते'ति गुणो न सम्भवति अर्चेस्त्वाड्वृद्धी स्यातामित्येव विशेषः अन्यत् सर्वं चुरिवत् अपालयिष्यत् अपालयिष्यतां अपालयिष्यत् अपालयिष्यतां अपालयिष्यत अपालयिष्येतां इत्यादि, आर्चयिष्यत् आर्चयिष्यतां आर्चयिष्यत आर्चयिष्येतां आर्चयिष्यन्तेत्यादि । **इति लृङ् प्रक्रिया ।।**

अथ लृट् प्रक्रिया

भविष्यति भविष्यतः भविष्यन्ति 'तुमुन्वुलौ क्रियायां क्रियार्थया' मिति वर्त्तमाने 'लृट्छेषे च' ३-३-१३ शेषः क्रियर्थोपपदादन्य उच्यते, शेषे शुद्धे भविष्यिति काले धातोर्लृट् प्रत्ययो भवति, चकारात् क्रियार्थायां क्रियायां चोपपदे, 'स्यतासी लृलुटोरि' ति स्यप्रत्ययः, एधिष्यते पक्ष्यत इत्याद्यशेषं सप्रपञ्चं समुन्नेयम् ।

लृटि तावत् प्रवक्ष्यामि पदानयनपद्धतिम् ।
लृट् छेषे चेति सूत्रेण धोतोर्लृट् प्रत्यये कृते ।।
तिप्तस्झीत्यादिना पश्चाल्लस्य स्थाने तिबादयः ।
परं स्यप्रत्ययो धातोः स्यतासी लृलुटोरिति ।।
धातुः सेट् चेत् स्यशब्दस्य यथान्यायमिडागमः ।
यथा लिङि तथैवेह लृट्यपि स्यादिडागमः ।।
पुनर्धातुरिगन्तश्चेत् सार्वधात्वादिन गुणः ।
लघूपदधो यदिगुणः पुगन्तेत्यादिना भवेत् ।।
पुनरेचोऽयवायाव इति स्यात् सति सम्भवे ।
झोऽन्तऽश्चातो गुणे चेति झस्य झेश्च भवेद् द्वयम् ।।
आतो ङितश्च लोपो व्योराद्गुणश्चात्मनेपदे ।
सूत्रत्रयं द्व्यर्थयोः स्यादिति चाप्याद्गुणो भवेत् ।।
धातुः सेट् स्यादतो दीर्घो यञीत्युत्तमयोर्भवेत् ।
तत्र त्रिषु परस्मै स्याद्वहिमह्योरथात्मने ।।
स्यशब्दस्येण्कवर्गाभ्यामुत्तरत्वे षकारता ।
टित आत्मन इत्येत्वमिटं थासं विना लृटि ।।
पच्यादीनां विशेषोऽत्र स्याल्लृङ्युक्तवदेव हि ।
अस्माद्यत्र विशेषो यस्तत्र सोऽपि विधीयतेम् ।। इति ।।

भू लृट् भू ल् लस्य तिबादयः भूतित्यादि 'स्यतासी' ति धातोः स्यप्रत्ययः भूस्यति 'आर्धधातुकस्येड्वलादेरि'तीडागमः भू इ स्य ति 'सार्वधातुकार्धधातुकयो' रिति गुणः भो इ स्यति अवादेशः भविस्यति 'आदेशप्रत्यययो'रिति षत्वम् भविष्यति । अत्र भविष्येति प्रकृतिः झेर्झस्य च 'झोऽन्त' इत्यन्तादेशः 'अतोगुण' इति पररूपत्वं च आतामाथामित्यनयोः 'आतोङित' इत्याकारस्येय 'लोपो व्योर्वली'ति यकारलोपः अनयोरिटि च 'आद्गुण' इति गुणः थासः से आदेशः परस्मैपदोत्तमे वहिमह्योश्च 'अतो दीर्घो यञी' ति दीर्घः सकारस्येण्कवर्गाभ्यामुत्तरत्वे 'आदेश प्रत्यययो' रिति षत्वम् थासमिटं च विना सर्वत्र 'टित आत्मनेपदानां टेरे' इत्यात्मनेपदे टेरेत्वम् भविष्यति भविष्यतः इत्यादि एधिष्यते एधिष्येते इत्यादि,

पच् स्यति 'चोः कुः' पक्ष्यति पक्ष्यतः पक्ष्यते पक्ष्येत इत्यादि नन्दिष्यति नन्दिष्यत इत्यादि, ध्वंसिष्यते ध्वंसिष्येते इत्यादि, व्यस्यति व्यास्यत इत्यादि,

अद्स्यति 'खरि च' अत्स्यति अत्स्यत इत्यादि शी ई स्य ति 'सार्वधातुके' ति गुणः रो ई स्य त अयादेशः शयिष्यते शयिष्येते इत्यादि वच् स्य ति 'चोः कुः' वक्ष्यति वक्ष्यतः इत्यादि, वक्ष्येत इत्यादि,

हु स्यति 'सार्वधातुके' ति गुणः होष्यति होष्यतः इत्यादि, हास्यते हास्येत इत्यादि धास्यति धास्यत इत्यादि, धास्यत इत्यादि, दिव् स्यति 'पुगन्ते' ति गुणः देविष्यति देविष्यतः दे इत्यादि सूस्यत खरत्यादित्वाद्विभाषितेट् सू इ स्यतः सूस्यत, उतभयत्रापि 'सार्वधातुके' ति गुणः सेटयवादेशश्च सविष्यते सविष्येत इत्यादि अनिटि सोष्यते सोष्येत इत्यादि नह् स्यति 'नहो ध' इति हकारस्य धकारः नध् स्य ति नत्स्यति नत्स्यत इत्यादि, नत्स्यते नत्स्येते इत्यादि,

सुस्यति 'सार्वधातुके' ति गुणः सोष्यति सोष्यत इत्यादि अश् ऊदित्वादिडिवकल्पः तत्र सेटि अशिष्यते अशिष्येते अशिष्यन्ते, इत्यादि, अनिटि अश् स्यत 'व्रश्चा'दिना षत्वम् अष् स्यत 'षढोः कः सी'ति षकारस्य ककारः

अक् स्यत 'आदेशे' ति षत्वम् अक्ष्यते अक्ष्येते इत्यादि चिस्यति 'सार्वधातुके' ति गुणः चेष्यति चेष्यन्तीत्यादि चेष्येते इत्यादि,

तुद् स्य तिः 'पुगन्ते' ति गुणः 'खरि चे' ति तोत्स्यति तोत्स्यत इत्यादि मृ स्य ति, 'सार्वधातुके' ति गुणा रपरः मरिस्यति षत्वम् मरिष्यति मरिष्यत इत्यादि ,मुच् स्यति 'पुगन्ते' तिगुणः मोच् स्यति चोः कुः मोक्ष्यति मुक्ष्यतः इत्यादि, मोक्ष्यते मोक्ष्येत इत्यादि,

रुध् स्य ति 'पुगन्ते' ति गुणः 'खरिच' रोत्स्यति रोत्स्यत इत्यादि, रोत्स्यते रोत्स्येत इत्यादि ।भुज् स्य ति 'पुगन्ते' ति गुणः भोज् स्यति, 'चोः कुः' भोग् स्यति 'खरि च' चर्त्वञ्च भोक्ष्यति भोक्ष्यत इत्यादि भोक्ष्यते भोक्ष्येत इत्यादि युज् स्यति इत्यादि योक्ष्यते योक्ष्येत इत्यादि, तनिष्यति तनिष्यत इत्यादि मनिष्यते मनिष्यत इत्यादि कृस्यति 'ऋद्धनोः स्ये' इतीट् कृ इ स्यति 'सार्वधातुके' ति गुण रपरः करिष्यति करिष्यत इत्यादि करिष्यते करिष्येत इत्यादि, क्रि स्य ति 'सार्वधातुके' ति गुणः क्रेष्यति क्रेष्यत इत्यादि ।। वृ स्यत 'ऋद्धनोस्ये' ति इडागमः वृ इ स्यत, 'वृतो वे' तीटो वा दीर्घः उभयत्रापि 'सार्वधातुके' ति गुणो रपरः वर् इ स्यते, वरीष्यते वरीष्येत इत्यादि वरिष्यते वरिष्येते इत्यादि ग्रह् इ स्य ति 'ग्रहोऽलि दीर्घः' ग्रहीष्यति ग्रहीष्यतः इत्यादि ग्रहीष्यते ग्रहीष्येते इत्यादि,

चुर् 'सात्त्यापपाशो' ति स्वार्थे णिच् चुरि 'पुगन्ते' ति गुणः चोरि सनादिधातुसंज्ञायां लृट् चोरि लृट् चोरिल् लस्य तिबादयः चोरिस्यति । 'आर्धधातुकस्ये' तीट् चोरि इ स्यति 'सार्वधातुके' तिगुणः चोरे इ स्य ति अयादेशः षत्वम् चोरयिष्यति चोरयिष्यत इत्यादि चोरयिष्यते चोरयिष्येते इत्यादि पाल्यर्च्योः पुगन्तादिगुणाभाव एव भेदः पालयिष्यति पालयिष्यत इत्यादि, पालयिष्यते पलयिष्येत इत्यादि अर्चयिष्यति अर्चयिष्यतः अर्चयिष्यत इत्यादि ।। इति ।।

इति रूपानयनपद्धत्यां प्रक्रियापरिच्छेदः समाप्तः ।

अथेदानीं भवकर्मणोर्लिडादयः प्रदर्श्यन्ते ।

भाविषीष्ट भविषीष्ट, अनुभाविषीष्ट अनुभविषीष्ट स्यसिच्सीयुट्तासिषु भावकर्मणोरुपदेशेऽज्झनग्रहदशां वा 'चिण्वदिट् च' ६-४-६२ । स्य सिच् सीयुट् तासि इत्येतेषु भावकर्मविषयेषु परत उपदेशेऽजन्तानां धातूनां हनग्रहदृश इत्येतेषां च वा चिण्वत्कार्यं भवति स्यसिच्सीयुट्तासीनामिटागमश्च अचोञ्णिती ति वृद्धिः।।

ये प्रक्रियापरिच्छेदे कर्तृत्वे प्रतिपादिताः ।
ते लकाराः प्रदर्श्यन्ते साम्प्रतं भावकर्मणोः ।।
स्यसिजादिचतुर्ष्वेषु भावकर्मार्थवाचिषु ।
उपदेशे त्वजन्तानां हनग्रहदृशामपि ।।
चिण्वत्कार्यं विकल्पात् स्यात् तेषां नित्यमिडागमः ।
स्याच्चिण्वदिडभावे च हलन्ते चेत् पुरोक्तवत् ।।
भुवः स्याच्चिण्वतोऽन्यत्रेडार्धधात्विति सूत्रतः ।
भूव्येशीहाहुधासूसुचिमृकृक्रीवृणिज्ग्रहः ।।
विकल्पाच्चिण्वदिड्वन्तस्त्रयस्त्रिंशसु धातुषु ।
चिण्वद्भावविहीनानां प्रक्रिया स्यात् पुरोक्तवत् ।।
आत्मनेपदिनः सर्वे धातवो भावकर्मणोः ।। इति ।।

भूसत्तायाम् व्येञ् संवरणे शीङ् स्वप्ने ओहाङ् गतौ हुदानादनयोः । डुधाञ् धारणपोषणयोः षूङ् षुञ् अभिषवे चिञ् चयने मृङ् मरणे डुकृञ् करणे वृङ् सम्भक्तावित्येते त्रयोदश धातवो ह्युपदेशे ङ्गत्वेनोपेशेऽजन्ताः। ब्रुञो वच्यादेशानन्तरमेवाङ्गत्वमिति तस्य हलन्तत्वमेव चुरादीनां तु चिण्प्रत्ययानन्तरमेवाङ्गत्वमिति तेषामजन्तत्वमेव तस्मादजन्ताः षोडशहलन्तेषुग्रह उत्पादन इत्येकश्च ।। त्रयस्त्रिंशत्सु धातुषु भूव्येशी त्यादिनोक्तानां सप्तदशानां स्यसिजित्यादि सूत्रेण विभाषा चिण्वत्कार्यं भवति यत्रचिण्वत्कार्यं तत्र स्यसिच्सीयुट् तासीनां नित्यमिडागम श्च भवति ।

लिङ्

भू, 'आशिषि लिङ्लोडा'विति लिङ् भू ल् भूल् 'भावकर्मणो' १-३-१३ रिति लकारस्य स्थाने आत्मनेपदप्रथमपुरुषैकवचनं त भूत, 'लिङः सीयुट्' इति सीयुडागमः भूसीयुत 'लोपो व्योर्वली'ति यलोपः भू इ सीत 'स्यासिच् सीयुटि'त्यादिना विकल्पेन चिण्वद्भावे सीयुटो नित्यमिडागमः भू इ सीत 'अचो ञ्णिती' ति वृद्धि भौ इ सीत आवादेशः भाविसीत 'सुट् तिथो' रिति तकारस्य सुडागमः अनुबन्धलोपः भाविसीस्त 'अदेशप्रत्ययो'रिति सकारयोः षत्वम् भाविषीष त 'ष्टुना ष्टु'रिति तकारस्य टकारः भाविषीष्ट चिण्वद्भावाभावे भूसीते ति स्थिते 'आर्धधातुकस्ये डलादे'रिति सीयुट इडागमः भू इ सीत सार्वधातुकस्येति गुणः भो इ सीत अवादेशः भविसी त 'सुट् तिथो'रितिसकारस्य सुडागमः षत्वष्टुत्वे भविषीष्ट भावे भाविषीष्ट भविषीष्ट इति कर्मण्यनुपूर्वः अनुभाविषीष्ट अनुभविषीष्ट, अनुभविषीष्ट अनुभाविषीयस्तां अनुभाविषीरन् अनुभाविषीष्ठाः अनुभाविषीयास्थां अनुभाविषीध्वम् अनुभाविषीय अनुभाविषीवहि अनुभाविषीष्ट अनुभविषीयास्तामित्यादि अनुभविषीध्वं अनुभविषीढ्वम् एथिषीष्ट पक्षीष्ट पक्षीयास्तां नन्दिषीष्ट ध्वंसिषीष्ट ध्वंसिषीयास्तां ।व्ये 'आदेच' इत्यात्वम् व्या लिङ् लस्यत व्यात 'लिङः सीयुट्' इति सीयुडागमः वलीति यकारलोपः, व्यासीत स्यसिजिति विकल्पेन चिण्वद्भावे नित्यमिडागमः व्या इसीत 'आतो युक् चिण्कृतो' ७-३-३३ रित्याकारान्तस्याङ्गस्य युगागमः उकार उच्चारणार्थः ककारो देशविध्यर्थः व्याय् इसीत 'सुट् तिथो' रिति तकारस्य सुडागमः व्याय् इसीस् त व्यायिसीस् त षत्वष्टुत्वे व्यायिषीष्ट चिण्वदिडभावे व्यासीतेति स्थिते सुट् तिथो रिति सुट् व्यासीस् त षत्वष्टुत्वे व्यासीष्ट भावे व्यायिषीष्ट व्यासीष्टेति कर्मणि व्यायिषीष्ट व्यायिषीयास्तां व्यासीष्ट व्यासीयास्तामित्यादि, 'आतो युक् चिण्कृतोः' ७-३-३३ आकारान्तस्याङ्गस्य युगागमो भवति चिणि कृति ञिति णिति च प्रत्यये परतः ।

अत्सीष्ट शीत 'सार्वधातुके' तिगुणः शेत सीयुट् वलि लोपः शेसीतेति स्थिते 'स्यसिजि'त्यादिना विकत्पेन चिण्वद्भावे नित्यमिडागमः शे इ सीत

'अचोञ्णिती'ति वृद्धिः श इ त अयादेशः शायिसीत अयादेशः थायिसीत सुट् तिथोरिति सुट् शयिसीस्ते षत्वष्टुत्वे शयिषीष्ट चिण्वदिडभावे रोसीतेति स्थिते 'आत्धधातुकस्ये डि'ति इडागमः शे इसीत अयादेशः शेयिसीत 'सुट् तिथो'रितिसुट् शयिसीसत षत्वष्टुत्वे शयिषीष्ट ।। ब्रू ब्रुवो वचि वच् लिङ् लस्य त इत्यादि वक्षीष्ट वक्षीयस्तामित्यादि, हुत 'सार्वधातुके' ति गुणः होत सीयुट् वलिलोपः होसीत, स्यसिजित्यदिना विलोपना चिण्वद्भावे नित्यमिट् हो इसीत वृद्धिः हौ इसीत अवादेशः हाविसीत सट् हाविसीस् त षत्वष्टुत्वे, हाविषीष्ट चिण्वदिड्भावेः होसीत, सुट् होसीसत षत्वष्टुत्वे च, होषीष्ट ।। धा ओहाङ् गतावित्यत्रोक्तवत् धायिषीष्ट धासीष्ट ।।

देविषीष्ट ।। सूसीत 'सार्वधातुके' तिगुणः सोसीत, चिण्वद्भावे नित्यमिट् सो इसीत'अचोञ्णिती' ति वृद्धिः सौ इ सीत आवादेशः हाविसीत सुट् साविसीस् त साविषीष्ट चिण्वद्भावे सोसीतेति स्थिते 'स्वरतिसती' त्यादिना सो इ सीत अवादेश सविसीत सुट् सविसीस् त षत्वष्टुत्वे साविषीष्ट इ ड्भावे सोषीष्ट तस्मात् साविषीष्ट सविषीष्ट सोषीष्टेति त्रेत्रिधाभवति नत्सीष्ट सुसीत 'सार्वधातुके' तिगुणः सो सीत चिण्वद्भावे नित्यमिट् सो इसत 'अचोञ्णिती ति वृद्धिः सौ इ सीत आवादेशः साविसीत सुटा साविसीस् ता साविषीष्ट चिण्वद्भावे सोसीत सुट् सोसीस त सोषीष्ट अशिषीष्ट अशिषीष्ट अक्षीष्ट चिसीत सार्वधातुके ति गुणः चेसीत चिण्वद्भावे नित्यमिट् चे इ सीत वृद्धिः चै इ सीत आयादेश चायिसीत सुट् चायिसीस् त चायिषीष्ट चिण्वद्भावे चेसीत सुट् चेसीसत चेषीष्ट।।

तुत्पीष्ट मृसीत चिण्वद्भावे नित्यमिट् मृ इ सीत 'अचोञ्णिती'ति वृद्धिः आकारान्तो रपरः मारिसीत सुट् मारिसीष्ट चिण्वदभावे मृसीत 'उश्चेति लिङः कित्वाद् गुणो न भवति मृसीत सुट् मृषीष्ट मुक्षीष्ट रुत्सीष्ट भुक्षीष्ट युक्षीष्ट युक्षीष्ट तनिषीष्ट मनिषीष्ट मृङ्बत् कारिषीष्ट कृषीष्ट क्रिसीत चिण्वद्भावे क्रिसीत 'सार्वधातुके' ति गुणः क्रेसीत सुट् क्रेसीस् त क्रेषीष्ट वृसीत चिण्वद्भावे

नित्यमिट् वृ इ सीत 'अचोञ्णिती' वृद्धिः वार् डासीत वारिसीत सुट् षत्वष्टत्वे च वारिसीस् त वारिषीष्ट चिण्वद्भावे वृसीत' लिङ् सिचोरात्मनेपदे'रिति वेट् वृ इ सीत 'वृतो वे'तीटो वा दीर्घः इति प्राप्ते 'न लिङि' ति प्रतिषेधः वृ इ सीत' सार्वधातुके' ति गुणा रपरः वरिसीत् सुट् वरिसास् त षत्वष्टुत्वे वरिषीष्ट अनिटि वृसीत 'उश्चे' ति कित्वाद् गुणो न स्यात् वृसीत सुट् षत्वष्टुत्वे वृषीष्ट तस्माद् बारिषीष्ट वरिषीष्ट वृसीत सुट् षत्वष्टुत्वे वृषीष्ट तस्माद् वारिषीष्ट वरिषीष्ट वृषीष्टे ग्रह् सीत चण्वद्भावे नित्यमिट् ग्रह् इ सीत 'अचोञ्णिती'ति लृङिः ग्रहिसीतसुद ग्रहिसीस्तषत्वष्टुत्वे ग्रहिषीष्टः चिण्वदभावे ग्रह्सीत 'आर्धधातुकस्ये' तीट् ग्रह् इसीत 'ग्रहोऽलिटि दीर्घे' इटो दीर्घः ग्रहीसीत् सुट् षत्वष्टुत्वे ग्रहीषीष्ट।।

चुर् 'सत्यापपाशे' ति स्वार्थे णिच् चुरि ''पुगन्ते' ति गुणः चोरि सनादिधातुसंज्ञायां 'आशिषी'ति लिङ् चोरिल् 'भावकर्मणो' रित्यात्मनेपदत्वाल्लस्य त चोरित ,सीयुट् वलि लोपः चोरिसीत चिण्वद्भावे नित्यमिट चोरि इसीत 'असिद्धवदत्रासादि' त्यसिद्धवद्भाण'णेरनिटी' तिणेर्लोपः चोर इसीत चोरिसीत सुट् चोरिसीसत षत्वष्टुत्वे चोरिषीष्ट चिण्वद्भावे चोरिसीतेति स्थिते 'आर्धधातुकस्ये'तीट् चोरि इसीत 'आर्धधातुकस्ये 'डि त्यस्याभाच्छास्त्रीयत्वात् 'णेरनिटी' ति णेर्लोपोन भवति चोरि इसीत 'सार्वधातुकर्धधातुकयो' रिति गु'ः चोरे इसीत अयादेशः चोरयिसीत सुट् तियोरिति सुट् चोरयिसीस् त षत्वष्टुत्वे चोरयिषीष्ट एवं पालिषीष्ट पालयिषीष्ट । अर्चिषीष्ट अर्चयिषीष्ट अनयोः 'पुगन्तादि' गुणाभावएवविशेषः। 'असिद्धवदत्राभात् ६-४-२२ आभाच्छास्त्रीये कार्ये कर्त्तव्ये आभाच्छास्त्रीयं कार्यमसिद्धवद् भवति ।। **इत्याशीर्लिङ्** ।।

अथ लिट्

भू 'परोक्षे लिङि'ति लिट् 'भावकर्मणो' रिति लकारस्य स्थाने त भूत 'लिटस्तज्झयोरेशिरिजि'त्येशिरेचौ भूए इत्यादि सेध्वं वहि महीत्येषां चतुर्णं 'आर्धधातुकस्येडि'तीडागमः पुनर्नवसु 'भुवो वुगलुङ्लिटो'रिति भुवो वुगागमः

भूव ए 'लिटि धातो' रिति द्विर्वचनम् । भूव् भूव् ए 'हलादिशेषः' भूभूवे 'ह्रस्व'इत्यभ्यासचो ह्रस्वत्वं भुभूव 'भवतेर' इत्यकारस्योकारः भभूवे 'अभ्यासे चर्चे' ति जश् बभूवे अनेन न्यायेन टुणदि समृद्धावित्यादीनां अन्येषां पूर्वोक्त'लदात्मनेपदान्येव 'इणः षीध्वं लुङ्लिटां धोऽङ्गात्'' विभाषेट' इत्यनयोः सम्भवे यथायोगं ध्वमो मूर्धन्यः भावे बभूवे कर्मणि अनबभूवे अनुबभूवाते इत्यादि अनुबभूविध्वे अनुबभूविद्वे ।

भावकर्मार्थविषये भ्वस्योरस्त्यात्मनेपदम् ।। इति ।।

एधांञ्चक्रे एधाम्बभूवे एधामासे पेचे ननन्दे दध्वंसे विव्ये जक्षे, आदे शिश्ये, ऊचे जुहवाञ्चक्रे जुहवाम्बभूवे जुहवामासे, जुहुवे ,जहे ,दधे, दिदिवे सुषुवे नेहे आनशे चिक्ये चिच्ये तुतुदे मम्रे मुमुचे रुरुधे, मुमुचे रुरुधे बुभुजे युयुजे तेने मेने चक्रे सञ्चस्करे चिक्रिये वव्रे, जगृहे,

चोरयाञ्चक्रे चोरयाम्बभूवे चोरयामासे पालयाञ्चक्रे पालयाम्बभूवे पालयामासे अर्चयाञ्चक्रे अर्चयाम्बभूवे अर्चयामासे ।। **इति लिट्** ।।

अथ लुङ्

भू, 'लुङि'ति लुङ्, भूल् 'भावकर्मणो' रिति लस्य तङ् भूत,' च्लि लुङी'ति धातोः च्लिप्रत्ययः भू च्लि त 'चिण् भावकर्मणो' ३-१-६६ रिति तशब्दे परतश्चलेश्चिणादेशः भूचिण् त अनुबन्धलोपः भू इत 'अचोञ्णिति' इति वृद्धिः भौ इत आवादेशः भावि त' णो लुकि' ६-४-१०४ चिण उत्तरस्य तशब्दस्य लुक् भावि 'लुङ् लङ्लृङ्ष्वि'ति अङ्गानामडागमः अभावि आतामादौ भू च्लि आतामिति स्थिते च्लेः सिजादेशः भू सिच् आताम् भूस् आताम् 'आर्धधातुकस्येडि'तीडागमः भू इस् आताम् 'सार्वधातुके' ति गुणः भो इ साताम् अवादेशः भविसाताम् 'आदेशे' ति षत्वम् अट् अन्वभविषाताम् ध्वमि 'विभाषेट' इति वा मूर्धन्यः भावे अभावि कर्मणि अन्वभावि अन्वभाविषातां

अन्वभाविषातामित्यादि अन्वसाविद्वं अन्वभाविध्वम् अन्वभविद्वं अन्वभविध्वम् । ' चिण् भावकर्मणोः '३-१-६६ भावकर्मवाचिनि तशब्दे परेतः च्ले श्चिणादेशे भवति 'चिणो लुक' ६-४-१०४ चिण उत्तरस्य तशब्दस्य लग् भवति एवमुत्तरत्रापि धातुः 'लुङ्'इति लुङ् 'भावकर्मणो' रित्यात्मनेपदम् लस्य तङ् धातोश्चिलिः ।' चिण् भावकर्मणो' रिति तशब्दे परतश्चे श्चिणदेशः चकारणकारयोर्लोपः वृद्धेः सम्भवे अच इति वृद्धिः अयादेशादिसम्भवेऽचोऽयवायाव इत्यादयः 'चिणोलुगि' ति चिण उत्तरस्य ततब्दस्य लुक् अङ्गस्याट् धातुरजादिश्चेदाङ्वृद्धी प्रथमपुरुषैकवचने सर्वेषां धातूनामेवं प्रक्रियाक्रमः आतामादिषु पूर्वोक्तवत् च्लेः सिच् पुनरजन्तानां धातूनां ग्रहेश्च 'स्यासिच्सीयूडि' त्यादिना विकल्मन चिण्वद्भावः चिण्वद्भावे नित्यमि डागमश्च वृद्धिः 'एचोऽयवायावः ' । यथायोगं षत्वष्टुत्वे ध्वमि 'विभाषेटः' विभाषेटः अङ्गस्याडागमः चिण्वद्भावेधातुः सेट् चेद् 'आर्धधातुकस्ये'ति सिच इडागमः गुणे सति 'सार्वधातुके ति' गुणः सम्भवे' एचोऽयवायावः'। यथायोगं षत्वष्टुत्वे ध्वमि 'इणः षीध्व'मिति' वा विभाषेट' इति वा पूर्ववत क्रमः हलन्तानां धातूनां कर्त्तर्युक्तवदेव ऐधि अपाचि अपक्षाताम् । अनदि अध्वंसि अध्वं सिषाताम् अव्यायि अव्यायिषातां अव्यासाताम् ।। अद भक्षणे अद् लुङ् 'लुङ्सनोर्धस्लि' त्यदेर्धस्लादेशः धस् 'लुङि' ति लुङ् धस् भावकर्मणो रिति लस्य तङ् घस् त च्लिः घस् च्लि त 'चिणू भावकर्मणो रिति च्लेश्चिण् घस् इत 'अचोञ्णिती'ति वृद्धि घासित 'चिणो लुगि' ति तकारस्य लुक् घासि अङ्गस्याडागमः अधासि, घस् आताम् च्लिः 'च्लेः सिच् 'घस् स् आतां 'सस्यार्धधातुक' इति पूर्वसकारस्य तकारः घस् आताम् अट् अघत् साताम् घस् झ 'झस्यात् 'घस् अत च्लिः तस्य सिच् घस् स् अत 'सस्ये'ति पर्वस्य तकारः घत् स् अत अङ्गस्याट् अधत्सत घस् थास् 'च्लि लुङि' तस्य सिच् घस् थास् 'झलो झली' ति सिचोलोपः धस् थास् अत्रसिचो लोपस्यासिद्धत्वात् 'सस्यार्धधातुक' इत्यङ्गस्य सकारस्य तकारादेशः घत् थास् अट् च अधत्याः 'सस्ये' त्यादिना सकारान्तस्यङ्गस्य तकारादेशो भवति सकारादावार्धधातुके परतः अधत्या इत्यत्रसिचो लोपस्यासिद्धत्वात् तकारादेशः।।

अशायि अवाचि अवक्षाताम् अहावि अहाविषातां अहोषाताम् अहायि अहायिषातां अहासाताम् अधायि अधायिषातां अधिषाताम् अदेवि अदेविषाताम् असावि असाविषातां असविषातां असोषाताम् अनाहि अनत्साताम् असावि असाविषातां असोषाताम् आशि आशिषातां आक्षाताम् अचायि अचायिषातां अचेषाताम् अतोदि अतत्साताम् अमारि अमोचि अमुक्षाताम् अरोधि अरात्साताम् अभोजि अभुक्षताम् अयोजि अयुक्षाताम् अतानि अतानिषाताम् अमानि अमानिषाताम् अकारि अकारिषातां अकृषाताम् अक्रायि अक्रायिषातां अक्रेषाताम्। अवारि अवारिषातां अवरीषातां अवरिषाताम् अवृषाताम् । अग्राहि अग्राहिषातां अग्रहिषाताम्।। अचोरि अचोरिषातां अचोरयिषाताम्, अपालि अपालिषातां अपालयिषाताम् आर्चि आर्चि षातां आर्चयिषाताम् **इति लुङ्** ।।

अथ लुट्

भू 'अनद्याने लुट्'ल् भावकर्मणो रिति लस्य तङ् भूत 'स्यतासी लृलुटो' रिति धातोः तासिप्रत्ययः । भूतास् त 'लुटः प्रथमस्य डारौरस' इति प्रथमपुरुषस्यैकवचनद्विवचन बहुवचनानां यथाक्रम डारौरसादयो भवन्त्यादेशः डाकारष्टिलोपः भूतास् अ 'टे' रिति टिलोपः भूत् आ भूता 'स्यसिणि' त्यादिना वा चिण्वद्भावे नित्यमिडागमः भू इता 'अचो ञ्णिती'ति वृद्धिः भौ इता आवादेशः भाविता चिण्वदभावे 'सार्वधातुके' ति गुणः अव् भविता भावे भाविता ,भविता कर्णि अनुभाविता अनुभविता अनुभावितारौ अनुभवितारौ अनुभावितारः अनुभवितार इत्यादि,

एधिता पक्ता, नन्दिता ध्वंसिता व्ययिता व्याता अत्ता शायिता शयिता वक्ता हाविता होता हायिता हाताः धायिता धाता, देविता, साविता, सविता सोता, नद्धा, साविता सोता, अशिता अष्टा चायिता चेता तोत्ता, मारिता मर्त्ता, मोक्ता, रोद्धा भोक्ता, योक्ता, तनिता मनिता कारिता कर्त्ता क्रायिता क्रेता वारिता वरिता वरिता ग्राहिता ग्रहीता चोरिता चोरयिता, पालिता पालयिता, अर्चिता अर्चयिता

।। **इति लुट् प्रक्रिया** ।।

अथ लृङ्

धातुः 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' 'भूते चे' ति धातोर्लुङ् प्रत्ययः 'भावकर्मणो'रिति लस्य तङ् 'स्यतासी' ति धातोः स्यप्रत्ययः अजन्तानां धातूनां ग्रहेश्च 'स्यसिजि' त्यादिना विकत्पेन चिण्वद्भावे नित्यमिट् यथासम्भवं 'अचोञ्णिती' ति वृद्धिः आयादेश आवादेशो वा चिण्वदभावे धातुः सेट् चेत् तत्रोक्तवदिडागमः यथासम्भवं 'सार्वधातुकार्धधातुकयो'रिति गुणः 'एचोऽयवायावः' चिण्वद्भावे तद्भावे च स्येत्यस्येण्कवर्गाभ्यामुत्तरत्व आदेश षत्वम् ।। अभाविष्यत अभविष्यतेति भावे, कर्मणि अन्वभाविष्यत अन्वभाविष्येतां अन्वभाविष्यत अन्वभविष्येतामित्यादि । ऐधिष्यत अपक्ष्यत अनन्दिष्यत अध्वंसिष्यत, अव्यायिष्यत अव्यास्यत आत्स्पत अशायिष्यत अशयिष्यत अवक्ष्यत अहाविषअयत अहोष्यत अहायिष्यत अहास्यत अधायिष्यत अधास्यत अदेविष्यत असाविष्यत असविष्यत असोष्यत अनत्स्यत असाविष्यत असोष्यत आशिष्यत आक्ष्यत अचायिष्यत अचोष्यत अतोत्स्यत अमारिष्यत अमरिष्यत अमोक्ष्यत अरोत्स्यत अभोक्ष्यत अयोक्ष्यत अतनिष्यत अमनिष्यत, अकारिष्यत अभोक्ष्यत अयोक्ष्यत अतनिष्यत अमनिष्यत अकारिष्यत अकरिष्यत अक्रायिष्येत अक्रेष्यत अवारिष्यत अवरीष्यत अवरिष्यत अग्राहिष्यत अग्रहीष्यत अचोरिष्यत अचोरयिष्यत अवरिष्यत अग्राहिष्यत अग्रहीष्यत अचोरिष्यत अचोरयिष्यत अपालिष्यत अपालयिष्यत आर्चिष्यत आर्चयिष्यत ।। **इति लृङ् प्रक्रिया** ।

अथ लृट्

धातुः 'लृट् च्छेषे' ति धातोर्लृट् प्रत्ययः 'भावकर्मणो'रित्यात्मनेपदं तङ्, 'स्यतासी' ति धातोः अजन्तानां धातूनां ग्रहेश्च स्यासिच्सीयुडि त्यादिना विकत्पेन चिण्वद्भावे नित्यमिट् शेषं पूर्ववत् भाविष्यते भविष्यत इति भावे, कर्मणि अन्वभाविष्यते अन्वभविष्यते अन्वभविष्येत इत्यादि एधिष्यते पक्ष्यते पक्ष्येते, नन्दिष्यते ध्वंसिष्यते व्यायिष्यते व्यास्यते, आत्स्यते शायिष्यते शयिष्यते, वक्ष्यते,

हाविष्यते होष्यते हायिष्यते हास्यते धायिष्यते धायिस्यते धास्यते, देविष्यते, साविष्यते सोष्यते नत्स्यते साविष्यते सोष्यते आशिष्यते आक्ष्यते चायिष्यते चेष्यते तोत्स्यते मारिष्यते मरिष्यते मोक्ष्यते रोत्स्यते भाक्ष्यते, योक्ष्यते तनिष्यते मनिष्यते कारिष्यते करिष्यते क्रायिष्यते क्रेष्यते वारिष्यते वरीष्यते वरिष्यते ग्राहिष्यते ग्रहीष्यते चोरिष्यते चोरयिष्यते पालिष्यते पालयिष्यते अर्चिष्यते अर्चयिष्यते इत्यादि ।। **इति लृट** ।।

।। इति चिण्वत्परिच्छेदः ।।

अथ सनाद्यन्तनयः प्रदर्श्यते

भवितुमिच्छति बुभूषति अबुभूषत् बुभूषतुः बुभूषेत् 'गुप्तिसिच्किद्भ्यः सन्नि' ति वर्त्तमानेधातोः कर्मणः समानकर्त्तृकादि च्छायां वा ३-१-७। इषिकर्मायोः धातुरिषिणैव समानकर्त्तृकस्तम्सादिच्छायामर्थे सन्प्रत्ययो भवति, भवितुमिच्छति बुभूषति, भू सत्तायाम् भू 'धातोः च्छयां वे' ति सन्प्रत्ययः भू सन् नकारलोपः प्रयोजनं नोङ्धात्वो रिति विशेषणम् भूस, सन् आर्धधातुकत्वाद् 'आर्धधातुकस्येडि'ति इडागम प्राप्ते सनि ग्रहगुहोश्वे ७-२-१२ तीगन्ताद् धातोः परस्य झलादेः सनः कित्वादन्नगुणः । भूसइण्को रिति षत्वम् भूष 'सन्यङो' रिति द्विर्वचनम् भूषभूव हलादिः शेषः भूभूष ह्रस्वः भूभूष अभ्यासजश्त्वम् बुभूषेति स्थिते 'सनाद्यन्ता धातव' इति धातुत्वसंज्ञायां लडादि पूर्ववत् 'वर्त्तमाने लडि'ति लट, प्त्ययः बुभूषल् लस्य स्थाने तिबादयः बुभूषति 'कर्त्तरि शबि' ति शप् बुभूष अति 'अतो गुण' इति पररूपत्वम् बुभूषति सार्वधातुके बुभूषेति प्रकृतिः बूभूषति बुभूषतः बुभूषन्तीत्यादी ।। सनभावे भवितुमिच्छति लङि अबुभूषत् लोटि बुभूषतु लिङि बुभूषेत् ।

यकि बुभूषेति स्थिते 'भावकर्मणो' रित्यात्मनेपदंत बुभूषत सार्वधातुकेयगि ३-१-६७ ति यक् बुभूष यक् आर्धधातुकत्वाद् अतोलोप इति सनोऽकारस्यलोपः बुभूषयत, आर्धधातुके बूभूषिति प्रकृतिः बभूष् यत, अनचिच बुभूष्यत टेरेत्वम्

बुभूष्यते अबुभूष्यत, किदाशिषी ३-४-१०४ ति लिङो यासुटागमः बुभूष यास् ति इतश्चे तीकारलोपः । बुभूष यास् त् अतो लोप इति सनोऽकारलोपः बुभूष् यास् त् स्कोः सयोगाट्वोरन्ते चे ति सकारलोपः बुभूष् यास् त् स्कोः संयोगाद्योरन्ते चे ति सकारलोपः बुभूष्यात् लिटि कास्प्रत्ययादाममन्त्रे लिटी त्याम्प्रत्यये अतोलोप इत्यकारलोपः शेषं पूर्ववत् बुभूषाञ्चकार बुभूषाम्बभूव बुभूषामास । लुङि अबुभूषीत् लुटि बुभूषिता, लृङि अबुभूषिष्यत् लृटि बुभूषिष्यति । चिण्वदिटि बुभूषिषीष्ट लिटि बुभूषाञ्चक्रे बुभूषिष्यत लृटि बुभूषिष्यते,

इषिकर्म तु यो धातुरिषिणैव सकर्त्तृकः ।
इच्छार्थे प्रत्ययस्तस्मात् सन्विकत्पाद्विधीयते ।।
बुभूषत्येष वा पक्षे तुमुन भवितुमिच्छति ।
उगन्तानां सनि परे नेट् स्याद् ग्रहगुहोरपि ।।
धातोरिगन्तस्य परो झलादिः सन् किदुच्यते ।
सनि च स्याद् द्विरूपत्वं धातोर्यङि परेऽपिच च ।।
हलादिः शिष्यतेऽभ्यासे चर्च ह्रस्वश्च पूर्ववत् ।
सनाद्यन्ता धातवः स्युर्लट् शषादिरतो गुणे ।।
स्यादतो लोप इत्यस्मादल्लोपस्त्वार्धधातुके ।।

एध् 'धातो' रित्यादना सन् नकारलोपः एध्स आर्धधातुकस्ये तीट् एध् इस एधिस 'सन्यडो' रिति द्विर्वचने अजादेर्द्वितीयस्ये ति द्वितीयस्यैकाचो द्विर्वचनम् एधिषधिष हलादि शेषः एधिधिष 'अभ्यासे चर्चे'ति जश्त्वम् एदिधिस 'आदेशप्रत्ययो'रिति षत्वम् । एदिधिष 'सनाद्यन्ता' इति धातुत्वम् लडादिपूर्ववत् एदिधिषल् 'पूर्ववत्सन' १-३-६२ इत्यात्मनेपदं त एदिधिषत कर्त्तरि शप् एदिधिष अत अतोगुणे एदिधिषत टेरेत्वम् एदिधिषते सार्वधातुके एदिधिषेति प्रकृतिः लङि आङ्वृद्धि ऐदिधिषत लोटि टेरेत्वम्, आमेतः एदिधिषताम् लिङि एदिधिषत सीयुट् यकारसकारयोर्लोपः एदिधिषताम् लिङि एदिधिषत सीयुट् यकारसकारयोर्लोप

एदिधिष ईत आद्गुणः एदिधिषेत यकि एदिधिषत यक् अतो लोपः एदिधिष सत टेरेत्वम् एदिधिष्यते आर्धधातुके एदिधिषिति प्रकृतिः शेषं पूर्ववत् ऐदिधिष्यत एदिधिष्यताम्, एदिधिष्येत, आशिषि एदिधिषीष्ट एदिधिषताम् ऐदिधिष्यत, एदिधिष्यते चिण् एदिधिषीष्ट एदिधिषाञ्चक्रे एदि धिषाम्बभूवे एदिधिषामासे ऐदिधिषि, एदिधिषता ऐदिधिष्यत एदिधिष्यते ।।

पच् 'धातो कर्मण' रित्यादिना सन् पच् स 'सन्यङो' रिति द्विर्वचनम्, चच् स पच् स हलादि शेषः पपच् स सन्यत इत्यभ्यासाकारस्येकारादेशः पिपच् स 'चोः कुः' पिपक् स 'आदेशे' ति षत्वम् पिपक्ष सार्वधातुके पिपक्षेति प्रकृतिः यगादिष्वार्धधातुकेषु सनोऽकारलोप पिपक्ष् लडादि पूर्ववत् पिपक्षति, अपिपक्षत् पिपक्षतु पिक्षेत् पिपक्ष्यते अपिपक्ष्यत पिपक्ष्यताम् पिपक्ष्येत पिपक्षिषीष्ट पिपक्षाञ्चकार पिपक्षाञ्चक्रे पिपक्षाम्बभूव पिपक्षामास अपिपक्षीत् पिपक्षिता अपिपक्षिष्यत् पिपक्षिष्यति ।। पिपाक्षिषीष्ट पिपक्षाञ्चक्रे पिपक्षाम्बभूवे पिपक्षामासे अपिपक्षि पिपक्षिता अपिपक्षिष्यत पिपक्षिष्यते ।। अकारस्य भवेदित्वमभ्यासस्य परे सनि ।। इति ।।

णद् 'णोनः' इदितो नुम् अनुस्वारपरसवर्णौ नन्द् सन् नन्द् स 'आर्धधातुकस्ये'ऽचारिना इडागमः तीट् नन्द् इस 'आदेशे' ति षत्वम् नन्द्इष 'सन्यङो' रिति द्विर्वचने पथमस्यैकाचो द्विर्वचनम् नन्द् नन्दिष हलादि शेष ननन्दिष सन्यत इत्यभ्यासस्याकारस्येकारः निनन्दिषेति प्रकृतिः । यगादिषु आर्धधातुकेषु 'अतो लोप' इति सनोऽकारलोपाद् निनन्दिषिति लडादि पूर्ववत् निनन्दिषति अनिनन्दिषत् निनन्दिषतु निनन्दिषतात्, निनन्दिषेत् निनन्दिष्यते अनिनन्दिष्यत निनन्दिष्यताम् निनन्दिष्येत निनन्दिष्यात् निनन्दिषाञ्चकार निनन्दिषाम्बभूव निनन्दिषामास, अनिनन्दिषीत् निनन्दिषिता अनिनन्दिष्यत् निनन्दिष्यति, निनन्दिषीष्ट, निनन्दिषाञ्चक्रे निनन्दिषाम्बभूवे निनन्दिषामासे अनिनान्दिषि, निनन्दिषिता अनिनन्दिष्यत निनन्दिष्यते ।।

ध्वन्सु उककारलोपः नश्चपदान्तस्यझलतिनकारस्य अनुस्वारादेशः ध्वंस् 'धातोः कार्मज'इयादिना सन् नकारलोपः ध्वंस् स् स आर्धधातुकस्येति ध्वंस् आदेशोति षत्वम्, ध्वंसिष सन्यङो रिति द्विर्वचनम् ध्वंस् ध्वंस् इष हलादिशेषः ध्वंसिष अनचिच, अभअयास जश्त्वम् दध्वंसिष, सन्तत इत्यभ्यास अकारस्येकारः दिध्वंसिष सार्वधातुके दिध्वंसिषेति प्रकृतिः । यगादिषु अतो लोप इति सनोऽकारलोपाद् दिध्वंसिषिति सनादिना धातुत्वाल्लडादि पूर्ववत् पूर्ववत्सन इत्यात्मनेपदम् दिध्वं सिषते, अदिध्वंसिषत दिध्वंसिषताम्, दिध्वंसिषेत दिध्वंसिष्यते अदिध्वंसिष्यत दिध्वंसिष्यतां दिध्वंसिष्येत दिध्वंसिषीष्ट दिध्वंसिषाञ्चक्रे दिध्वं सिषाम्बभूवे दिध्वंसिषामास अदिध्वंसिष्ट दिध्वंसिषता अदिध्वंसिष्यत दिध्वंसिष्यते कर्मण्यात्मनेपदमेव ।।

व्यये सन् व्ये स, 'आदेच' इत्यात्वम् व्यास सन्यङो रिति द्विर्वचने द्विर्वचनेऽचि ति स्थानिवद्भावाद् द्विर्वचनम् व्येव्ये, कृते द्विर्वचने पुनरादेश एव व्ये व्ये व्ये व्यास हलादि शेषः वेव्यास 'ह्रस्व' इत्यभ्यासस्य एच त्वादिनेकारस्येकारः विव्यास सनादित्वाद् धातु संज्ञायां लडादिपूर्ववत् सार्वधातुके विव्यसेति प्रकृतिः यमादिषु अतोलोप इति सनोऽकारस्य लोपत् विव्यास् विव्यास्यति अविव्यासत् विव्यासतु विव्यासतात् विव्यासेत् विव्यास्यत इत्यादि विव्यास्यात् विव्यासाञ्चकार विव्यासाम्बभूव विव्यासामास अविव्यासीत् विव्यासिता अविव्यासिष्यत् विव्यासिष्यति विव्यासिषीष्टे त्यादि, अद् सन् अद् स 'लुङ् सनो र्धस्वङ' इत्यादेर्धस्लृदेश अकारलोपः घघससा कुहोश्चुः टित्यभ्यासधकारस्यश्चुत्वम् मकारः झघस् स जश्त्वम् जघस स सन्यत इत्यभ्यासे अकारस्येकारः जिघस् स्म सस्योर्घधातुकात पूर्वसकारस्य तकारः जिधत्सति सनाद्यन्ताधातवइति धातुसंज्ञायां लडादि पूर्ववत् सार्वधातुके जिघत्सेति प्रकृतिः यगादिषु अथो लोप इति सनोऽकारलोपणज्जिघत्सेति जिघत्सति, अजिघत्सत् जिघत्सतुः जिघत्सेत् जिघत्स्यत इत्यादि, जिघत्स्यात् जिघत्साञ्चकार जिघत्साम्बभूव जिघत्सामासेत्यादि, अजिधत्सीत् जिघत्सिता अजिघत्सिष्यत् जिघत्सिष्यति जिघत्सिषीष्टेत्यादि,

लुङ्सनोर्घस्लृ इत्युक्ते घस्लादेशो विधीयते ।
सस्यार्धधातुक इति तकारश्च जिघत्सति ।।

शी, सन् शीस इट् शी इस 'आदेश' ति षत्वम् शी इ ष 'साव'धातुकेति ति गुणः शे इष सन्यङोरिति द्विर्वचने द्विवचनेची ति स्थानिद्भावः द्विर्वचनम् शीशी कृते द्विर्वचने पुनरादेश एवावतिष्ठते शीशे इ ष हलादिशेषः ह्रस्वोऽभ्यास शिशेइष अयादेश शिशयिषः सनाद्यन्ता इति धातुसंज्ञायां लडादि पूर्ववत् सार्वधातुके शिशयिषेति प्रकृतिः यगादिषु अतोलोप इति सनोऽकारलोपाच्छिशयिषिति प्रकृतिः। पूर्ववत्सन इत्यात्मनेपदम् शिशयिषते अशिशयिषत शिशयिषताम् शिशयिषेत शिशयिष्यत इत्यादि शिशयिषीष्ट, शिशयिषाञ्चक्रइत्यादि, अशिष्टायिषी शिशयिषता अशिशयिषष्यत शिशयिषिष्यते, शिशयिषिषीष्टेत्यादि,

ब्रू, 'धातो' रिति सन् ब्रूस 'ब्रूवो वचि' रिति ब्रूवो वचिरादेशः वच् स 'सन्यङो' रिति द्विर्वचनम् वच् वच् स 'हलादि शेषः' ववचस, सन्यत इत्यभ्यासाकारस्येकारः विवच् स 'चोः' इतिकुत्वं विवक् स 'आदेशप्रत्ययो' रिति षत्वम् विचक्ष सनादित्वाल्लडादयः सार्वधातुके यकि विवक्षेति प्रकृतिः यगादिषु 'अतोलोप' इति सनोऽकारलोपाद्विवक्षिति विवक्षति अविवक्षत् विवक्षतु विवक्षतात् विवक्षेत् विवक्ष्यत इत्यादि विवक्ष्यत् विवक्षाञ्चकारेत्यादि, अविजक्षत् विवक्षिता अविवक्षित् विवक्षिष्यति विबक्षिषीष्टेत्यादि।

हु, 'धातो' रित्यादिना सन् हु स अज्झनगमां सनी ति दीर्घः । हस 'आदेश प्रत्ययो'रि षत्वम् हुष 'सन्यङो' रिति द्विर्वचने 'द्विर्वचनेऽची'ति स्थानिवद्भावः हुहु कृते द्विर्वचने पुनरादेश एव, हुहुष 'हलादिः शेषः' हुहुष 'कुहोश्चुः' इति अभ्यासहकारस्य झकारः झुहुषु 'अभ्यासे चर्चे'ति जश्त्वम् जुहुष सनादित्वाद् धातुसंज्ञायां लडादि पूर्ववत् सार्वधातुके जुहूषेति प्रकृतिः यगांदिषु सनोऽकारलोप जुहूर्षिति जुहूषति अजुहूषत् जुहूषतु जुहूषेत् जुहूष्यत इत्यादि, जुहूष्यात् जुहूषाञ्चकारेत्यादि, अजुहूषीत् जुहूषिता अजुहूष्यत् जुहूषिष्यति

जुहूषिषीष्टेत्यादि, हा सन् हास सन्यङो रिति द्विर्वचनम् हास हास, हलादिः शेषः हा हास ह्रस्वः इत्यभ्यासस्य ह्रस्वः हहास सन्यतः इत्यभ्यास अकारस्येकारः हिहास कुहोश्चुः, झिहास अभ्यासजश्त्वम् जिहास सनादित्वल्लाडादयः पूर्ववत्सन इत्यात्मनेपदम् सार्वधातुके जिहासेति प्रकृतिः यगादिषु जिहासिति जिहासते अजिहासत जिहासताम् जिहासेत जिहास्यत इत्यादि जिहासिषीष्ट जिहासाञ्चक्र इत्यादि अजिहा सिष्ट जिहासिता अजिहासिष्यत जिहासिष्यते जिहासिषीष्टेत्यादि,

धा सन् धास, धेत्यस्य घुसंज्ञकत्वात् सनिमीमाधुरभलभशकपतपदामच इति ७-४-५४ ति धातोरचः स्थान इस् इत्ययमादेशः ध इस् स धिस् स, 'सस्यार्धधातुक' इति पूर्वसकारस्य तकारदेश धित् स धित्स सन्यङोरिति द्विर्वचनम् धित्स धित्स अत्रलोपोऽभ्यासस्ये ७-४-५५ त्यभ्यासलोपः धित्सः सनादित्वाद् धातुसंज्ञायां लादि पूर्ववत् ।सार्वधातुके धित्सेति प्रकृतिः यगादिष्वकारलोपात् धित्सिति धित्सति अधित्सत् धित्सु धित्सेत् धित्स्यत इत्यादि धित्स्यात् धित्साञ्चकारेत्यादि, अधित्सीत् धित्सिता अधित्सिष्यत् धित्सिष्यति, धित्सिषीष्टेत्यादि।।

इदादेशः सकारादौ सन्येतेषामचः स्थले ।
अत्रेति सनिमीमादिसूत्रमारभ्य पण्डितैः ।।
मुचोऽकर्मकसूत्रान्तं लोपोऽभ्यासस्य कथ्यते ।
मित्सतीति द्वयोर्धात्वोर्धुना दित्सति धित्सति ।।
रिप्सत्यथो लिप्सति च शिक्षत्युद्वित्सति द्वयोः ।।

दिव्, सन्, दिव् स, सनीवन्तर्धभ्रस्जदन्भुसृश्रियूर्णु भरज्ञपिसना ७-२-४९ मिति वाडागमः दिव् इस्, षत्वम्, पुगन्ते लघुपधस्यचेति गुणः देव् इष सन्यङो रिति द्विर्वचने द्विर्वचनेऽचीति स्थानिवद्भावः दिष् दिव् कृते द्विर्वचने आदेश एव हलादिः शेषः दिदेविष सनादिना धातुत्वात् लडादयः सार्वधातुके दिदेविषे ति प्रकृतिः यगादि दिदेविष्यत इत्यादि, दिदेविष्यन् दिदेविषाञ्चकरेत्यादि, अदिदेविषीत्

दिदेविषिता अदिदेविषिष्यत् दिदेविषिष्यति दिदेविषिषीष्टेत्यादि इडभावे दिव् स् हलन्ताश्चे १-२-१० ति सनः किद्वद्भावे च्छ्वोः शूडनुनासिके चे ६-४-१९ ति वकारस्योडादेशः दि ऊ स षत्वम् दिऊ ष 'इको यण ची' ति यण् द्यूष सन्यङोरिति द्विर्वचनम् द्यूष द्यूष हलादिः शेषः दूद्यूष ह्रस्व इत्यभ्यासस्य ह्रस्वः दुद्यूष सनादिना धातुसंज्ञायां लडादयः सार्वधातुके दद्यूषेति प्रकृतिः यगादिषु सनोऽकारस्य लोपाद् दुद्यूषेत् दुद्यूष्यत इत्यादिः दुद्यूष्यात् दुद्यूषाञ्चकारेत्यादि, अदुद्यूषीत् दुद्यूषिता अदुद्यूषिष्यत् दुद्यूषिष्यति, दुद्यूषिषीष्टेत्यादि,

इवन्तानामृधादीनामिड्वा स्यात् परतः सनि ।
हलन्ताच्चेति कित् स्यात् सन् झलादिर्हलृसमीपगः ।।
शित्यङितिद्वावादेशौ सतुकाच्छस्य वस्य च ।
परेऽनुनासिकादौ च कौ झलादौ किङित्यपि ।।
ढलोपश्च यणादौशः रोषं पूर्ववदीक्ष्यताम् ।
सतुक्छस्य शादेशे पृष्टो व्रश्चादिषत्वतः ।

षू, 'धात्वादेः षः सः' सू सन् सूस 'आदेशे' ति षत्वम् सूष 'सन्यङो' रिति द्विर्वचनम् सूष सूष 'हलादिः शेषः' सू सूष ह्रस्व इत्यभ्यासस्य ह्रस्व सुसूष द्वितीयसकारस्य षत्वे प्राप्ते 'स्तौतिण्योरेव षण्यभ्यासादि' ति नियमादिह षत्वं न भवति सनादिना धातुत्वाल्लादयः सार्वधातुके सुसूषेति प्रकृतिः यगादि लोपात् सुसूषिति 'र्ववत्सन' इत्यात्मनेपदम् ।सुषूसते असुसूषत,सुसूषतां ,सुसेषेत,असूष्यत इत्यादि, सुसूषिष्ट सुसूषाञ्चक्रे इत्यादि असुसूषिष्ट, सुसूषिता असुसूषिष्यत सुसूषिष्यते सुसूषिषीष्ट, इत्यादि

स्तौतेरपि णिजन्तानां षत्वभूते परे सनि ।
अभ्यासादिण ऊर्ध्वस्य सस्य मूर्धन्यता भवेत् ।।
इत्यस्मान्नियमादत्र सस्य षत्वं न सम्भवेत् ।।

णह, णह् 'णोनः' नह, सन् नह् स 'नहो ध', इति हकारस्य धः नध् स, 'खरि च' इति चत्वं न त् स 'सन्यङो' रिति द्विर्वचनम् नत् स नत् स 'हलादिः शेषः' ननत् स ननत्सः 'सन्यत' इत्यभ्याकारस्येकारः । निनत्स, सनादिना धातुत्वाल्लडादयः सार्वधातुके निनत्सेति प्रकृतिः । यगादिषु सनोऽतोलोपः निनत्सिति प्रकृतिः। निनत्स्यात् निनत्साञ्चकारेत्यादि, अनिनत्सीत् निनत्सिता अनिनत्सिष्यत् निनत्सिप्यति निनत्सिषीष्टेषु धात्वादेः षः सः सु, सन् सुस षत्वम् सुष अज्झनगमेत्युकारस्य दीर्घः सूषसन्य द्विर्वचनम् स्थानिद्भावः सुष, सुष कृते द्विर्वचने आदेश एव सुषसूष हलादिशेष सुसूष स्तोति नियमाद् द्वितीयसकारस्य षत्वम् न भवति सुसूष सनादिना धातुत्वाल्लडादयः सार्वधातुके सुसूषेति प्रकृतिः यगादिष्वतो इत्यकारलोपात् सुस् षिति, असुसूषत् सुसूषतु सुसूषतात् सुसूषेत् सुसूष्यत इत्यादि सुसूष्यात् सुसूषाञ्चकारेत्यादि असुसूषीत् सुसूषिता असुसूषिष्यत् सुसूषिष्यति सुसूषिषीष्टेत्यादि,

अश् सन् अश् स 'स्मिपूङ्रञ्ज्वशां सनी'७-२-७४ ती डागमः अशिस षत्वम्, अशिष 'सन्यङो' रिति द्विर्वचने 'अजादेर्दितीयस्ये' ति द्वितीयस्यैकाचो द्विर्वचनम् अशिष शिष 'हलादिः शेषः' अशिशिष सनादिना धातुत्वल्लडादयः 'पूर्ववत्सन' इत्यात्मनेपदम् सार्वधातुके अशिशिषेति प्रकृतिः यगादि'ष्वतो लोप'इत्यकारलोपात् दशिशिषिति । अशिशिषते आशिशिषत अशिशिषताम् अशिशिषेत अशिशिष्यत इत्यादि, अशिशिषिषीष्ट अशिशिषाञ्चक्र इत्यादि, आशिशिषिष्ट, अशिशिषिता आशिशिषिष्यत अशिशिष्यते अशिशिषिषीष्टेत्यादि।

स्मिपूङोरञ्जतेश्चाशेरिट् स्यात् सनिपरे सति ।। इति ।।

चि, 'धातो कर्मणी'त्यादिना सन् चिस षत्वम् चिष 'अज्झनगमे 'ति दीर्घ ची षे 'सन्यङो' रिति द्विर्वचने 'द्विर्वचनेऽची' ति स्थानि चिचीष 'विभाषाचे'७-३-५५ त्यभ्यासात् परस्य चकारस्य वा कुत्वम् चिकीष सनादिना धातुत्वाल्लडादयः सार्वधातुके चिकीषेति प्रकृति, कुत्वभावे चिचीषेति यमादि'ष्वातो

लोप'इत्यकारलोपात् चिचीषेति चिकीषति अचिकीषत् चिकाषतु चिकीषेत् चिकाष्यत इत्यादि, चिकीष्यात् चिकीषाञ्चकारेत्यादि अचिकीषीत् चिकीषिता अचिकीषिष्यत् चिकीषिष्यति चिकीषीष्टेत्यादि चिचीषति अचिचीषत् पूर्ववत् कुत्वाभाव एव विशेषः ।

अभ्यासाद्वा कवर्गः स्याच्चिनोतेः सनि लिट्यपि ।।

तुद् सन् तुद् स 'खरिचेति' चर्त्वम् तुत् स तुत्स 'सन्यङो'रिति द्विर्वचनम् तुत्स तु त्स 'हलादिशेषः' तुतुत्स सनादिना धातुत्वालडादि पूर्ववत् सार्वधातुके तु तुतुत्सेति प्रकृतिः ,यगादिष्वल्लोपात् तुतुत्सिति तुतुत्सति अतुतुत्सत् तुतुत्सतु तुतुत्सेत् तुतुत्स्यत इत्यादि तुतुत्स्यात् तुतुत्साञ्चकारेत्यादि अतुतुत्सीत् तुतुत्सिता अतुतुत्सिष्यत् तुतुत्सिष्यति तुतुत्सिषीष्ट,

मृ सन् ,मृस आशङ्कायामुपसंख्यान मिति वा सन् 'अज्झनगमांसनी' ति दीर्घः मृस, 'उदोष्ठ्यपूर्वस्ये'७-१-१०२ त्युत्वम् रपर मुरस ,षत्वम् मुरष पुनः 'हलिचे'ति दीर्घः मूरू ष 'सन्यङो'रिति द्विर्वचनम् मूर् ष मूर् ष 'हलादिशेषः' मूमूरषी ह्रस्व इत्यभ्यासस्य ह्रस्वः मुमूर्ष सनादित्वात् धातुसंज्ञायां लडादयः सार्वधातुके मुगूर्षेति प्रकृति ,यगादिष्वतोलोप इत्यकारलोप मुमूर्षिति मुमूर्षति अमुमूर्षत् मुमूर्षतु मुमूर्षेत् मुमूर्ष्यत इत्यादि मुमूर्ष्यात् मुमूर्षाञ्चकारेत्यादि अमुमूर्षीत् मुमूर्षिता अमुमूर्षिष्यत् । ते अमुमूर्षतेत्यादि,

ओष्ठ्यपूर्वस्य धातोः स्यादृत उत्वं रमस्तकम् ।।

मुच् ,धातो कर्मणः सन् मुच् चोः कुः इति कुत्वं मुक् स षत्वम् मुकुष, सन्यङो रिति द्विर्वचनम् मुकष् अ हलादि शेषः मुमुक्ष अनचिचेति द्वित्वम् सनादित्वाल्लडादयः सार्वधातुके मुमुक्षेति प्रकृतिः यगादिष्वतो लोप इत्यकारलोपात् मुमुक्षति अमुमुक्षत् मुमुक्षतु मुमुक्षीत्, मुमुक्षिता अमुमुक्षिष्यत् मुमुक्षिष्यति मुमुक्षिषीष्टेत्यादि,

कर्मकर्त्तरि - मुमुक्षेति स्थिते मुचोऽकर्मकस्य गुणो वे त्यनभ्यासावयवस्योकारस्य वा गुणः मुमोक्ष मुमुक्ष गुणपक्षेऽत्रलोपोऽभ्यास-स्येत्यभ्यासस्य लोपः मोक्ष कर्मवत् कर्मणा तुल्यक्रिय इति कर्मवद्भावादात्मनेपदं भवति,

यस्तु सार्वधातुके यग्विहितः यश्च लुङि चिण् तौ न भवतः न दुहस्नुनमां यक् चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञ आत्मनेपदाकर्मकाणामुपसंख्यनम् भूषाकर्मकिरति सनां चान्यावात्मनेपदादिति प्रतिषेधात् मोक्षते वत्सः स्वयमेव मुमुक्षते वा ,लुङि अमोक्षिष्ट अमुमुक्षिषत्,

गुणपक्षे मुचेर्धातोर्लोपोऽभ्यासस्य पूर्ववत् ।।
कर्मवत् कर्मणा तुल्यक्रिय इत्युक्तसूत्रतः ।।
कर्तुस्तु कर्मवद्भावे भवेदत्रात्मनेपदम् ।
अकर्मकस्य तु मुचो न यक् स्यादुपसंख्यया ।।
अभावे कर्मवत्वस्य पुत्रो वत्सं मुमुक्षति।

रुध् ,धातो रित्यादिना सन् रुध् स खरि च इति चर्त्वं रुत् स रुत्स, सनादिना धातुत्वाल्लड़ादयः सार्वधातुके रुरुत्सेति प्रकृतिः यगादिषु अतो लोपाद् रुरुत्सेति रुरुत्सति अरुरुत्सत् रुरुत्सतु रुरुत्सेत् रुरुत्स्यत इत्यादि रुरुत्स्यात् रुरुत्साञ्चकारेत्यादि, अरुरुत्सीत् रुरुत्सिता अरुरुत्सिष्यत् रुरुत्सिष्यति रुरुत्सिषीष्टेत्यादि,

भुज्, धातोः इति सन् भुज् स चोः कुः इति कुत्वं भुक् स षत्वम् भुक् ष, सन्यङो रिति द्विर्वचनम् भुक्ष भुक्ष हलादिशेष भुभुक् ष द्वित्वम्, भुभुक्ष अभ्यासजश्त्वम् बुभुक्ष ,सनादिना धातुसंज्ञायां लडादयः । सार्वधातुके बुभुक्षेति प्रकृतिः यगादिष्वलोपाद् बुभुक्षेति प्रकृति बुभुक्षति अबुभुक्षत् बुभुक्षतु बुभुक्षेत् बुभुक्ष्यत इत्यादि, बुभुक्ष्यात्। बुभुक्षाञ्चकारेत्यादि अबुभुक्षीत् अबुक्षिष्ट बुभूक्षिता अबुभुक्षिष्यत् बुभुक्षिष्यति बुभुक्षिषीष्टेत्यादि,

युज् ,धातो कर्मण इत्यादिना युज् स कुत्वम् यु क् स आदेशप्रत्ययोरिति षत्वम् युक् ष सन्यङो रिति द्विर्वचनम् युक् ष युक् ष् अ हलादि शेषः । युयुक् ष द्वित्वम् युयुक्ष सनादिना धातुत्वाल्लडादयः सार्वधातुके युयुक्षेति प्रकृतिः यगादिष्वलोपाद् युयुक्षिति युयुक्षति अयुयुक्षत् युयुक्षतु युयुक्षेत् युयुक्ष्यत इत्यादि युयुक्ष्यत् युयुक्षाञ्चकारेत्यादि अयुयुक्षीत् युयुक्षिता अयुयुक्षिष्यत् युयुक्षिष्यति । युयुक्षिषीष्टेत्यादि,

तन् ,सन् तन् स तनिपतिदरिद्राणामुपसंख्यानमि तीड्विकल्पः । इट्पक्षे तन इस षत्वम् तनिष सन्यङोरिति द्विर्वचनम् तन् तनिष हलादिशेषः । ततनिष सन्यत इत्यभ्यासाकारस्येकारः तितनिष अनिट् पक्षे तनोतेर्विभाषेत्याकारस्य वा दीर्घः दीर्घत्वे तास् नश्चापदान्तस्यझलीत्य नुस्वारः तास द्विर्वचनम् तास तांस हलादि शेष तातांस ह्रस्वः इत्यभ्यास्य ह्रस्वः ततास इत्वम् ति तांस । दीर्घाभावे तन् स् नश्चापदान्तेति अनुस्वारः तंस् द्विर्वचनं तंस् तंस् हलादि शेष ततंस सन्यतः इतीत्वं तितंस अत्र तितनिष तितांस तितंसेति त्रेधा प्रकृतिः सार्वधातुके यगादावकारलोपात् तितानिष् तितांस् तितंसिति । धातुसंज्ञायां लडादयः तितनिषति, अतित निषत् तितनिषतु तितनिषेत् तितनिष्यत इत्यादि, तितनिषाञ्चकारेत्यादि अतितनिषीत् तितनिषिता अतितनिष्यत् तितनिष्यति तितनिषिषीष्टेत्यादि अन्यौ तद्वत्,

तनोतेर्विभाषेति झलादौ सनि दीर्घता ।।

मन् सन् ,मन् स आर्धधातुकस्येतीट् मन् इस षत्वम् मन् इष द्विर्वचनम् मन् इष हलादिः शेषः । ममनिष सन्यत इत्यभ्यासाकारस्येकारः मिमनिष धातुसंज्ञायां लडादयः सार्वधातुके मिमनिषेति प्रकृतिः । यगादावकारलेपात् मिमनिष् पूर्ववत्सन इत्यात्मनेपदम् मिमनिषते अमिमनिषत मिमनिषताम् मिमनिषेत मिमनिष्यत इत्यादि मिमनिषिषीष्ट मिमनिषाञ्चक्र इत्यादि, अमिमनिषिष्ट मिमनिषिता अमिमनिषिष्य मिमनिषिष्यते, मिमनिषिषीष्टे त्यादि,

कृ सन् ,कृस अज्झनीति दीर्घः कृस ॠत इद्धातोरिति इकारलोपः रपरश्च तत् । किर् स हलिचे ति दीर्घः कीर् स षत्वम् कीरष द्विः स्थानिवद्भावात् कृष् कृष कृते द्विर्वचने पुनरादेश एव कृकीर्ष, उरत् कर् कीर्ष, हलदि शेष ककीर्ष इत्वम् किकीर्ष श्चुत्वम् चिकीर्ष धातुत्वाल्लडादयः सार्वधातुके चिकीर्षेति प्रकृतिः यगादावकारलोपात् चिकीर्षिति चिकीर्षति अचिकीर्षत् चिकीर्षतुः चिकीर्षेत् चिकीर्ष्यत इत्यादि चिकीर्ष्यात् चिकीर्षाञ्चकारेत्यादि अचिकीर्षीत् चिकीर्षिता अचिकीर्षिष्यत् चिकीर्षीष्यति, चिकीर्षिषीष्टेत्यादि । दीर्घे कृतेऽज्झनगमामिति द्वित्वे च पूर्ववत्।

ॠकारान्तस्य धातोः स्यादिकारो रपरः सनि ।।
हलि चेति पुनर्दीर्घः षत्वमित्यथ पूर्ववत् ।। इति ।।

क्री सन् ,क्रीस षत्वम् क्रीष, द्विर्वचनम् क्रीष क्रीष हलादि शेषः क्री क्री ष ह्रस्व इत्यभ्यासस्य ह्रस्वः कुहोश्चुः चिक्रीष धातुत्वाल्लडादयः सार्वधातुके चिक्रीषेति प्रकृतिः त्यमादावतो लोपः चिक्रीषिति, चिक्रीषति अचिक्रीषत् चिक्रीषतु चिक्रीषेत् चिक्रीष्यत इत्यादि चिक्रीष्यात् चिक्रीषाञ्चकारेत्यादि अचिक्रीषी चिक्रीषिता अचिक्रीषिष्यत् चिक्रीषिष्यति चिक्रीषिषीष्टेत्यादि,

वृ सन् वृस इट् सनिवे ७-२-४१ ति इडागमः वृ इ स वृस वृतो वे तीटो वा दीर्घः वृ ई स वृ इ स सार्वधातुकार्धधातुकयो रितिगुणो रपरः षत्वं च वरीष वरिष द्विर्वचनम् वर् वरीष वर् वरिष हलादिः शेषः ववरीष ववरिष सन्यत इतीत्वं विवरीष विवरिष इड्भावे वृस षत्वम् अज्झने गमासनीति दीर्घः वृष उदोष्ठ्यपूर्वस्ये त्युकारो रपरः वुर् ष हलिचे ति दीर्घः वूरष सन्यङो रिति द्विर्वचनम् वूर् वूरष हलादिशेषः ह्रस्वः वुवूर्ष अत्र विवरीष विवरिष वुवूर्षेति त्रिधा प्रकृतिः। सनादिना धातुसंज्ञायां लडादि पूर्ववत् विवरिषते अविवरीषत विवरीषताम् विवरीषेत विवरीष्यत इत्यादि विवरिषिषीष्ट, विवरीषाञ्चक्र इत्यादि, अविवरिषिष्ट विवरीषिता अविवरीषिष्यत विवरीषिष्यते विवरीषिषीष्टेत्यादि अन्यौ तद्वत् ।।

भवेदीट् सनिवेत्यस्मादिड्विकल्पाद् वृतः सनिः ।
इटो दीर्घो विकल्पात् स्यादिड्द्विकल्पाद् वृतः सनि ।।
इटो दीर्घो विकल्पात् स्याद्दन्तानां च वृञ्वृङोः ।
उरदित्यमुनाप्यत्वमित्वं सन्यत इत्यतः ।।
इडभावेऽज्झनगमां सनि दीर्घे कृते सति ।
उदोष्ठ्यपूर्वस्येत्युत्वं हलि चेत्यपि दीर्घता ।।

ग्रह् सन् ,ग्रहस ,सनि ग्रहगुहो श्चेतीण्निषेधः रुदविदमुषग्रहिस्वपिप्रच्छसंश्चे १-२-५ ति सनः कि त्वाद् ग्रहिज्ये ति सूत्रेण सम्प्रसारणम् गृअह् सम्प्रसारणाच्चे ति पूर्वरूपत्वम् गृह् स हो ढ इति हकारस्य ढत्वम् गृढ् स एकाचो बशो भष् झषन्तस्य स्ध्वो रिति भाष्भावः । षढो कः सी ति ढस्य कत्वम् घृढ् स घृक् स आदेशे ति षत्वम् घृक् ष पूर्वत्रासिद्ध मिति ढत्वादेरसिद्धत्वात् सन्यङो रिति गृह् शब्दस्यद्विर्वचनम् गृह् गृह् कृते द्विर्वचने पुनरादेश एव गृह् हलादि शेषः गृघृक्ष उरत् गरघृक्ष हलादि शेषः गघृक्ष कुहोश्चुः रितिश्चुत्वं जघृक्ष सन्यतः इतीत्वं जिघृक्ष । सनादिना धाकुत्वाल्लडादि पूर्ववत् सार्वधातुके जिघृक्षेति प्रकृतिः यगादातोवकारलोपः इति अकारलोपात् जिघृक्षिति जिघृक्षति अजिघृक्षेति जिघृक्षतु जिघृक्षतात् जिघृक्षेत् जिघृक्षेत् जिघृक्ष्यत इत्यादि, जिघृक्ष्यात् जिघृक्षाञ्चकारेत्यादिः अजिघृक्षीत् जिघृक्षिता अजिघृक्षिष्यत् जिघृक्षिष्यति, जिघृक्षिषीष्टेत्यादि,

सनि ग्रहगुहोश्चेति प्रतिषेध इटो भवेत् ।
स च षड्भ्यो रुदादिभ्यः परस्य सन उच्यते ।।
सन्यङोश्चोरत् प्राग्वत् ग्रहिज्यादि प्रसारणम् ।
कुहोश्चुः सन्यतो होढो भषेकारचो बशादिना ।।
षढो कः सीत्यतः सीत्यतः कुत्वं षत्वमिण्कोर्जिघृक्षति ।।

चुर स्तेये चुर् सत्यापपाशे त्यादिना णिच् चुरि पुगन्तेदिना गुणः चोरि धातो रिति (सन्, चोरि स आर्धधातुकस्ये तीडागमः । चोरि इस सार्वधातुके ति

गुणः चोरे इस अयादेशषत्वे चोरयिष द्विर्वचनम्) चोर् चोर् अयिष हलादिः शेषः चोचोरयिष ह्रस्वइत्यभ्यास ह्रस्वः चुचोरयिष सनादिना धातुसंज्ञायां लडादि पूर्ववत् सार्वधातुके चुचोरयिषेति प्रकृतिः यगावतोरलोपात् चुयोरयिषिति चुचोरयिषति अचुचोरयिषत् चुचोरयिषतु चुचोरयिषेत् चुचोरयिष्यत इत्यादि चुचोरयष्यात् चुचोरयिषाञ्चकारेत्यादि अचुचोरयिषीत् चुचोरयिषिता अचुचोरयिष्यत् चुचोरयिष्यति चुचोरयिषिषीष्टेत्यादि,

पाल् सत्त्यापपाशे त्यादिना स्वार्थेणिच् पालि धातो इत्यादिना सन् पालइस इट् पालिइस गुणः पाले इस अयादेशः षत्वेश्च पालयिष सन्यङिरिति द्विर्वचनम् पाल् पाल् अयिष हलादिः शेषः पापालयिष ह्रस्वः पपालयिष सन्यत इत्यभ्यासाकारस्येकारदेश पिपालयिषेति प्रकृति यगादावतो लोप इत्यकारलोपात पिपालयिषिति पिपालयिषति, अपिपालयिषत् पिपालयिषतु पिपालयिषतात् पिपालयिषेत् पिपालयिष्यत् इत्यादि, पिपालयिष्यत् पिपालयिषाञ्चकारेत्यादि, अपिपालयिषीत् पिपालयिषिता अपिपालयिषिष्यत् पिपालयिषिष्यति, पिपालयिषिषीष्टे त्यादि,

अर्च पूजायाम् अर्च् सत्यापपाशे त्यादिना स्वार्थे णिच् अर्च् इ अर्चि सन् अर्चिस सार्वधातुकेयोरिति गुणः इट् च अर्चे इ स अयादेशषत्वे अर्चयिष सन्यङो रिति द्विर्वचने अजादेर्दितीयस्येति द्वितीयस्यैकाचोद्वित्वम् चय् चय् इष हलादिः शेष चचयिष सन्यतः इत्यभ्यासाकारस्यकारस्येकार अर्चिचयिष सनादिनाधातुत्वाल्लडादि पूर्ववत् सार्वधातुके अर्चिचयिषे ति प्रकृतिः यगादावकारलोप इत्यकारलोपात् अर्चिचयिष् अर्चिचयिषति आर्चिचयिषति आर्चि चयिषत् अर्चिचयिषतु अर्चि चयिषेत् अर्चिचयिष्यत इत्यादि अर्चि चयिष्यात् अर्चिचायिषाञ्चकारेत्यादि, आर्चिचयिषीत् अर्चिचायिषिता आर्चि चयिषिष्यत्, अर्चिचयिषिष्याति अर्चिचयिषिषीष्टेत्यादि ।।

बुभूषत्येदिधिषते पिपक्षति पिपक्षते ।
निन्दिषति दुःखार्त्तः प्रदिध्वंसिषते रिपून् ।।
राहुर्विव्यासति रविं मेघो विव्यासते दिशः ।
जिघत्सत्योदनं भिक्षुर्लुङ्सनोर्घस्लृ सन्यतः ।।
पान्थाः शिशयिषन्तेऽप्सु विवक्षति विवक्षते ।
गव्यं जुहूषत्यध्वर्युर्यज्वा स्वर्गं जिहीषते ।।
धित्सत्याधित्सतेऽध्वर्युर्दिदेविषति वाथवा ।
दुद्यूषति युवा स्त्रीभिः पुत्रं सा प्रसुसूषते ।।
निनत्सति पशून् गोधूग् राजा शत्रून् निनत्सते ।
सोमं सुसूषत्यध्वर्युमेघो शिशिषते दिशः ।।
चिचीषति चिचीषन्ते चिकीर्षति चिकीर्षते ।
तुतुत्सति स मर्माणि रोगार्त्तोऽसौ मुमुक्षते ।।
मुमुक्षत्येष संसारान् गोधुग्वत्स मुमुक्षते ।
रुरुत्सति पुरीं सेना क्षुधार्त्तश्च बुभुक्षते ।।
युयुक्षति शिवं शक्त्या मनो योगी युयुक्षते ।
शास्त्रं तितनिषत्येष तितासति तितंसति ।।
तत्त्वं मिमनिषन्तेऽमी चिकीर्षति चिचीर्षते ।
विचिक्रीषत्यसौ धान्यं वरं च विवरीषते ।।
कन्यां विवरिषन्तेऽमी यज्वाध्वर्युं वुवूर्षते ।
अर्थं जिघृक्षत्याचार्यो वटुर्विद्यां जिघृक्षते ।।
चुचोरयिषते क्षेत्रं पिपालयिषति क्षितिम् ।
विप्रोऽर्चिचयिषत्यर्कं स्पष्टमेवात्मनेपदम् ।।
दशस्वपि लकारेषु कर्त्रर्थे भावकर्मणोः ।
सन्प्रत्ययः समुन्नेयस्तत्र तत्रोक्तसूत्रतः ।।
लिट् बुभूषाञ्चकारादिर्लकाराः सुगमाः परे ।।

।। इति सन्नन्त प्रक्रिया ।।

अथ यङन्ताः ।

यङो ङित्वादात्मनेपदमेव अवयवे कृतं लिङ्गं समुदायस्यापि विशेषकं भवति भू सत्तायाम् भू धातोरे काचोहलादेः कियासमभिहारे यङि ३-१-२२ ति यङ्प्रत्ययः अनुबन्धलोपः भूय सन्यङो रिति द्विर्वचनम् भूय भूय गुणो यङ्लुको रित्यभ्यासस्य गुणः भो भूय, अभ्यासेचर्चेति जश्त्वम् बोभूय बोभूय, सनादित्वा धातुसंज्ञायां लडादयः बोभूयतअबोभूयत, बोभूयताम्, बोभूयेत हलादिः शेषः भूभूय् बोभूय्यते अबोभूय्यत बोभूय्यताम् बोभूय्येत बोभूयिषीष्ट बोभूयाञ्चक्रे बोभूयाम्बभूवे बोभूयामासे अबोभूयि, बोभूयिता अबोभूयिष्यत बोभूयिष्यते,

पौनःपुन्यं भृशार्थो वा क्रियासमभिहारकः ।
तयोर्हलादेरेकाचो धातोर्यङ्प्रत्ययो भवेत् ।
सन्यङोरिति सूत्रोक्तं कार्यं द्विर्वचनं पुनः ।
इको गुणोऽभ्यासस्य स्यात् परे च यङि यङ्लुकि ।।

पच् धातोरेकाच इत्यादिना यद् पच् य सन्यङोरिति द्विर्वचनम् पच् य पच् य अ हलादिः शेषः पपचय दीर्घोऽकित ७-४-५३ इत्यभ्यासस्य दीर्घः पापच् य अनचिच इति द्वित्वं पापच्य सनादित्वा धातुसंज्ञायां लडादयः पापच् य् य यस्य हल ६-४-४९ इति यङो यकार लोपः पापच् य अत्र अचः परस्मिन् पूर्वविधाविति योऽयमल्लोपस्य स्थानिवद्भावः स यलोपविधौ न भवति न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वार दीर्घजश्चर्विधिष्वि ति प्रतिषेधात् पच् य अनचि चेतिद्वित्वं पापच्येति यकि प्रकृतिः पापच्यत इत्यादि अथ कर्तृवाचिष्वार्धधातुकेषुषट्सु पापच् य इति स्थिते यङोऽकारयकारयो रतो लोपः यस्य हल इति च सूत्रद्वयेन क्रमेण लुप्तयोः पापचिति प्रकृतिः सम्पद्यते पापचिषीष्ट पापचाञ्चक्रे पापचिष्यते कर्मणि चिण्वदिटि लिटि च पापचित्येव प्रकृतिः पापचिषीष्ट पापचाञ्चक्रे, पापचाम्बभूवे पापचामासे अपापचि पापचिता अपापचिष्यत पापचिष्यते,

अभ्यासस्याकितो दीर्घः परे यङि च यङ्लुकि ।
पापच्यते मयेत्येवं यङ्यङ्लुकोर्यकि परे ।।
हल्परस्य यकारस्य लोपः स्यादार्धधातुके ।।

न धातुलोप आर्धधातुके १-१-४ यस्मिन् धात्वेकदेशस्य लोपः स्यादार्धधातुके तस्मिन् न गुणवृद्धी, वटुनान्नमपाचि, नद् धातोरेकाच इत्यादिना यङ् अनुबन्धलोपः नन्दयद्वित्वम् नन्द् य नन्द् य हलादिः शेषः ननन्द्य दीर्घोऽकित इत्यभ्यासस्य दीर्घः ननन्द्य यङः सनादित्वात् तदन्तत्वेन धातुसंज्ञायां पुरोवल्लडादयः पापच्यत इत्यदिवत् नानन्द्यते अनानद्यत नानन्द्यताम् नानन्द्येत नानन्दिषीष्ट नानन्द्यके नानन्दाम्बभूव नानन्दामास, अनानन्दिष्ट नानन्दिता अनानन्दिष्यत नानन्दिष्यते नानन्दिषीष्टेत्यादि ।।

नलोपोऽनिदितामादिर्भवेद् दीर्घोऽकितः पुनः ।।

ध्वन्स् धातोरेकाच इत्यादिना यङ् अनुबन्धलोपः ध्वन्स् य अनिदिता मित्यादिना नलोपः ध्वनस् य सन्यङोः द्विर्वचनम् ,ध्वस् य ध्वस् य हलादिः शेषः धध्वस् य अभ्यासजश्त्वम् दध्वंस् य नीग्वञ्चुस्रन्सुध्वन्सु कसपनिपदस्कन्दा ७-४-५४ मित्यभायसस्य नीमागमः अनुबन्धलोपः । दनीध्वस् य धकारसकारयो रनचिचे ति द्वित्वम् दनिध्वस्य सनादिना धातुसंज्ञायां पुरोवल्लडादयः सार्वध लुके दनीध्वस्येति प्रकृतिः यमादौ प्रकृति विभागः पचिवद्दष्टव्यः दनीध्वस्यते अदनीध्वस्यत दनीध्वस्यताम् दनीध्वस्येत भावकर्मणोस्तदद्वत् दनीध्वंसषीष्ट दनीध्वं साञ्चक्रे दनीध्वं साम्बभूव दनीध्वंसामास अदनीध्वं सिष्ट दनीध्वं सिता अदनीध्वं सिष्यत दनीध्वं सिष्यते दनीध्वं सिषीष्टेत्यादि,

अतोऽभ्यासस्य वञ्चादेर्यङि नीगागमो भवेत् ।।

व्ये, धातोरेकाचे त्यादिना चङ् व्येय स्वपिस्यमिव्येञां यङी ति ६-१-१९ धातोर्यकारस्य सम्प्रसारणमिकारः वि ए साम्प्रसारणाच्चेति पूर्वरूपत्वम् सम्प्रसारणस्ये

ति दीर्घः वीय सन्यङो रिति द्विर्वचनम् वीय वीय हलादिः शेषः वीविय गुणो यङ्लुको रित्यभ्यासस्य गुणः वेवीय सनादिना धातुत्वाल्लडादयः सार्वधातुके वेवीयेति प्रकृति ,यकि यङो अकारलोपे वेवीयितिआशीर्लिङादौ वीवीयिति । वेवीयते अवेवीयत वेवीयताम् वेवीयेत वेवीय्यत इत्यादि वेवीयिषीष्ट वेवीयाञ्चक्रे वेवीयाम्बभूवे वेवीयामासे अवेवीयष्ट वेवीयिता अवेवीयिष्यत वेवीयिष्यते वेवीयिषीष्टेत्यादि,

स्वपिस्यमिव्येञां यङीति स्यात् प्रसारणम् ।।

शी, धानोरेकाच इत्यादिना यङ् अनुबन्धलोपः शीय अयङ्यिक्ङिती ७-४२२ ति धातोरीकारस्यायङादेशः यकारलोपः अकार उच्चारणार्थः शय् य सन्यङो रिति द्विर्वचनम् शय् य शय् य हलादि शेषः । शशय्य अभ्यासस्य दीर्घः शाशय्य सनादिना धातुसंज्ञायां पुरोवल्लडादयः, शाशय्यते अशाशय्यत शाशय्यताम् शाशय्यतेत शाशयिषीष्ट शाशयाञ्चक्रे शाशयाम्बभूव शाशयामास अशाशयिष्ट शाशयिता अशाशयिष्यत शाशयिष्यते शाशयिषीष्टेत्यादि,

ब्रू, धातोरेकाच इत्यादिना यङ् अनुबन्धलोपः ब्रूय ब्रूवो वचिरिति धातो वच्यादेशः इकार उच्चारणार्थः । वच् य द्विर्वचनम् वच् य वच् य, हलादि शेषः ववच् य अभ्यासस्य दीर्घः किताविति अभ्यासस्यदीर्घः वावच् य अनचिच वावच्य सनादिना धातुसंज्ञायां लडादयः वावच्यते अवावच्यत वावच्यताम् वावच्येत पुनस्तद्वत् वावचिषीष्ट वावचाञ्चक्रे वावचाम्बभूव वावचामास अवावचिष्ट वावचिता अनावचिष्यत, वावचिष्यते वावचिषीष्टे त्यादि,

हु, धातोरेकाच इत्यादिना यङ् हुय अकृत्सार्वधातुकयोरिति दीर्घः हूय द्विर्वचनम् हूय हूय हलादिः शेष हूहूय ह्रस्वः । हूहूय कुहोश्चु रित्यभ्यासस्य चुत्व झकारः तस्य अभ्यासे चर्च जश्त्वं जकारः जुहूय, गुणोऽभ्यासस्य जोहूय सनादिना धातु संज्ञायां लडादयः जोहूयते अजोहूयत जोहूयताम् जोहूयेत ।। जोहूयत

इत्यादि जोहूयिषीष्ट जोहूयाञ्चक्रे जोहूयाम्बभूव जोहूयामास अजोहूयिष्ट जोहूयिता अजोहूयिष्यत जोहूयिष्यते जोहूयिषीष्टेत्यादि ।।

हा, नित्यं कौटिल्ये गता ३-१-२३ विति यङ् नित्यग्रहण विषयनियमार्थम् गतिवचनाद् धातोः कौटिल्य एव न क्रियासमभिहार इति, हाय, सन्यङो रिति द्विर्वचनम् हाय हाय, हलादिः शेषः हाहाय ह्रस्व इत्यभ्यासह्रस्वः, दीर्घोऽकित इति दीर्घः हाहाय कुहोश्चुरिति चुत्वम् झाहाय अभ्यासे चर्चेति जश्त्वम् जाहाय सनादिता धातुसंज्ञायां लडादयः जाहायते अजाहायत जाहायताम् जाहायेत, जाहाय्यत इत्यादि, जाहायिषीष्ट जाहायञ्चक्रे जाहायम्बभूव, जाहायामास अजाहायिष्ट जाहायिता अजाहायिष्यत जाहायिष्यते जाहायिषीष्ट ।।

दिव्, धातोरेकाच इति यङ् दिव् य हलिचे त्युपधाया दीर्घः दीव् य द्विर्वचनम् दीव् य दीव् य हलादिः शेषः दीदीव् य ह्रस्वः दिदीव् य गुणः देदीव् य देदीव्य, अनचिच, देदीव्य, सनादिना धातुसंज्ञायां लडादयः देदीव्यते अदेदीव्यत देदीव्यताम् देदीव्येत पुनस्तद्वत् देदीविषीष्ट देदीव्यञ्चक्रे देदीवाम्बभूव देदीवामास अदेदीविष्ट देदीविता अदेदीविष्यतदेदीविष्यते देदीविषीष्टेत्यादि,

न धातुलोप स्यादार्धधातुके गुणवृद्धिता ।।

सूय सन्यङोरिति द्विर्वचनम् सूय सूय हलादिः शेषः सूसूय ह्रस्वः ससूय गुणः सोसूय आदेशप्रत्ययो रिति षत्वम् सोषूय सनादिना धातुत्वाल्लडादयः सोषूयते असोषूयत सोषूयताम् सोषूयेत सोषूय्यत इत्यादि, सोषूयिषीष्ट सोषूयाञ्चक्रे सोषूयम्बभूव सोषूयामास असोषूयिष्ट सोषूयिता असोषयिष्यत सोषूयिष्यते सोषूयिषीष्टेत्यादि,

नह् य द्विर्वचनम् नह् य नह् य हलादिः शेषः ननह् य अभ्यासस्यदीर्घः नानह् य अनचिच नानह्य सनादिना धातुसंज्ञायां लडादयः पूर्ववत् नानाह्यते अनानह्यतः नानह्यताम् नानह्येत पुनस्तद्वत् नानहीष्ट नानहाञ्चक्रे नानहाम्बभूव

नानहामास नानहिष्ट नानहिता अनानहिष्यत नानहिष्यते नानहिषीष्टे त्यादि,

सुय, अकृत्सार्वधातुकयो रिति धातो दीर्घः सू य द्विर्वचनम् सूयसूय, हलादिः शेषः सूसूय ह्रस्वः सुसूय गुणः सोसूय षत्वम् सोषूय, सनादित्वाद्धातुसंज्ञायां लडादि पूर्ववत् सोषूयते असोषूयत सोषूयताम् सोषूयेत सोषूय्यत इत्यादि सोषूयिषीष्ट सोषूयाञ्चक्रे सोषूयाम्बभूव सोषूयामास असोषूयिष्टेत्यादि,

अश् सूचिसूत्रिमूत्र्यटयर्त्यशूर्णोतीनामुपसंख्यान मिति यङ् तत्र ह्यश्नोतेरश्नातेश्च ग्रहणमुक्तं पदमञ्चर्यादौ, एवं परायणे आत्रेय मैत्रेयावपि, यङ्लुक्यशाष्टीत्यादि अश् य सन्यङोरिति द्विर्वचने अजादेर्द्वितीयस्ये ति द्वितीयस्यैकाचो द्विर्वचनम् अश् हलादिः शेषः अश् श् य अभ्यासस्य दीर्घः अशाश् य अनचिच । अशाश्य सनादिना धातुसंज्ञायां पूर्ववल्लडादयः अशाक्ष्यते आशाश्यत अशाश्र्यताम् अशाश्र्येत यक्येवमेव आशीर्लिङादौ अशाशिषीष्ट अशाशाञ्चक्रे अशाशाम्बभूव अशाशामास आशशिष्ट अशाशिंष्ट अशाशिता अशाशिष्यत अशाशिष्यते चिण्वदिटि अशाशिषीष्टेत्यादि,

चिय, अकृत्सार्वधातुकयोरिति दीर्घः चीय सन्यङोरिति द्विर्वचनम् चीय चीय हलादिः शेषः चीचीय ह्रस्वः चिचीय अभ्यासस्य गुणः चेचीय सनादिना धातुसंज्ञायां लडादयः चेचीयते अचेचीयत चेचीयताम् चेचीयेत चेचीय्यत इत्यादी, चेचीयिषीष्ट चेचीयाञ्चक्रे चेचीयाम्बभूव चेचीयामास अचेचीयिष्ट चेचीयिता अचेचीयिष्यत चेचीयिष्यते चेचीयिषीष्टेत्यादि,

तुद् सन्यङोरिति द्विर्वचनम् तुद य तुद् य हलादिः शेषः तुतुद् य गुणोयङ्लुकोरिति गुणः तोतुद् य अनचिच तोतुद्य, सनादिना धातुसंज्ञायां पूर्ववल्लडादयः तोतुद्यते अतोतुद्यत तोतुद्यताम् तोतुद्येत पुनस्तद्वत् तोतुद्षीष्ट तोतुद्ञ्चक्रे तोतुदाम्बभूव तोतुदामास अतोतुदिष्ट तोतुदिता अतोतुदिष्यत तोतुदिष्यते तोतुदिषीष्टे त्यादि,

मृ य रीङ्त इत्युकारस्य रीङ् ङकारलोपः म्रीय सन्यङोरिति द्विर्वचनम् म्रीय म्रीय हलादिः शेषः मीम्रीय ह्रस्वः मिम्रीय गुणः मेम्रीय, सनादिना धातुत्वाल्लडादयः मेम्रीयिषीष्ट मेम्रीयत मेम्रीयताम् मेम्रीयेत मेम्रीयेत मेम्रीय्यत इत्यादि मेम्रीयिषीष्ट मेम्रियाञ्चक्रे मेम्रियाम्बभूव, मेम्रियामास अमेर्मीयिष्ट मेम्रीयिष्ट मेम्रीयिता अमेम्रीयिष्यत, मेम्रीयिष्यत । मेम्रीयिषीष्टे त्यादि,

असार्वधातुके येच येचाकृप्रत्यये परे ।
ऋतोऽङ्गस्य परे च्यौ च रीङादेशो विधीयते ।।

मुच् य सन्यङोरितिति द्विर्वचनम् मुच् य मुच् य हलादिः शेषः मुमुच् य, यङ्लुकोरित्यभ्यास स्य गुणः मोमुच् य अनचिच मोमुच्य सनादिना धातुसंज्ञायां लडादयः मोमुच्यते अमोमुच्यत मोमुच्यताम् मोमुच्येत पुनस्तद्वत् मोमुचिषीष्टेत्यादि।।

रुध् य द्विर्वचनम् रुध् य रुध् य हलादि शेषः रुरुध् य गुणो यङ्लुको रित्यभ्यासस्य गुणः रोरुध् य अनचि च रोरुध्यत रोरुध्यताम् । रोरुध्येत पुनस्तद्वत् रोरुधिषीष्ट रोरुधाञ्चक्रे रोरुधाम्बभूव, रोरुधामास रोरुधीष्ट रोरुधिता अरोरुधिष्यत रोरुधिष्यते, रोरुधिषीष्टेत्यादि,

भुज् य सन्यङोरिति द्विर्वचनम् भुज् भुज् य हलादिः शेषः भुभुज् य ,गुणः भोभुज् य अभ्यासे चर्च, बोभुज् य अनचि च बोभुज्य सनादिना धातुत्वाल्लडादयः बोभुज्यते, अबोभुज्यत बोभुज्यताम् बोभुज्येतपुनस्तद्वत् बोभुजिषीष्टः बोभुजाञ्चक्रे बोभुजाम्बभूव भोभुजामास अबोभुजिष्ट बोभुजिता अबोभुजिष्यत बोभुजिष्यते बुभुजिषीष्ट इत्यादि ।।

युज् य सन्यङोः युज् य युज् य हलादिः शेषः युयुज् अभ्यासस्य गुणः योयुज् य अनचि च योयुज्य सनादिर्धातु संज्ञायां लडादयः योयुज्यते अयोयुज्यत योयुज्यताम् योयुज्येत पुनस्तद्वत् योयुजिषीष्ट योयुजाञ्चक्रे योयुजाम्बभूव योयुजामास अयोयुजिष्ट योयुजिता अयोयुजिष्यत, योयुजिष्यते, योयुजिषीष्टेत्यादि ।।

तन् य सन्यङोरिति द्विर्वचनं तन् य तन् य हलादि शेषः ततन् य नुगतोऽनुनासिकान्तस्ये ७-४-५५ त्यभ्यासस्य नुगागमः अनुबन्धलोपः तन् तन् य नश्चापदान्तस्य झलि अनुस्वारपरसवर्णो तन्तन् य अनचि च तन्तन्य सनादिना धातुत्वाल्लडादयः तन्तन्यते अतन्तन्यत तन्तन्यताम् तन्तन्येत, पुनस्तद्वत् तन्तनिषीष्ट तन्तनाञ्चक्र इत्यादि शेषं नेयम् ।।

मन् य सन्यङोः मनयमन् य हलादिः शेषः ममन् य नुमतोऽनुनासिकान्तस्येति नुगागमः अनुबन्धयोर्लोपः मन्य अत्रझल्परत्वाभावेऽपि नकारस्यानुस्वारो भवतीति।तथा चवृत्तौ नुमित्येतदनुस्वारलोपलक्षणार्थं द्रष्टव्यम्,स्थानिना ह्यादेशो लक्ष्यते ,तेन यंयम्यत इत्यादावज्झल्परेप्यनुस्वारो भवति ।अनुस्वारस्य पदान्तवच्चेति वक्तव्य मिति पदान्तवद्भावाद् वा पदान्तस्ये ति विकल्पेन परसवर्णः द्वित्वम् मम्मन्य सनादित्वाल्लडादयः मम्मन्यते अमम्मन्यत मम्मन्यताम् मम्मन्येत पुनस्तद्वत्, मम्मनिषीष्टेत्यादि,

कृ य, रीङृत इत्युकारस्यरीङादेशः क्रीय क्रीय हलादिः शेषः कीक्रीय, ह्रस्वः किक्रीय चुत्वम् चिक्रीय गुणः चेक्रीय सनादित्वाद्धातुत्वाल्लडादयः चेक्रीयते अचेक्रीयत चेक्रीयताम् चेक्रीये चेक्रीय्यते ।। डुक्रीय्ञोऽपि तद्वत,

वृ य, रीङृत इति रीङादशः सन्यङो व्रीय व्रीय हलादिः शेषः विव्रीय गुणद्वित्वे, वेव्रीय सनादिना धातुसंज्ञायां लडादयः । वेव्रीयते, अवेव्रीयत वेव्रीयताम् वेव्रीयेत वेव्रीय्यत इत्यादि, ग्रह् यग्रहिज्यादिना सम्प्रसारणम् गृअह् य सम्प्रसारणाच्चेति पूर्वरूपत्वं च गृह् य सन्यङो रिति द्विर्वचनम् । गृह् य गृह् य हलादिः शेषः गृगृह् य रीङृत इत्यभ्यासस्य रीगागमे ग्रीगृह् य उरत् गर् री गृह् य हलादि शेषः इति पूर्वस्य निवृत्ति गरीगृह् य कुहोश्चु रिति चुत्वम् जरीगृह् य अनचिच जरीमृश्च सनादिना धातुसंज्ञायां लडादयो भवन्ति जरीगृह्यते अजरीगृह्यत जरीगृहाताम् जरीगृह्येत पुनस्तद्वत् जरीगृहीषीष्टे त्यादि ।। (।। **इति यङन्तप्रक्रिया** ।।)

अथ यङ्लुगन्तप्रक्रिया ।

भू सत्तायाम् भूधातो रेकाच इत्यादिना यङ् भूय यङोऽचिचे त्यत्र२-४-७४ चकारेण बहुलग्रहणानुकर्षणाद् विकल्पेनानैमित्तिकोऽपि यङो लुग् भवति भू प्रत्ययलक्षणेनयङन्तत्वाद्धि धातुत्वे लडादि, द्विर्वचनं च भवति आत्मनेपदं तु ङिन्मात्रात् तद्विधेरप्रत्ययलक्षणत्वान्न भवति, ततश्च शेषात् कर्त्तरी ति परस्मैपदमेव भू, सन्यङो रिति द्विर्वचनम् भूभू ह्रस्वः भूभू, अभ्यासे चर्चे बुभू गुणो यङलुको रित्यभ्यासस्य गुणः बोभू प्रत्ययलक्षणेन सनादित्वाद् धातुसंज्ञायां लडादयो भवन्ति बोभूति, कर्त्तरि शप् बोभू अति चर्करीतं परस्मैपदमादिवच्चेत्यादिषु पठितत्वाद् अदिप्रभृतिभ्यः शप इति शपो लुक् बोभूति यङो वे ७-३-९४ ति यङ्लुगन्तात् परस्य पितः सार्वधातुकस्य वा इडागमः बोभूईति, सार्वधातुकार्धधातुकयो रिति गुणः बोभो ईति बोभोति भूसुवोस्तिङी ७-३-५५ ति गुणप्रतिषेधस्तु दाधातबोभूत्वि ति च्छन्दसि गुणाभावार्थं निपातनाज्झापकान्न भवति। एचोयवायावइत्यवादेशः बोभवीति बोभोति बोभूतः बोभू झि अदभ्यस्तादिति झेरदादेशः वोभू अति अकारस्य अचि श्नुधात्वि त्यादिनो वङादेशः । बोभुवति, आदेशे ति सिपः सकारस्य षत्वम् बोभवीषि बोभोषि, बोभूथः बोभूय, बोभवीमि बोभोमि बोभूवः बोभूमः ।. **इति यङ्लुगन्त प्रक्रिया ।।**

अथ णिजन्त प्रक्रिया ।

हेतुमति चे ३-१-२६ ति णिच् णकारचयोर्लोपः भू इ अचोञ्णिती त्यूकारस्य वृद्धिः भौ ई आवादेशः, भावि सनाद्यन्तधातव इति धातुसंज्ञायां लडादयः लट् णिचश्चे १-३-७४ तिणिजन्ता उभयपदिनः तत्र परस्मैपदे लस्य तिप् भावि ति अनुबन्धलोपः कर्तरिशप् अनुबन्धलोपः भावि अति सार्वधातुकयोरिति इकारस्य गुणः भावे अति अयादेशः भावयति सार्वधातुके भावये ति प्रकृतिः भावयति अभावयत् भावयतु भावयेत् यकि णेरनिटीति णिलोपाद् भाविति प्रकृतिः भाव्यते अभाव्यत भाव्यताम् भाव्येत आशीर्लिङि णेरनिटी ति णिलोपः भाव्यात् लिटि णे

रयामन्ते त्यादिनायादेशः । भावयाञ्चकार भावयाम्बभूव भावयामास लुङि भाविति इतश्चे तीकारलोपः भावित् च्लि लुङी ति च्लि भावि च्लि त् णिश्रिदुस्रुभ्य क्रर्तरि चङ् इति सन्वद्भाव अनुबन्धलोपः भावि अत् णेरनिटीति णिलोप भाव् अत् णौ चङ्युपधाया इत्य कारस्य ह्रस्वः भव् अ त् चङी ति द्विर्वचनम णौकृतं स्थानिवदिति रूपस्थानिवत्वे भूशब्दो भौशब्दो वा द्विरुच्यते भूभू, कृते द्विर्वचने पुनरादेश एवं, भवत् अभ्यासजश्त्वम् बूभवत् ओः पुयण्ज्यपरे ७-४-५० इत्यभ्यासस्येकार भवति बिभवत् दीर्घो लघो रिति दीर्घः भावि तास् ति आर्धधातुकस्ये तीट् भावि तास् इति णेर्गुणायादेशौ भावयितास् ति लुटः प्रथमस्य हारौरसः भावयिताम् जा डित्यभस्येतिपिटिर्लोपः भावयिता लृङि भावि ति भावित् स्यतासी लृलुटोरिति इडागमः सस्य षत्वम् णेर्गुणायादेशौ, अडागमः अभावयिष्यत् लृटि भाविति स्यः सस्य षत्वम् णेर्गुणायादे शौ भावयिष्यति ।।

अथ कर्मणि ण्यन्तस्य सकर्मकत्वाद् भावासम्भवः लिडि चिण्वदि ट्पक्षे भावीति स्थिते चिण्वदिटोऽसिद्धत्वाण्णिलोपे भाविषीष्ट अन्यत्र विभक्तेरिडागमे णेर्गुणायादेशौ भावयिषीष्ट भावयाञ्चक्रे भावयाम्बभूवे भावयासमासे लुङि भावि त चिण् भावकर्मणोः भावि इ णिलोपः अडागमः अभावि ,द्विवचनादौ चिण्वदिट्पक्षे भावि आताम् ,सिच् सिच इट् सस्य षत्वम् इटो सिद्धत्वाण्णिलोपः अडागमः । अभाविषाताम् अन्यत्र भावि आतां सिच इडागमः षत्वम् णेर्गुणायादेशौ अभावयिषाताम् ध्वमि विभाषेट इति वा मूर्घन्य विकल्पः लुटि चिण्वदिट्पक्षे भावि इता णिलोपः भाव् इता भाविता अन्यत्र तासेरिट् णेर्गुणायादेशौ भावयिता लृङि भावित स्यः इट् षत्वम् भावि इष्यत इटोऽसिद्धत्वाण्णिलोपः भाविष्यते अन्यत्र भाविते स्यः आर्धधातुकस्ये त्यादि नाडागमः भावि इष्यते, णेर्गुणायादेशौ भावयिष्यते ।।

एध् 'हेतुमतिचे' ति णिच् ,अनुबन्धलोपः, एधि, सनादिना धातुसंज्ञायां लडादयः एधिति, कर्तरि शप्, एधि अति, णेर्गुणायादेशौ, एधयति, लङि

विभक्तेरिकारलोपः, धातोराडामः आडागम, आटश्च इत्येव विशेषः ऐधयत् एधयतु एधयतात्, एधयेत् ,यकि 'णेरनिटी' ति णिलोपः, एध्यते, ऐध्यत एध्यताम्, एध्येत आशिषि 'णेरनिटि' ति णिलोपः एध्यात् लिटि 'आयमन्ते' ति णेरय् एधयाञ्चकार एधयाम्बभूव, एधयामास लुडि एधिति इतश्च एधित् 'णिश्रि'दुस्रुभ्यः कर्तरिचङिति च्लेश्चङ्, एधि, अत्, णेरनिटि, एध् अत् 'णौचङ्'युपधायाः ह्रस्वः, इध् अत्, 'चङि' इति द्विर्वचने 'द्विर्वचने'चीति णिलोपस्य स्थानिवद्भावात् 'अचादेर्द्वितीयस्ये'ति धि शब्दो द्विरुच्यते ।इधि धि अत्

,कृते द्विर्वचने पनरादेश एव । इधि धि अत्'अभ्यासे चर्च' इदिधत् , आड्वृद्धिश्च ऐदिधत् ,लुटि एधि पुरोवत् क्रमेण तास् आर्धधातुकस्येट्,णेर्गुणायादेशौ एधयिता ,लुङि एधि ति ,'इतश्च' एधित् ,,स्यः धि स्यत् इडागमः षत्वं एधि इष्यते ,णेर्गुणायादेशौ एधयिष्यत् आड्वृद्धी ऐधयिष्यत् ,लृटि एधि ति स्य एधिस्यति इडागमषत्वे एधि इ ष्यति ,णेर्गुणायादेशौ,एधयिष्यति ,कर्मणि आशिर्लिङि एधित चिण्वदिट्पक्षे इटो असिद्धत्वाण्णिलोपे ऐधिषीष्ट ,अन्यत्र विभक्तेरिट् , णेर्गुणायादेशौ,एधयिषीष्ट ,लिटि एधयाञ्चक्रे एधयांबभूवे एधयामासे ,लुङि एधित,चिण् भावकर्मणौः एधि इ 'णेरनिटि' ,आड्वृद्धी ऐधि ,द्विवचनादौ चिण्वदिच्पक्षे एधि आतां सिच् सिच इडागमः शशअय् षत्वं इटो असिद्धत्वाण्णिलोपः आड्वृद्धी,ऐधिषाताम् अन्यत्र एधि आतां ,सिच् सिच इडागमः सस्य षत्वं ,णेर्गुणायादेशौ आड्वृद्धी ऐधिषाताम् ,लुटि चिण्वदिट्पक्षे एधि इता णिलोपः एधिता ,अन्यत्र तासेरिडागमः ,णेर्गुणायादेशौ एधयिता ,लृङि एधि त ,स्यः ,इट् षत्वम् ,एधि इष्यत ,इटो असिद्धत्वाण्णिलोपः ,आड्वृद्धी ऐधिष्यत अन्यत्र एधित स्य ,इट् षत्वं ,णेर्गुणायादेशौ आड्वृद्धी ऐधिष्यत लृटि एधि ते स्यः इट् षत्वं एधि इष्यते, इटो असिद्धत्वाण्णिलोपः एधिष्यते अन्यत्र भावि स्यः ,इट् ,षत्वं ,एधि इष्यते,णेर्गुणायादेशौ एधयिष्यते ।

पच् 'हेतुमति चे'ति णिच् पचि 'अत उपधायाः' इति वृद्धिः पाचि ,

सनादिना धातुसंज्ञायां लडादयः पाचयति ,लुङि अपीपचत् । इतः परं प्रायेण लड्लुङो रूपं प्रदर्शयामहे ।

नन्द् 'हेतुमति चे'ति णिच् ,नन्दि सनादिनाधातुत्वाल्लडादयः नन्दयति अनन्दयत् ।

ध्वंस् 'हेतुमति चे'ति णिच् ,ध्वंसि ,सनादिधातुसंज्ञायां लडादय- ध्वंसयति, अदध्वंसत् ।

व्ये 'आदेच' इत्यात्वम् व्या ,'हेतुमति च' व्या इ 'शाच्छासाह्वाव्यावेपां युगि'ति धातोर्युगागमः अनुबन्धलोपः व्याय् इ व्यायि ,सनादित्वात् धातुसंज्ञायां लडादयः व्याययति अविव्ययत् ।

अद् णिच् ,अदि 'अत उपधायाः' इति वृद्धिः ,आदि सनादित्वात् धातुसंज्ञायां लडादयः आदयति आदिदत् ।

शि 'हेतुमति चे'ति णिच् शी इ 'अचोञ्णिती'ति वृद्धिः शै इ आयादेशः, शायि सनादित्वाद्धातुसंज्ञायां लडादयः शाययति अशीशयत् ।

ब्रू 'हेतुमति चे'ति णिच् ब्रू इ 'ब्रुवो वचिः' वच् इ वचि 'अतउपधायाः' इति वृद्धि वाचि सनादित्वाद्धातुत्वम् लडादयः वाचयति अवीवचत् ।

हु णिच् ,हु इ ,वृद्धि हौ इ आवादेशः हावि सनादिधातुत्वाल्लडादयो भवन्ति हावयति अजूहवत् ।

हा 'हेतुमति चे'ति णिच् हा इ 'अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ' ७-३-३६इति धातोः पुगागमः ,हाप् इ ,धातुत्वे लडादि हापयति अजीहपत् ।

धा 'हेतुमति च' ,धा इ 'अर्तिह्रीव्ली' त्यादिना पुगागमः धाप् इ धापि सनादित्वाल्लडादयः धापयति अदीधपत् ।

दिव् णिच् ,अनुबन्धलोपः दिवि 'पुगन्तेति' गुणः देवि धातुत्वाल्लडादि देवयति अदीदिवत् ।

सु णिच् सु इ 'अचोञ्णिति' वृद्धिः सौ इ ,आवादेशः सावि ,धातुत्वे लडादि सावयति असूषुवत् ।

अशू णिच् ,अशू इ उपधाया वृद्धिः आशि धातुत्वे लडादिः आशयति आशिशत् ।

चि 'हेतुमति च' चि इ 'चिस्फुरोर्णौ'६-१-५४वित्यात्वं,आत्वपक्षे पुक् चापि ,अन्यत्र वृद्ध्ययादेशौ,चायि धातुत्वे लडादिः चाययति अचीचयत् चापयति अचीचपत् ।

स्फुर चलने ,स्फुर् णिच् ,स्फुर् इ 'चिस्फुरोर्णौ 'वित्योकारस्याकारादेशः स्फारि स्फोरि सनादिना धातुत्वे लडादि स्फारयति लुङि चङि द्विर्वचने 'शर्पूर्वा खयः' इति खयः शिष्यन्तो अपिस्फुरत् ,स्फोरयति अपुस्फुरत् । णिच् ,तुदि गुणः तोदि धातुत्वे लडादि पूर्ववत् ,तोदयति अतूतुदत् ।

मृ णिच् मृ इ ,वृद्धिः मारि धातुत्वे लडादि मारयति अमीमरत् ।

मुच् णिच्,मुच् इ ,गुणः मोचि धातुत्वाल्लडादि मोचयति अमूमुचत् रुध् णिच् रुधि गुणः रोधि ,धातुत्वे लडादि रोधयति अरूरुधत् ।

भुज् णिच् गुणः लडादि पूर्ववत् भोजि भोजयति अबूभुजत् ।
युज् णिच् ,युजि गुणः योजि ,लडादिः योजयति अयूयुजत् ।

तन् 'हेतुमति चेति णिच् वृद्धिः तानि सनादिना धातुत्वे लडादयः तानयति,अतीतनत् ,एवं मानयति अमीमनत् .

कृ इ ,कारयति ,अचीकरत् ।

क्री इ गुणः,क्रे इ क्रीङ्जीनां णावित्यादिना आत्वम् क्रा इ अर्तीत्यादिना पुक् ,क्रापि .धातुत्वाल्लडादि क्रापयति अजीक्रपत् ।

इङध्ययने,अधिपूर्वोयं ,अध्यापयति अध्यापिपत् ।

ज्ञि जये ,सार्वधातुकेति गुणः जे इ क्रीङ्जीनां णावित्यादिनात्वम् जा इ अर्तीत्यादिना पुक् जापि धातुत्वाल्लडादि जापयति अजीजपत्

वृ इ ,वृद्धिः वारि धातुत्वे लडादि वारयति अवीवरत् ।

ग्रह् णिच् ग्रहि वृद्धिः ग्राहि ,ग्राहयति अजिग्रहत्।

चुर् सत्यापेति स्वार्थे णिच् चुरि पुगन्तगुणः सनादिना धातुत्वे लडादि हेतुमति चेति णिच् णेरनिटीति स्वार्थेणिलोपः चोर् इ ,चोरि सनादिनाधातुत्वाल्लडादि चोरयति अचूचुरत् । एवं पालयति अपीपालयत् अर्चयति आर्चिचत् ।

इति णिजन्तः। इति सनाद्यन्तनयः समाप्तः ।

ग्रन्थलिखितग्रन्थानां विवरणम्

Oriental Research Institute of Manuscripts Library -

Alphabetical Index - Vol. III, Malayalam script, Palm leaf

1. M.S .No: 969
2. M.S .No:10592
3. M.S .No: 13449
4. M.S .No: 13590.A
5. M.S .No: L.235
6. M.S .No: L.533
7. M.S .No: T.62 - Devanagari
8. M.S .No: 13421 - Malayalam Script,
   Palm leaf